पूज्य दण्डी स्वामी शुद्धबोधतीर्थजी महाराज— यह बेलौन के निवासी थे। इनका पूर्व आश्रम का नाम पं० गंगादत्तजी शास्त्री था। आप ज्वालापुर महाविद्यालय में पढ़ाते थे। पूज्य ब्रह्मचारीजी ने पं० नरदेव शास्त्री के साथ आपसे भाष्य पढ़ा था। व्याकरण के अगाध पाण्डित्य के कारण आप अपने समय में वैयाकरण-केशरी कहलाते थे। सन्यास ग्रहण करने के पश्चात् शुद्धबोधतीर्थ कहलाये। पूज्य महाराजजी से अत्यन्त स्नेह मानते थे अतः महीनों नरवर आश्रम पर बने रहते थे और महाविद्यालय के छात्रों को व्याकरण पढ़ाया करते थे।

पूज्य दण्डीस्वामी निजबोधाश्रमजी महाराज— यह काशी के अस्सीघाट के आश्रम से सम्बद्ध थे। संवत् १९८० तक प्रतिवर्ष नरवर आया करते थे और पूज्य महाराजजी के स्नेह के कारण यहां महीनों रुक जाया करते थे। स्वभाव के अतिसरल एवं विनोदी थे। पुराणों का विशेष ज्ञान था। जितने समय नरवर पर निवास करते थे उतने दिनों आप यहाँ पर महाभारत की कथा कहा करते थे। आप परमविरक्त साधु थे और भिक्षा करके दिन में एकबार भोजन करते थे।

पूज्य दण्डीस्वामी कृष्णानन्दजी महाराज— यह दक्षिण भारत– कदाचित् महाराष्ट्र के रहने वाले थे। आप दर्शनशास्त्र के प्रकाण्ड विद्वान् थे और संवत् १९७५ तक आपने कई बार नरवर पर चातुर्मास्य किया। पूज्य महाराजजी ने आपसे कुछ समय वेदान्त का अध्ययन किया था। आप स्वभाव के अत्यन्त सरल एवं आचारवान् व्यक्ति थे। अपने अन्तिम दिनों में काश्मीर में निवास करने लगे थे, जहाँ से आप पूज्य महाराजजी के लिये केशर एवं ऊनी वस्त्र आदि भी कभी कभी भेजा करते थे।

पूज्य स्वामी मधुसूदनतीर्थजी— यह भी स्वामी शुद्धबोधतीर्थजी की भाँति बेलौन के ही निवासी थे। सन्यासी होने के पश्चात् आप जगन्नाथपुरी की गोबर्धनपीठ के शंकराचार्य हुए।

स्वामीजी की हार्दिक इच्छा थी कि उनके पश्चात् या तो स्वामी शुद्धबोधतीर्थ उस पीठ के शंकराचार्य अथवा महाराजश्री ही सन्यास लेकर उस पद को स्वीकार करें। किन्तु उनके विचार को दोनों विभूतियों ने बड़ी आर्जवता एवं विनम्रता के साथ स्वीकार नहीं किया, उस समय स्वामी भारतीकृष्णतीर्थजी महाराज शंकराचार्य बने। पूज्य स्वामीजी महाराजश्री से विशेष स्नेह मानते थे और प्रायः नरवर पर पधार कर निवास करते थे।

पूज्य स्वामी आत्मदेवजी महाराज— ये बदायूँ जिले के रहने वाले अत्यन्त वीतराग एवं तितिक्षु थे। मात्र कौपीन धारण कर रहा करते थे। कलकत्ते के अधिकारियों पर आपका प्रभाव था अतः उनसे नरवर का हित करा दिया करते थे।

हरिओउम बाबा— यह भी एक उच्चकोटि के महात्मा थे। इनके जन्मस्थानादि की विशेष जानकारी नहीं है। बोलचाल की भाषा से ब्रज प्रदेश के प्रतीत होते थे। इन्होंने नरवर पर आकर ही सन्यास लिया था। इनका शरीर शतवर्ष तक रहा अन्त में गंगा में समाधिस्थ हुए। यह अत्यन्त विरक्त महात्मा थे। श्वांस की गति देखकर प्रश्न का उत्तर बता दिया करते थे। महाराजश्री भी कभी-कभी उलझनों में स्वामी हरिओउम बाबा से सलाह लिया करते थे।

पूज्य स्वामी विष्णुआश्रमजी महाराज— इनका पूर्व आश्रम का नाम प्रभुदत्त ब्रह्मचारी था। आप प्रारम्भ में नरवर महाविद्यालय के ही छात्र थे। उसके पश्चात् महाराजश्री के आदेश से आपको विहारघाट पाठशाला में प्रवेश दिला दिया गया। ब्रह्मचर्य अवस्था में ही आप विशेष तितिक्षा का जीवन विताते थे। स्वभाव में सरल एवं विरक्त, आचारनिष्ठ एवं कर्मनिष्ठ हैं। आपकी स्मरण-शक्ति बड़ी अच्छी है। इनकी वक्तृत्व शक्ति भी अद्भुत है। भागवती कथा कहने में आप श्रोताओं को मन्त्रमुग्ध कर देते हैं। सन्यास ग्रहण करने के पश्चात् स्वामी विष्णुआश्रम कहलाये। आपने भगवती भागीरथी के किनारे पवित्र एवं प्रसिद्ध क्षेत्र शुकताल जिला मुजफ्फरनगर में अपना आश्रम स्थापित किया है। आश्रम अत्यन्त ही भव्य एवं आकर्षक है। इस ग्रन्थ के लिए धन-संग्रह में आपका भी उल्लेखनीय योगदान है। महाराजश्री में आपकी अगाध श्रद्धा है।

पूज्य स्वामी दामोदराश्रमजी महाराज— आपका जन्मस्थान भरतपुर जिले में है। अपने ब्रह्मचर्यकाल में विद्याध्ययन के लिए नरवर में ही रहे हैं। आपका उस समय नाम देवदत्त ब्रह्मचारी था। नरवर के निवासकाल में आप महाराजश्री की सेवा में ही अधिक रहते थे अतः महाराजश्री के विरक्त जीवन का आप पर विशेष प्रभाव पड़ा। सन्यास लेने के पश्चात विहारघाट में रह रहे हैं। उच्चकोटि के त्यागी एवं तपस्वी हैं। आपकी भागवती कथा में विशेष श्रद्धा है।

पूज्य स्वामी भगवदाश्रमजी महाराज—यह बेलौन निवासी पं० हरनारायण वैद्य के छोटे भाई हैं। इनका पूर्व नाम श्रीभगवानसहायजी है। महाराजश्री की कृपा एवं आदेश से आपने आयुर्वेद की शिक्षा ऋषिकल्प पं० मुन्शीलाल से पाई थी। जब आप सिद्धहस्त आयुर्वेद चिकित्सक हो गये तो अपने बड़े भाई के सन्तान के योग्य होने तक आयुर्वेद चिकित्सा से वृत्ति करते रहे। बाद में नरवर की सेवा में उपस्थित हो गये। महाराजश्री में आपकी अगाध श्रद्धा थी, उनके बुलावे की सूचना मिलते ही सभी काम काज छोड़ कर महाराजश्री की आज्ञा पालन में तत्पर हो जाते थे। आज कल कलकत्ते के पास बगीचे में निवास करते हैं।

पूज्य स्वामी रामाश्रमजी महाराज—आपका पूर्व नाम श्रीरामाधार था। आप भी पूज्य स्वामी बिष्णुआश्रमजी के सहपाठियों में रहे हैं। आपके स्वभाव में निर्भीकता कूट-कूट कर भरी है। निर्भीक होने के कारण ही आप सदा स्पष्ट वक्ता रहे। सन्यास लेने के पश्चात् आप लुधियाना में रहने लगे हैं। भागवती कथा कहने में आप भी अपना विशिष्ट स्थान रखते हैं। इस ग्रन्थ के लिए अर्थ-संग्रह करते समय हमें आपके दर्शन धर्मसंघ दिल्ली में हुए। अर्थसंग्रह में आपसे भी सहयोग प्राप्त हुआ है।

पूज्य स्वामी सुखबोधाश्रमजी महाराज—इनका पूर्व नाम श्री सुदर्शनाचार्य है। आप नरवर महाविद्यालय के प्रथम आचार्य हैं। दर्शन, व्याकरण आदि शास्त्रों के अगाध विद्वान् हैं। लगभग एक वर्ष आपने उस्मानियां विश्वविद्यालय, हैदराबाद के संस्कृत विभाग में अध्यापन कार्य किया। दो-तीन वर्ष पूर्व आपने अनूपशहर स्थित गणेश मन्दिर के स्वामीजी से सन्यास की दीक्षा ली। इस ग्रन्थ का सम्पादन आपने दो महीने यहां रहकर किया है। पूज्य स्वामीजी अत्यन्त सरल एवं वीतराग हैं।

श्रीशंकरानन्दजी श्रीकाशीवासीजी--आप शिव के अनन्य भक्त थे तथा उदारमना थे। विद्यार्थियों को भोजन कराने में बड़े संलग्न रहते थे। जो भक्त आपको द्रव्य देते थे उसको जोड़कर साल में खीर,हलुआ, दालबाटी, चूरमा बनवाया करते थे। उन्होंने महारुद्रयाग भी कराये थे। प्रतिवर्ष ६ माह नरवर रहा करते थे।

ऊपर हमने नरवर आश्रम से सम्बद्ध कतिपय सन्यस्त विभूतियों का संक्षिप्त नामोल्लेख किया है। किन्तु इसका यह अर्थ कदापि नहीं है कि वह संख्या केवल इतनी है। इनके अतिरिक्त अन्य कई नाम ग्रहण किये गये, पूज्य स्वामी चन्द्रशेखराश्रम, पूज्य स्वामी रामकृष्णाश्रम परमहंस, पूज्य स्वामी नरसिंहाश्रम आदि कई नाम ऊपर की माला की ही मणियाँ हैं। ये तो सन्यस्त विभूतियों के नाम हैं। इनके अतिरिक्त ऐसी नाममाला भी अलघु है जो ब्रह्मचारी रहे अथवा जिन्होंने आश्रम की अन्य सेवाओं में ही अपने जीवन की सार्थकता समझी। आश्रम सेवकों में श्रीगंगासेवीजी का नाम अग्रगण्य है। ब्रह्मचारियों में योगानन्दजी, अखण्डानन्दजी, महावीरजी आदि के नाम नरवर के तदानीन्तन स्नातकों के हृदय-पटल पर अमिट रूप से अंकित हैं। वस्तुतः महाराजश्री की तपस्या के फलस्वरूप उस समय नरवर आश्रम की शोभा ही अलौकिक थी।

महाराजश्री ने साङ्गवेद महाविद्यालय की स्थापना सम्वत् १९६० में इस भावना से की थी कि यह विद्यालय संस्कृत भाषा के प्रचार एवं प्रसार में अधिकाधिक योगदान कर सकेगा। प्रारम्भ में पूज्यचरण महाराजजी ही अध्यापन-कार्य करते थे, किन्तु थोड़े समय के पश्चात् श्रीनवनिधि पाठकजी भी अध्यापन कार्य में योगदान करने लगे। शनैः शनैः विद्यालय की ख्याति बढ़ी और ज्ञानपिपासुओं के आने का ताँता लग गया और विद्यालय के छात्रों आदि की संख्या सैकड़ों तक पहुंच गई। विद्यालय में वेद, वेदान्त, व्याकरण, ज्योतिष, साहित्य आदि अनेक विषयों की आचार्य कोटि तक की शिक्षा होने लगी।

अध्यापन की दृष्टि से इस विद्यालय की विशेष उन्नति आचार्यचरण श्रीविजयप्रकाशजी के प्रधानाचार्य पद पर अधिष्ठित होने के पश्चात् हुई। पूज्य आचार्यजी का पाण्डित्य गम्भीर, उनका

स्वभाव अत्यन्त सरल, उनकी अध्यापन-पद्धति सरल तथा परिमार्जित, छात्रों के प्रति जनका वात्सल्य अगाध एवं जीवन परम सात्विक तथा उदार हैं। पूज्य आचार्यजी के मुख्याचार्य होते ही विद्यालय ज्ञान के क्षेत्र में अग्रणी होने लगा।

जैसा ऊपर कहा जा चुका है, शंकराचार्यों, सन्यासियों, ब्रह्मचारियों एवं आश्रम सेवा के लिए जीवनदानियों के अतिरिक्त आश्रम विद्वन्मण्डली से भी मण्डित रहने लगा। महाराजश्री की हार्दिक इच्छा आश्रम की जिस प्रकार के आचारवान् विद्वन्मण्डल को देखने की थी, वस्तुतः उसी प्रकार के विद्वान् नरवर में इतस्ततः दिखाई पड़ने लगे।

महाराजश्री शास्त्रार्थ में विशेष रुचि लिया करते थे। वस्तुतः शास्त्र एवं शास्त्र के मुहुर्मुहुः मार्जन की आवश्यकता है। जिस प्रकार उपेक्षित पड़ा रहने वाला शास्त्र कुण्ठित होकर व्यर्थ हो जाता है उसी प्रकार बिना विचार किये शास्त्र के अर्थ में शंकायें एवं विप्रतिपत्तियाँ आ खड़ी होती हैं। इसलिए शास्त्र के अर्थ को स्पष्ट करने, उसकी समझ को गहरा बनाने, उसकी विप्रतिपत्तियों को दूर करने आदि के लिए शास्त्रार्थ ही एकमात्र उपाय है। शास्त्र के अर्थ विनिश्चय के लिए इसमें अधिक प्रशस्त मार्ग दूसरा कोई नहीं है। इन शास्त्रार्थ के विषय कभी व्याकरण सम्बद्ध, कभी वेद से सम्बद्ध तथा कभी किसी अन्य विषय से सम्बन्धित रहा करते थे। शास्त्रार्थ से जहां शास्त्र के अर्थ विनिश्चय में सहायता मिलती है वहां यह शास्त्रार्थकर्त्ता के ज्ञान में वृद्धि, बोध में स्पष्टता एवं स्वयं में विश्वास जाग्रत करने का भी अचूक साधन है।

समय बीतते देर नहीं लगती। साङ्गवेद महाविद्यालय के छात्र अपनी मातृ-संस्था का नामोज्ज्वल करने के निमित्त विविध विषयों के अध्यापन के लिए तैयार होने लगे। महाराजश्री के पास इन प्रोद्यत विद्वानों को उचित स्थानों पर प्रतिष्ठित करने की योजना भी थी। जैसा कि संस्कृत के प्रचार एवं प्रसार का उल्लेख करने के अवसर पर कहा जा चुका है कि महाराजश्री के संकेत, प्रेरणा, प्रणोदन अथवा सहयोग से अनेक पाठशालायें तथा संस्कृत विद्यालय प्रारम्भ हुए। साङ्गवेद महाविद्यालय से उत्पन्न विद्वान् इन प्रारम्भ होने वाली पाठशालाओं में बिठाये जाने लगे। वस्तुतः उस समय नरवर विद्वानों का आकर बन गया था। जहां और जिस किसी को जिस विषय के अध्यापक की आवश्यकता पड़ी, उसने महाराजश्री के सम्मुख अपनी कठिनाई रखी। तुरन्त किसी एक स्नातक को उस विद्यालय पर पहुंचने के लिए निदेश महाराजश्री की ओर से हो गया।

आज पश्चिम उत्तर प्रदेश में ही नहीं अपितु समस्त उत्तर भारत में इस महाविद्यालय के स्नातक अध्यापन कार्य करते हुए अपनी मातृ-संस्था के यशःसौरभ को दिग्दिगन्त में प्रसारित कर रहे हैं। हमारी हार्दिक इच्छा थी कि इस विद्यालय के स्नातकों की सूची प्रस्तुत की जाय, कार्य प्रारम्भ किया भी गया, किन्तु आवश्यक सहयोग के अभाव में इच्छा के अनुसार यह कार्य पूरा न हो सका।

जिस प्रकार मांग उपस्थित होते ही अध्यापक किसी भी पाठशाला के लिए भेज दिये जाते थे, उसी प्रकार सनातन विधि से यज्ञ कराने के लिए, यज्ञोपवीत विधि सम्पन्न कराने के लिए अथवा शास्त्रीय पद्धति से विवाह कराने के लिए आचार्य भी पत्र प्राप्त होते ही नरवर से उपलब्ध होते थे।

विधिज्ञ आचार्य के अभाव में विधिपूर्वक सम्पन्न कराने के इच्छुक व्यक्ति का कार्य पड़ा नहीं रहता था। आज भी नरवर विद्यालय में अच्छे कर्मकाण्डी आचार्य विद्यमान हैं।

इनके अतिरिक्त कुछ स्नातक ऐसे थे जो आयुर्वेद के प्रति अग्रसर हुए और आज पीयूषपाणि वैद्य होकर महाराजश्री एवं नरवर विद्यालय की कीर्तिकौमुदी अपने अपने क्षेत्र में फैला रहे हैं। विद्वान् अध्यापकों की भांति पश्चिम उत्तर प्रदेश में कोई भी एक नगर, उपनगर ऐसा नहीं मिलेगा जहां पर नरवर का स्नातक वैद्य न हो।

उपर्युक्त क्षेत्रों में इस विद्यालय ने जितनी सेवा की है उतनी कदाचित् किसी एक विद्यालय ने की होगी। यह विद्यालय महाराजश्री की कीर्ति-पताका का समुच्छ्रित पुष्टदण्ड है, उनकी परोपकार तथा सेवाभावना का साकार रूप है।

प्रशस्ति-आलोक

द्रष्टा-मानस में पड़ा जो महत्त्व प्रतिबिम्ब।
बना पूत श्रद्धा वही उमड़े भाव कदम्ब॥
उनकी ही अभिव्यक्ति यह बनी 'प्रशस्ति' पुनीत।
अवगाहन से चित्त को विमल करेगी मीत॥

गायत्री–वन्दनम्

—: * :—

गायन्ति ये त्वां पुरुषा विशुद्धा भवन्ति सद्यो भवभीतिमुक्ताः ।
त्वं वेदमातासि पवित्ररूपा तवाश्रयात्को न लभेत सौख्यम् ॥ १ ॥

यस्या न शोभा वचनैर्निरूप्या गुणा असंख्याश्च जगत्प्रसिद्धाः ।
आजीवनं जीवनदत्तनाम्ना समाश्रिता सा शुभमातनोतु ॥ २ ॥

त्रीनप्यतीतासि गुणैस्तु देवान् समस्तविश्वस्य च मूलभूता ।
शाखाःप्रशाखास्तववेदमन्त्राः सुरास्त्वदीयां स्तुतिमाचरन्ति ॥ ३ ॥

वन्द्यासि लोकस्य चराचरस्य प्रभातवेलेव प्रबुद्धलोका ।
जपन्ति ये त्वां सरलाः सुशीलास्तमस्तदीयं विनिहंसि नूनम् ॥ ४ ॥

ददासि मुक्तिं रुचिरांश्च भोगान् समाश्रितेभ्यो निजमङ्घ्रियुग्मम् ।
दयान्विता भक्तजने सदासि प्रवर्तयन्ती शुभकर्ममार्गे ॥ ५ ॥

नास्त्यस्य बालस्य कदापि शक्तिर्गुणांस्त्वदीयाननुवर्णयेद्यत् ।
पक्षी यथाशक्ति नभः प्रयाति तथैव मेऽयं वचनप्रयासः ॥ ६ ॥

मनोरथं पूरय देवि ! दिव्ये श्रीजीवनाराधितपादपद्मे ।
पुष्पाञ्जलिः भावमयो जनानां मनस्यजस्रं सुखमातनोतु ॥ ७ ॥

—रामचरण दीक्षितस्य

मधुरं संस्मरणम्

(श्री करपात्रीजी महाराज)

भगवत्यास्तटे दिव्ये गङ्गायाः सुमनोहरे ।
सुरैर्निषेविते रम्ये शुभे परमपावने ॥ १ ॥

अस्ति पुण्यमयः श्रीमान् आश्रमः परमोज्ज्वलः ।
ख्यातः नरवरे साङ्गवेदविद्यालयाभिधः ॥ २ ॥

तत्र जीवनदत्तस्य ऋषिकल्पस्य धीमतः ।
संस्थापकस्य संवासो बभूव वरवर्णिनः ॥ ३ ॥

द्वाचत्वारिंशदब्दानां प्रायो दृष्टवतो जगुः ।
पूर्वं तदाश्रमपदं मम पर्यटतस्तदा ॥ ४ ॥

आश्रमोऽसौ महाभागः सात्त्विकः परमोत्तमः ।
तपोमयः पुण्यकीर्तिस्त्यागवैभवसम्भृतः ॥ ५ ॥

प्रशान्तवातावरणो रमणीयगुणान्वितः ।
श्रद्धाधनश्चरित्रश्रीः पुण्यश्रवणकीर्तनः ॥ ६ ॥

तत्र श्रीवर्णिवर्य्यस्य सात्त्विकस्य विशेषतः ।
तपोमूर्तेः पवित्रस्य विद्यावैभवशालिनः ॥ ७ ॥

अष्टाध्यायीमहाभाष्यं दर्शनान्युपतस्थिरे ।
विविधाश्च तथा विद्या वशमाजग्मुरुत्तमाः ॥ ८ ॥

यद्यप्यासन् विज्ञवर्या अनेकेऽध्यापकोत्तमाः ।
तथापि बहवः शान्ता विरक्ता ब्रह्मचारिणः ॥ ६ ॥

तथापरे महात्मानस्तत एव समध्यगुः ।
मनुस्मृतिभारतञ्च रामायणमनुत्तमम् ॥ १० ॥

वर्णाश्रमव्यवस्थायां तस्य प्रियतमं स्थितम् ।
सनातनस्य धर्मस्य तस्यादर्शत्वमाश्रयन् ॥ ११ ॥

तदीयवदनाम्भोजादादर्शब्रह्मजन्मनाम् ।
तथैव च तपस्याया व्याख्यानानि चकाशिरे ॥ १२ ॥

तानि संश्रृण्वतामासीत्प्रभावः परमाद्भुतः ।
विदुषस्तस्य समभूद्वस्त्रं शुभ्रं विशुद्धिभृत् ॥ १३ ॥

स्थूलं रूक्षं तथा जानुदघ्नं कट्यम्बरोत्तमम् ।
स्वच्छं तथैवोत्तरीयं दन्ताः केशास्तथासिताः ॥ १४ ॥

सर्वं चेदं सात्त्विकश्रि, सुन्दरं, दर्शनप्रियः ।
दिने दिने च प्रत्यूषे मुहर्ते ब्रह्मणः कविः ॥ १५ ॥

गत्वा सुदूरं शौचादिक्रियां निर्वर्त्य नित्यशः ।
वगाह्य गङ्गां विधिवत्तत्र सूर्योदयावधि ॥ १६ ॥

उपास्यवृहतीं सन्ध्यामर्घ्यं दत्त्वांशुमालिनम् ।
नानोपस्थानसम्मन्त्रैरुपस्थायसमाहितः ॥ १७ ॥

तत्रैकान्तेसुरनदीतटे भास्करसम्मुखः ।
उटजे समुपाविश्य दीर्घकालं समाधिना ॥ १८ ॥

गायत्रीमजपन्नित्यं दिव्यं ब्रह्म सनातनम् ।
तमालोक्य हठाच्छ्लोकःस्मृतिमायाति सत्वरम् ॥ १९ ॥

ऋषयो दीर्घसन्ध्यत्वाद्दीर्घमायुरवाप्नुवन् ।
तत्संन्दर्शनमात्रेणोपदेशाद्यनपेक्षया ॥ २० ॥

सहस्रं व्यक्तयोऽभूवन् सदाचारपरायणाः ।
समये चोपदेशस्य सविनोदं प्रसादयन् ॥ २१ ॥

सरसैः सरलैः शब्दैः पाठ्यामास वर्णिनः ।
ब्रह्मचर्यं वेदशास्त्रं वेदाङ्गानि जपादिकम् ॥ २२ ॥

सच्चारित्र्यं दर्शनानि शिक्षयामास पूर्णतः ।
अनायासं मनस्येषामवातीतरदद्भुतम् ॥ २३ ॥

महात्मानः परिचिता विद्वांसः सर्व एव च ।
आद्रियन्ते तपोमूर्तिं माननीयं यशस्विनम् ॥ २४ ॥

सद्गृहस्था वीतरागा : सम्मान्या ब्रह्मचारिणः ।
प्रतिष्ठिताश्च विद्वांसस्तस्मिन् श्रद्दधिरे भृशम् ॥ २५ ॥

तत्सन्निधानमापाद्य मन्यन्ते स्वान् कृतार्थिनः ।
भाग्यमुद्घाटितं मत्वा मेनिरे पुण्यसञ्चयम् ॥ २६ ॥

पूज्यवर्या माननीयाः परमा गुरवो मम ।
विश्वेश्वराश्रमा लोके ख्याताः श्रीविदुषां वराः ॥ २७ ॥

नानानवद्यविद्याभिर्द्योतमानाः शुकादिवत् ।
आन्वीक्षिक्यां नूतनायां प्रत्नायां पारदर्शिनः ॥ २८ ॥

मीमांसायां मर्मविदो वेदान्तानां महर्द्धयः ।
दुर्भेदग्रन्थिभेत्तारः सिद्धिखण्डनदुर्गयोः ॥ २९ ॥

महाराजश्रियःशान्ताः पूर्वं दृष्टिपथं गताः ।
अन्योऽन्यं मानयन्तिस्म सममन्योऽन्यदर्शिनः ॥ ३० ॥

तावुभौशान्तसङ्कल्पौ शास्त्रचर्चां मनोहराम् ।
विदधानौ घनानन्दप्रवाहरसपेशलौ ॥ ३१ ॥

शृण्वतो जनजातस्यापुष्यतां परमां मुदम् ।
आस्वादे मज्जयन्तौ हि ददतुः शान्तिमुत्तमाम् ॥ ३२ ॥

महतां विदुषां तत्र व्यवर्धत समागमः ।
समाध्यर्थं च शङ्कानां पठनार्थं समादरात् ॥ ३३ ॥

श्रीस्वामिपादाः सन्तोषामृतदानं व्यधुर्मुदा ।
तदानीमाश्रमः सोऽयं प्राक्तनान् दीव्यतः शुभान् ॥ ३४ ॥

ऋषीणां पुरतश्चक्रे चर्च्यमानाश्रमोत्तमान् ।
कदाचिदुत्कलः पूर्णानन्दतीर्थसमाह्वयः ॥ ३५ ॥

ख्यात्या श्रिया शान्तिमय्या सुसम्पन्न उदारधीः ।
तदाश्रमे श्रीचरणैर्गुरुभिः समगच्छत ॥ ३६ ॥

प्राय आगत्य तत्रैव विविक्त उटजोत्तमे ।
निवसन्तिस्म सत्सङ्गघनानन्दपरीप्सया ॥ ३७ ॥

गोमयेनोपसंलिप्ते स्थण्डिले संन्यविक्षत ।
सोऽपि पण्डितवर्येऽस्मिन् बद्धप्रेमाभवद् भृशम् ॥ ३८ ॥

प्रशान्तवातावरणे कमनीये तदाश्रमे ।
तयोः सत्सङ्गमः श्रीमान् मधुरः समपद्यत ॥ ३९ ॥

एवं हि निर्मलानन्दो वङ्गस्वामी महोदयः ।
लम्बेनारायणमुखा महात्मानः समागमन् ॥ ४० ॥

दवीयसां नागराणां गृहस्थानां महात्मनाम् ।
उपदेशैः पण्डितश्रीजन्यर्लाभो महानभूत् ॥ ४१ ॥

अलीगढ़ो हाथरस आगरा देहली तथा ।
खुरजा च बुलन्दाह्वनगरं मयराष्ट्रकम् ॥ ४२ ॥

बरौली च तथा कर्णपुरप्रभृतयः पुरः ।
तद्वासिनः सर्व एव भक्ता आसन् मनीषिणः ॥ ४३ ॥

आश्रमे वसतां तत्र वर्णिनामग्रजन्मनाम् ।
शताधिकानां छात्राणां भाण्डागारं व्यमुच्यत ॥ ४४ ॥

स्वेच्छया जगृहुः सर्वे मुक्तद्वारमभूत्सदा ।
नियन्ता नाभवत् कश्चित् स्वेच्छया यदपेक्षितम् ॥ ४५ ॥

अगृह्णंस्तावदखिलं सर्वे आश्रमवासिनः ।
ऋद्धयः सिद्धयः सर्वाः समभूवन् मनीषिणः ॥ ४६ ॥

तथापि जातु नैवासीद्विदुषो गमनं क्वचित् ।
पत्रमात्रं तु निष्पत्त्यै सर्वेषां समजायत ॥ ४७ ॥

गङ्गातटेऽथवा विल्वमूले परमपावने ।
गायत्रीं प्रजपन् तस्थौ सर्वसिद्धमनोरथः ॥ ४८ ॥

अन्नवस्त्रादिकं सर्वं समाहार्षुः समन्ततः ।
समाकृष्टाः स्वयं सर्वे पुण्यात्मानो यतस्ततः ॥ ४९ ॥

व्यचीचरत्सदा वेदान् रामायणमतन्द्रितः ।
महाभारतमव्यग्रो मनुस्मृतिमथापि च ॥ ५० ॥

तत्पाठनं तत्पठनमन्योन्यं तत्प्रबोधनम् ।
सम्पादयन् समैरेतैरैषीद्वेदोपबृंहणम् ॥ ५१ ॥

विधातार्यसमाजस्य दयानन्द इति श्रुतः ।
सहयुग्वाभीमसेनशर्मा पण्डितमण्डितः ॥ ५२ ॥

इटावाभिजनोभूत्वा समाजं चान्ततोऽत्यजत् ।
शुद्धः सनातनी तस्थौ प्रभावेण समन्वितः ॥ ५३ ॥

आरम्भे तस्य संस्कारो न्यपतत्पण्डितोपरि ।
स वैदुष्येण भूष्येण समालोचनमाचरत् ॥ ५४ ॥

मतान्तराणां सर्वेषां कटुतां तु न्यवारयत् ।
विद्वत्ता स्फुटिता तत्र श्रौतयोर्धर्मकर्मणोः ॥ ५५ ॥

निष्ठा पूर्णा भासमाना स्थिता वै वरवर्णिनि ।
योग्यविद्याव्रतस्नातान् सुधियो धर्मतत्परान् ॥ ५६ ॥

निरमास्त ससंरम्भं संलग्नः संयतेन्द्रियः ।
श्रौते स्मार्ते विधौ तावत्प्रियता समवर्धत ॥ ५७ ॥

आहिताग्निषु तस्याभूदनुरागगभीरता ।
हृषीकेशबुधः श्रीमानाहिताग्निः समादृतः ॥ ५८ ॥

श्रीमान् बालकरामश्च प्रेरणामित आभजत् ।
शुभाशिषः समाकाँक्षीच्छ्रेयसा केन तृप्यते ॥ ५९ ॥

प्रभासस्थः प्रसिद्धः श्रीकरुणाशङ्करः सुधीः ।
वैदिकः कर्मकाण्डी च तस्य मित्रमजायत ॥ ६० ॥

अधिष्ठायाश्रमं धीरो वेदान्ताध्ययनं व्यधात् ।
विश्वेश्वरस्वामिपादाद्विद्वद्वर्गशिरोमणेः ॥ ६१ ॥

अन्ते च तेभ्य एवायं संन्यासं शमिकोऽग्रहीत् ।
हृषीकेशे हरिद्वारे स्थित्वा बहुसमा यतिः ॥ ६२ ॥

सम्प्रत्येव ब्रह्मभावं शुकस्थाने समाश्रयत् ।
श्रीमज्जीवनदत्तस्य पण्डितस्य कृपावशात् ॥ ६३ ॥

अद्यापि श्रौतधर्मस्य प्रोत्साहः सम्प्रवर्तते ।
श्रीमद्भारतराष्ट्रस्य प्रिया तस्य स्वतन्त्रता ॥ ६४ ॥

आन्दोलनं तदर्थं च प्रियमासीन्महात्मनः ।
परन्तु नेतृणां धर्मोल्लङ्घनार्थाः प्रवृत्तयः ॥ ६५ ॥

उद्वेगधायिका आसन् धार्मिकस्य मनीषिणः ।
भीष्मस्य विदुरस्याथ राजनीतिरभूत्प्रिया ॥ ६६ ॥

श्रीकृष्णस्य भगवतो विचारा दर्शनानुगाः ।
राजनीतिमयाश्चासन्नत्यन्तं प्रियतास्पदम् ॥ ६७ ॥

मग्नीरामः काशिकास्थः सिद्धो वर्णिवरोऽभवत् ।
तद्दर्शनप्रभावेण भावितः पण्डितोत्तमः ॥ ६८ ॥

कथासत्सङ्गयोस्तस्य भूयश्चर्या व्यजृम्भयत् ।
अध्यैष्यहं परेभ्यस्तु विद्वद्भ्यो यद्यपि स्थिरः ॥ ६९ ॥

विश्वेश्वरस्वामिपादात्तथाप्यस्य समागमात् ।
सत्सङ्गाच्चैव भूयांसं लाभं सम्प्राप्तवानहम् ॥ ७० ॥

अकृत्रिमा तस्य चर्या निष्ठा सरलता तथा ।
पुरस्तान्मे सदाभाति शुचिः संशान्तिभूषणा ॥ ७१ ॥

ज्वालापुरमहाविद्यालयस्थः पण्डिताग्रणीः ।
प्रशंसकेषुतस्याभूत् नरदेवविदुत्तमः ॥ ७२ ॥

महाविद्वानपि भवन् शास्त्रचर्यारतः सदा ।
एकदा वर्णिवर्योऽसौ मत्तश्चार्वाक-दर्शनम् ॥ ७३ ॥

उपक्रम्य प्रसिद्धान्यप्रसिद्धानि च संयतः ।
दर्शनानि गभीराणि श्रुतवान् सविवेचनम् ॥ ७४ ॥

अन्यदा च महात्मासौ प्रथमस्कन्धतः कथा ।
यावच्चतुर्थं श्रुतवान् श्रीमद्भागवतीर्मम ॥ ७५ ॥

देहल्यां धर्मसङ्घस्य भारतीयस्य याज्ञिके ।
समारम्भे शतमुखे होमे याज्ञिकसत्तमः ॥ ७६ ॥

याजमान्यं स्वयं पूर्वं व्यधत्तायं महामनाः ।
मुम्बय्यां लक्षचण्डीयेऽनुष्ठानेऽपि शुचिव्रतः ॥ ७७ ॥

यजमानोऽभवच्चान्येष्वपि कर्मसु शाश्वतः ।
प्रेरकश्चाभवन्नित्यं शुभकर्मसु सर्वदा ॥ ७८ ॥

श्राद्धकर्मसु चान्येषु ब्राह्मणानां विशेषतः ।
अरोचयद्भोजनानि विविधानि विधानतः ॥ ७९ ॥

पूर्वाश्रमे वर्तमानं मां न्यमन्त्रयतात्मवान् ।
नेदिष्ठोऽहं तदासर्वं पूर्णतोऽन्वभवं रसात् ॥ ८० ॥

वरिवस्या महेशस्य चरणाम्बुजयोर्गुरोः ।
समर्पिता ततो मे स्युरपराधाः क्षमावृताः ॥ ८१ ॥

श्रद्धाञ्जलिः

(श्री शंकराचार्य श्री स्वामी महेश्वरानन्द सरस्वती महाराज)

माद्यन्मोहघटाटवीविघटनप्रोद्दामदावानलो
दृप्यद्दर्पकवर्गसर्गरचनाचातुर्यविद्रावणः ।
उद्वेलत्कलिकालगालदलनप्रोल्लासदीक्षाव्रतः
श्रीश्रीजीवनदत्तवर्णिनिपुणो वर्ण्यग्रणीर्गण्यते ॥ १ ॥

पुण्यारण्यविहारहारिहरिणाः सारल्यलग्नां श्रियम्
बिभ्राणा निजशृङ्गसङ्गघटनाकण्डूतिसम्पण्डिताः ।
चञ्चच्चर्मवृसीप्रदानसुकृतारम्भैः ऋषीणां मुदा
तद्धर्माश्रमवासिनः समभवन् किंचापरे योगिनः ॥ २ ॥

वेदा येन समस्तवैभवभृतः सार्थाः सतात्पर्यतः
स्वभ्यासेन वशीकृताविकृतयः कण्ठे कृताः सक्रमाः ।
होत्रं दर्शमुखा मखाश्च विधिना सम्पादिताः सादरम्
सोयं कीर्तिकुमुद्वतीवलयितः शश्वत्प्रशंसास्पदम् ॥ ३ ॥

गङ्गातुङ्गतरङ्गशीतलमरुत्संवीज्यमानाश्रमे
लोलद्वल्लिमतल्लिशालसरले माधुर्यधुर्ये वरे ।
गीर्वाणैरधिषेविते नरवरे चञ्चच्चरित्राञ्चिते
शास्त्राम्नायमहाध्वनिर्न विरमत्येकान्ततोऽहर्निशम् ॥ ४ ॥

यद्गीर्वाणनदीप्रवाहतरला वीचीचया गुञ्जिता
वेदान्तान् समपीपठन् सहजया मीमांसया सम्भृतान् ।
गौतम्या समलङ्कृतान् विशकलीकृत्यप्रभाभास्वरान्
सम्प्रोद्यत्प्रतिभाप्रभावभरितान् धर्माश्रयं तं स्तुमः ॥ ५ ॥

यत्रान्तेवसतां सतां विनयिनां पारं गतानां परम्
शास्त्राणां महतां महोदधिदृशां संख्येयतां लङ्घताम् ।
श्रीमद्भारतभव्यभूमिवलये प्राध्यापनं कुर्वताम्
गीयन्ते वितता मनोहरतरा लोकैर्लसत्कीर्तयः ॥ ६ ॥

स्वेच्छोपात्तसुरालयं न गणयाञ्चक्रे विरक्ताग्रणीः
सत्यं लोकमभीष्टमप्यतितरां नारोचयच्छाश्वतम् ।
माकिः सत्यमिदं समं श्रुतिरवैदम्पर्यनिष्ठाश्रितम्
ब्रह्मैवैकमृतं विचिन्त्य तदभूच्छ्रीब्रह्मचारीस्तुतः ॥ ७ ॥

आर्यः सत्यधुरन्धरः श्रुतिरतः पुण्यात्मनां मानितः
तप्तो घोरतपोभिरर्चिततमः पुण्योपवासप्रियः ।
दान्तः कारुणिकः प्रतापतपनो वैश्वानराराधनः
श्रीमज्जीवनदत्तवर्णितगुणः कीर्त्यात्मना भ्राजते ॥ ८ ॥

वैराग्योत्तरसंयमैरपि परित्यक्तार्थसार्थैरपि
षट्सम्पत्तिभराप्लुतैरपिसदा ब्रह्मैकनिष्ठैरपि ।
यच्छायोपरतैरधीतिकृतिभिर्गङ्गाजलस्नायिभिः
शान्तिःपूर्णमवापि तत्पदमिदं भूयः स्मृतिं गच्छति ॥ ९ ॥

भाव-कुसुमाञ्जलिः

(दण्डी स्वामी श्रीसुखबोधाश्रमजी महाराज)

वाग्देवते ! भव विलासवती चरित्रम्
चित्रं त्वया भवति सम्प्रति वर्णनीयम् ।
सर्वोपकारपरनैष्ठिकवर्णिवर्ग-
मूर्धन्यधन्यजनिजीवनदत्तनाम्नः ॥ १ ॥

हे सरस्वति ! अब आप प्राणिमात्र के उपकारक-नैष्ठिक ब्रह्मचारियों के मूर्धन्य, धन्यजीवन श्रीजीवनदत्त शर्मा के विचित्र चरित्र का वर्णन करने के लिए सजधज कर तय्यार हों । १ ॥

यस्य स्मृतिः परममङ्गलमाशु सूते,
धुन्वन्ति पापपटलं गुणगायनानि ।
शेफालिकाकुसुमकुङ्कुममालिकेव
यत्कीर्तिरद्य सुरभीकुरुते दिगन्तान् ॥ २ ॥

जिनकी स्मृति मङ्गलमयी है, जिनका गुणगान पाप-पुञ्जों को कम्पित करने वाला है, केसर मिश्रित हारश्रृङ्गार के फूलों की माला के समान जिनकी कीर्ति दिशाओं के ओर-छोर को अपनी भीनी सुगन्ध से भर रही है । २ ॥

स्यान्नाम तत्रभवती गुणगौरवेण,
शक्नोति साहसवती न निबन्धुमेनम् ।
किं श्रूयते न ? वसुदेवसुतं यशोदा
दामोदरं कृतवती न परिश्रमेण ॥ ३ ॥

यह सम्भव है कि आप गुणों (वर्णन करने की योग्यता रस्सियों) के बलपर इन्हें अपने निबन्ध-रचना बन्धन में न ला सकें, क्या नहीं सुना ? कि श्रीयशोदाजी श्रीकृष्ण को बिना परिश्रम से बाँध सकी थीं । ३ ॥

लज्जावशेन हृदयेन निजप्रशस्तीः,
श्रोतुं कदापि नहि वर्णिवरोऽयमैच्छत् ।
तत् केवलं स सदयं हृदयं विधाय,
भूयान्निबन्धमुपलब्धुमहो ? महेच्छः ॥ ४ ॥

यद्यपि संकोच का अनुभव होने से वह कभी भी अपनी प्रशंसा सुनना नहीं चाहते थे, किन्तु प्रार्थना है कि महामना होने के कारण दयावश इस निबन्ध रचना सुनने के बन्धन को स्वीकार करें । ४ ॥

एकोनविंशतिशतोत्तर ईशवीये
त्रिंशत्तमे सदुदयः शुभवत्सरेऽहम् ।
यद् दर्शनेन सुकृतैः समुपार्जितेन,
सौभाग्यभाजनमभूवमदृष्टदृष्ट्या ॥ ५ ॥

सन् १९३० मेरे भाग्योदय का समय था जब अपने पूर्वोपार्जित पुण्यों से मुझे श्रीमहाराज जी के दर्शनों का सौभाग्य प्राप्त हुआ । ५ ॥

दिष्ट्या ? सुधीर्ममदृशोरतिथिः स माया-
दत्तानुजोऽभवदहो ? किमु वर्णयामि ।
प्रासङ्गिकेन विधिनाऽखिलमेव पद्मा-
दत्तो न्यवेदयत नारवरं सुवृत्तम् ॥ ६ ॥

उस समय के लिए बधाई है कि जब श्रीपण्डित मायादत्तजी पर्वतीय के छोटे भाई श्रीपद्मादत्तजी मिले और उन्होंने प्रसङ्गोपात नरवर श्रीसाङ्गवेदमहाविद्यालय का शुभ वृत्तान्त मुझे सुनाया । ६ ॥

भागीरथीपरिसरादुपरिस्थलेषु
श्रीमानदृश्यतकुटीरकृताधिवासः ।
पीयूषवर्षिणि दृशोर्विषये तदीये
स्नातं मया सफलतासुखसिन्धुभूयम् ॥ ७ ॥

श्रीगङ्गाजी के मैदान के ऊपरी हिस्से में अपनी कुटिया के अन्दर सुशोभित श्रीमहाराज जी का प्रथम बार मैंने दर्शन किया और अमृत बरसाने वाले उनके नेत्रों की सञ्चार–स्थली में स्नान करके अपने आपको सफलता सुख का समुद्र समझा । ७ ॥

आस्वाद्य तन्मुखसरोरुहनाभिनाला-
दभ्युत्थितां मधुझरीं सुखमन्वभूवम् ।
न्यश्च्योति चन्दनरसः श्रवणे सरिद्वा
प्रावर्ततामृतमयीत्यभवद्वितर्कः ॥ ८ ॥

उनके मुखकमल के नाभिनाल (शब्द की पश्यन्ती अवस्था के स्थान) से उत्पन्न हुई मिठास की वर्षा को चाखकर बड़ा ही सुख हुआ और ऐसा प्रतीत हुआ कि कानों में चन्दन का रस निचोड़ा गया है, अथवा अमृत की नदी ही कानों में वह रही है । ८ ॥

दृष्टा बहुत्र विविधाः श्रुतकीर्तयोऽपि-
स्वाध्यायसंयमतपःपरिपूतदेहाः ।
सन्तः परन्तु नहि कुत्रचिदीदृशीं ता–
माकर्षणीं वशकरीं सुषमामपश्यम् ॥ ९ ॥

अब तक मैंने बड़ी-बड़ी प्रशंसाओं के पात्र स्वाध्याय, संयम और तपस्या से पवित्र शरीरवाले अनेक महात्माओं का दर्शन किया, किन्तु इनकी जैसी मन को खींचकर वशमें करनेवाली शोभा कहीं नहीं देखी । ९ ॥

कर्पूरगौरमतिसुन्दरमञ्चितभ्रु
भस्माङ्कितं वपुरविस्मरणीयशोभम् ।
तत्र श्रियं नयनतृप्तिकरीमपुष्यत्
स श्वेतिमा च दशनेषु शिरोरुहेषु ॥ १० ॥

मोती सी चमकती हुई दन्तपंक्ति और शिरपर चमचमाते हुए श्वेतवर्ण के केश जिनकी शोभा में चार चांद लगा रहे थे ऐसे इनके धनुषाकार भौंहों और भस्म से विभूषित कपूर के समान अत्यन्त गौर-वर्ण सुन्दर सुडौल शरीर को कैसे भुलाया जा सकता है। १० ॥

यज्ञोपवीतमतिशुभ्रमुदग्ररश्मि,
स्कन्धावलम्बितमभूदुपमादरिद्रम् ।
स्वच्छं च तद्वसनयुग्ममलङ्करिष्णु
प्राकर्षयच्छविममुष्य सुशीलमूर्त्तेः ॥ ११ ॥

कन्धे पर लटके हुए अति स्वच्छ यज्ञोपवीत की चमक को उपमा नहीं मिल रही थी। नीचे और ऊपर के दोनों उजले वस्त्र विनम्रता-सुशीलता से मुखरित इस मधुर मूर्ति को और भी अलंकृत कर रहे थे। ११ ॥

किं भूयसाऽवयवशः शुभलक्षणानि,
शारीरिकाण्यकथयँश्चरितानि तानि ।
हृद्यानि यानि वयमद्य भृशं स्मरामः,
सङ्कीर्त्य कर्हिचन धन्यतमा भवामः ॥ १२ ॥

अधिक क्या कहें ? शुभ लक्षणों से युक्त शरीर का प्रत्येक अवयव ही उनके पवित्र चरित्रों का एक सूची-पत्र था। अब हम सब उन चरित्रों को याद करते रहते हैं और प्रसङ्गवश कभी उनका कथना करके भी धन्य होते हैं। १२ ॥

सोढुं न यद्यपि तदीयवियोगदुःखं
शक्यं कथञ्चन तथापि किमत्र कुर्मः ।
सोढव्यमेव विधिना यदलेखि तस्मा —
दायान्तु तद्गुणगणं परिशीलयामः ॥ १३ ॥

यद्यपि उनका वियोग-दुःख किसी भी प्रकार सहन नहीं हो रहा है, फिर भी क्या करें ? विधाता का लेख सहन ही करना है। इसलिए आओ, अब सब मिलकर उनके गुणों का कुछ चिन्तन करें। १३ ॥

चीर्णं तपोऽत्रभवता कियतादरेण —
त्येतत्स्फुटं नवनिधिः समबूबुधन्नः ।
तानि व्रतानि कठिनानि महत्तपस्तत् —
तत्सौमनस्यमपिचेत्यवदत्स सर्वम् ॥ १४ ॥

नरवर-विद्यालय के इस स्थान पर अपने निवास के प्रारम्भ के दिनों में इन्होंने जैसी कठिन तपस्यायें की और फिर भी जिसप्रकार मुखकमल खिला ही रहता था, उस सबके प्रत्यक्षदर्शी श्री पं० नवनिधिजी सुनाया करते थे। १४ ॥

पापापहारिणि सुरासुरगीतकीर्त्तौ,
गङ्गातटे प्रकृतिदत्तमहिम्नि तावत् ।
गीर्वाणगीरसिकसज्जनसेव्यमानो —
विद्यालयः प्रथमतोऽस्य निरीक्षणीयः ॥ १५ ॥

देवता, दैत्य आदि सभी से प्रशंसनीय प्राकृतिक शोभा-सम्पन्न, पापों को काटनेवाली श्रीगङ्गा माता के तट पर संस्कृत-वाणी के प्रेमियों से सुसेवित इनका विद्यालय सर्वप्रथम देखने योग्य है । १५ ॥

रत्नाकरोऽयमुदितो द्युसदां स्पृहायै,
संस्मारयन् मुनिजनोचितवासतेयीः ।
रत्नानि यानि बिलसन्ति विलक्षणानि,
संक्षेपतोऽहमिह संकलयामि तानि ॥ १६ ॥

वनों में रहनेवाले ऋषि-मुनियों के पुराने आश्रमों की याद दिलानेवाला यह विद्यालय देवताओं को उत्कण्ठित करने के लिए एक रत्नाकर ही उदय हुआ है । इसमें से जो विलक्षण रत्न प्रकट हुए हैं, उन्ही का मैं संक्षेप में सङ्कलन करता हूँ । १६ ॥

एकोनविंशतिशताधिकषष्टिपूर्त्तौ
श्रीमत्यनल्पगुणशालिनिवैक्रमेऽब्दे ।
केनापिपुण्यनिवहेन महीसुराणां
प्राप्तोऽयमत्र विजने महतीं प्रतिष्ठाम् ॥ १७ ॥

शुभ गुणों से युक्त विक्रम-संवत् १९६० में ब्राह्मणों के किसी विशेष पुण्य-फल के रूप में इस एकान्त स्थान में यह विद्यालय प्रतिष्ठित हुआ । १७ ॥

दैवादिहैव वरणीयवरिम्णि वर्षे,
जन्मालभन्त सुधियो विजयप्रकाशाः ।
येषां प्रधानपदमाप्तवतां पवित्र —
माचार्यकं विजयतेऽद्य भुवीदमीयम् ॥ १८ ॥

दैवगति से इसी शुभ सम्वत् में जिला बुलन्दशहर के 'परवाना' ग्राम में श्री पं० विजयप्रकाशजी के रूप में एक विद्या का स्रोत प्रकट हुआ । इन दिनों जिसके कारण इस विद्यालय का प्रधानाचार्य पद अपनी अद्भुत छटा से जगमगा रहा है । १८ ॥

द्वित्रा इतोऽपि पुरतः पदमध्यतिष्ठन्
नेतन्न तद्धुरसहा अभवन् परन्तु ।
संयोग एष रचितो विधिनैव योग्यो,
नारायणं वहतु को गरुडं विनान्यः ॥ १९ ॥

इनके पूर्व दो-तीन महानुभाव इस पद पर प्रतिष्ठित हुए, किन्तु इस भार को वहन करने में समर्थ नहीं हुए। इनके साथ इस विद्यालय का वैध सम्बन्ध है; गरुडजी के अतिरिक्त नारायण को उठाकर लेचलने की सामर्थ्य किसमें है ? । १९ ॥

यच्छेमुषीमुकुरभित्तितलेष्वकस्माच् —
छास्त्राणि सर्वविषयाणि परिस्फुरन्ति ।
यच्छात्रसम्पदधिभारतमुल्लसन्ती,
धत्ते पदं शिरसि कस्य न वेदशत्रोः ॥ २० ॥

उज्ज्वल आदर्श के समान इनकी निर्मल बुद्धि में सभी शास्त्र अपने आप प्रतिविम्बित होते रहे हैं। भारत में चमकती हुई इनकी छात्र-सम्पत्ति वेदों के अर्थों में उलट-पलट करनेवाले किन वेदशत्रुओं के शिरों पर पैर नहीं रखती। २० ॥

सत्यव्रतेन गणमुक्तिपदस्थितेने —
न्द्रप्रस्थपण्डितसभे शतकोटियज्ञे।
दृप्तस्य कस्य शततर्कधुरन्धरस्य —
नाम्लीकृता दशनपंक्त्य आदरेण ॥ २१ ॥

दिल्ली में शतकोटि-महायज्ञ के अवसर पर सम्पन्न होनेवाली पण्डित-सभा में भागीरथी संस्कृत महाविद्यालय गढमुक्तेश्वर जि० मेरठ के प्रधानाचार्य, इन्हीं के शिष्य पं० सत्यव्रतजी ने किन घमण्डी तार्किकों के दांतों को आदरपूर्वक खट्टा नहीं कर दिया। २० ॥

आकारितः सदसि शास्त्रविचारणायै,
स्थानीयवैदिक मतब्रुववावदूकैः।
यत्तच्छिरःस्वयमनृत्यदुपात्ततालम्,
तद्विस्मरिष्यति किमार्यसमाज एनम् ॥ २२ ॥

गढ़मुक्तेश्वर में वैदिक धर्मावलम्वी होने की डींग-हाकने वालों ने जब इन्हें शास्त्रार्थ के लिए बुलाया और इन्होंने उनके शिरों पर तालियाँ बजाते हुए ठुमकियाँ लगाई, क्या वहाँ का आर्य-समाज इन्हें भूल जायेगा। २२ ॥

सा वैदुषी परिचितैव तथैव 'वांके —
लालस्य' सर्वविदितस्य सभामुखेषु।
यद्भाषणं समुचितो ननु शृण्वतः स्याद्
द्राक्षास्वनादर इमासु सितासु रोषः ॥ २३ ॥

इन्हींके दूसरे शिष्य श्री पं० बांकेलाल जी हैं। सम्पूर्ण भारत की विद्वन्मण्डली इनकी विद्वत्ता का लोहा मानती है। प्रमुख सभाओं में इनका मधुर भाषण सुननेवाला मुनक्का का अनादर करता है और मिश्री पर रोष प्रकट करता है, यह बहुत ही उचित है। २३ ॥

गम्भीरभावगहनाभिरुदात्तशैली —
लालित्यसंवलितकोमलकोमलाभिः।
स्थानोचिताभिरपि कर्कशकर्कशाभिः
यद्गर्जनाभिरभितो रिपवः प्लवन्ते ॥ २४ ॥

अर्थगाम्भीर्य और पदलालित्य से परिपूर्ण देशकालोचित कोमल और कर्कश इनकी वाणी के अनोखे ढंग देखकर विरोधियों के पैर उखड़ जाते हैं। २४ ॥

ईदृग्विधैर्बहुभिरादरणीयविद्यैः
पारेसहस्रमधिकाधिकलब्धवर्णैः।
शिष्यैर्यदीयचरणाम्बुरुहद्विरेफै-
र्देवादृता भरतभूमिरलंकृतेयम् ॥ २५ ॥

इस प्रकार और भी प्रतिष्ठाप्राप्त हजारों शिष्य इनके चरणारविन्दों के भ्रमर हैं। संसार में उनकी विद्या का आदर होता है और देवपूजित यह भारत-भूमि उनसे विभूषित है। २५॥

न स्याद्गुरुर्मम निबन्ध इतीह नाम —
ग्राहं न यन्निखिलकोविदकीर्तिरुक्ता।
ज्येष्ठानुपूर्व्यमुपलक्ष्यकनिष्ठपंक्ति —
राशास्यते परमहर्षमुपैष्यतीति ॥ २६ ॥

निबन्ध के बड़े होजाने के डरसे मैं उन सब विद्वानों का नाम ले-लेकर वर्णन करने में असमर्थ हूं। आशा है क्रम को लक्ष्य में रखकर अग्रजों का नाम-निर्देश होजाने से अनुजों को हर्ष की प्राप्ति होगी। २६॥

देवर्षिपित्रतिथिभूतगणोपकारि —
गार्हस्थ्यमाश्रितवतामियमीरिता दिक्।
शृण्वन्तु तुर्यमधुनाश्रममाश्रितानां —
नामानि नारवरसत्खनिहीरकाणाम्॥ २७॥

यहाँ तक नरवर की खान श्री विजयप्रकाशजी से निकलने वाले देवता, ऋषि, पितर, अतिथि और प्राणिमात्रका उपकार करनेवाले गृहाश्रमी रत्नों का वर्णन हुआ। अब इस खान से प्रकट होने वाले चतुर्थाश्रमी रत्नों के नाम सुनिये। २७॥

षड्दर्शनीनिहिततत्पदपारदृश्वा,
विश्वेश्वराश्रमयतिर्विबुधैकवन्द्यः।
व्याख्यानपद्धतिसहस्रकरैश्चकासद् —
विद्यार्थिवर्गहृदयाम्बुजसूर्य आसीत्॥ २८॥

सम्पूर्ण विद्वानों के वन्दनीय, षड् दर्शनों के तत्ववेत्ता श्रीस्वामी विश्वेश्वराश्रमजी महाराज ही इन चतुर्थाश्रमी रत्नों की उत्पत्ति के मूल थे। यह सहस्रों प्रकार से की जानेवाली शास्त्रों की व्याख्या-किरणों से विद्यार्थियों के हृदय-कमल को खिलानेवाले सूर्य थे। २८॥

नैयायिकस्य हरदत्त इतीरितस्य,
पञ्चाम्बुकामृतसरोवसतेर्बुधस्य।
धीरोगमेष दययैव यथापनिन्ये —
सर्वत्र पण्डितसदस्सु तथा प्रसिद्धम्॥ २९॥

अमृतसर पञ्जाब के रहने वाले नैयायिक-शिरोमणि पं० हरदत्तजी पर दया करके उनकी बुद्धि के विद्याभिमान रोग की जिसप्रकार इन्होंने चिकित्सा की थी, वह सभी विद्वानों के समुदाय में प्रसिद्ध है। २९॥

तच्छिष्यतामुपगतो भवदुःखभीतो —
वैराग्यरागरसिकावलिमौलिरत्नम्।
श्रीमान् महामहिमशालिगुणाभिरामः
श्रीविष्णुदत्त इति यः प्रथितः पृथिव्याम्॥ ३०॥

परमवैराग्यवान् पुरुषों के श्रेणी के शिरोरत्न, महात्माओं के सम्पूर्ण लक्षणों से परिपूर्ण श्रीविष्णुदत्त जी महाराज संसार से उद्विग्न होकर इनकी शरण में आये और इनके शिष्य बने। ३०॥

विद्वान् विवर्जितसमस्तमृषाप्रपञ्चो-
मार्गेऽग्रणीः परमहंसशिरोमणीनाम् ।
आशाम्बरः स्वसुखवाञ्छितषट्सपत्नः
तत्त्वैकधीर्न्यवसदुत्तरकाशिकायाम् ॥ ३१ ॥

इन्होंने काम, क्रोध, लोभ, मोह, मद और मात्सर्य इन छः शत्रुओं पर विजय प्राप्त की थी। मिथ्याप्रपञ्चका इस प्रकार परित्याग किया था कि इनकी कुटिया में इनके शरीर के अतिरिक्त कुछ न था और शरीर पर कौपीन भी न थी। यह उत्तरकाशी में रहते थे, तत्वनिष्ठ थे और परमहंसों के मार्गदर्शक थे। ३१ ॥

अन्योऽपिचास्य करपात्र इति प्रसिद्धः
शिष्यःप्रशस्तगुणपात्रमयं स एकः ।
यत्सूक्तयोद्रुतविलम्बितगीतिसौख्य —
सम्पादनेऽमृतरसोज्ज्वलनिर्झरिण्यः ॥ ३२ ॥

प्रशंसायोग्य सभी गुणों के एकमात्र पात्र श्रीकरपात्रीजी महाराज भी इन्हीं के प्रिय शिष्य हैं। इनकी अद्वितीय योग्यता विश्वविख्यात है, इनकी सूक्तियाँ द्रुतविलम्बित छन्द के गायन का सुख देने में अमृतरस के प्रवाह की नदियाँ हैं । ३२ ॥

शास्त्रेष्वगाधधिषणस्य च राजनीतौ,
कोऽद्यास्य यः प्रतिभटो भवितुं समर्थः ।
मत्ताः स्वतन्त्रगतयोऽपि गजा अकस्मात् —
श्रुत्वा स्खलन्ति खलु केसरिणो निनादम् ॥ ३३ ॥

अन्य शास्त्रोंके समान राजनीति में भी इनकी प्रतिभा अव्याहतगति है। इनका विरोधी इस प्रकार इनसे डरता है,जैसे अंधाधुंध चाल से चले आरहे मदोन्मत्त हाथी शेर की दहाड़ सुनते ही लड़खड़ा जाते हैं। ३३ ॥

सोमाश्रमोऽप्यभवदस्य च शिष्य एको
दक्षः क्रियासु सकलास्वपि वैदिकीषु ।
तन्त्रान्तरेषु कवितासु च तेषु तेषु,
स्वातन्त्र्यमस्य विषयेषु विशालबुद्धेः ॥ ३४ ॥

प्रभासभिक्षु नाम से प्रसिद्ध श्रीसोमाश्रमजी महाराज भी इनके शिष्य थे। यह दाक्षिणात्य थे और वैदिक तथा तान्त्रिक कर्मकाण्ड में पूर्ण कुशल थे। अन्य शास्त्रों के समान ही काव्यकला में इनकी विशाल बुद्धि का स्वातन्त्र्य था। ३४ ॥

शान्तो जितान्तरतया सरलः प्रकृत्या,
तत्त्वं विदन्नपि शनैर्मितभाषणश्च ।
अन्तेवसन्नभवदेष च तस्य राम-
कृष्णाश्रमो यतिवरो भवबन्धमुक्तः ॥ ३५ ॥

मूर्तिमती सरलताका वर्णन कराने के लिए इनके एक और शिष्य श्रीरामकृष्णाश्रम जी महाराज की भी मुझे स्मृति हो रही है। बहुत ही थोड़ा बोलते थे और उसमें भी बीच-बीच में अन्तर्मुख हो जाया करते थे। वह जीवित अवस्था में ही भव-बन्धन में मुक्त हो गये थे और उनके मुखमण्डलपर शान्ति बरसती थी। ३५ ॥

अन्येऽपि सन्ति यतयो बहवोऽस्य शिष्याः,
संसारसागरसुखाचमनेष्वगस्त्याः ।
नामावलिः कथमिवास्तु लघौ निबन्धौ —
तेषामिहेति शिरसा प्रणिपत्य याचे ।। ३६ ।।

संसार-सागर का सुखपूर्वक आचमन करने वाले अगस्त्य के समान और भी अनेक संन्यासी श्रीविश्वेश्वराश्रम जी महाराज के शिष्य हैं। इस छोटे निबन्ध में उन सब के नाम भी नहीं लिखे जा सकते, इसलिए उनके चरणों में शिर झुकाकर प्रणामपूर्वक क्षमा प्रार्थना करता हूं । ३६ ।।

शिष्यक्रमे व्युपरतेऽपि कथं प्रशिष्यः,
श्रीरामकृष्णयतिशिष्य इति प्रसिद्धः ।
विष्ण्वाश्रमो नरवरस्य स एकरत्नम्,
मल्लेखनीविषयतां न समभ्युपैतु ? ।। ३७ ।।

श्रीविश्वेश्वराश्रम जी महाराज के शिष्यों के नामक्रम का उपसंहार हो जाने पर भी उनके प्रशिष्य श्रीराकृष्णाश्रमजी महाराज के शिष्य श्रीविष्णुआश्रमजी का नाम-निर्देश इस लेख में अत्यावश्यक है। ये भी नरवर के एक अद्वितीय रत्न हैं। ३७ ।।

माधुर्यमस्य वचनेसु मुखे च कान्तिः,
शान्तिर्मनस्यतितरां विषये विरक्तिः ।
सद्भावनैर्धनिभिरप्यधनैः श्रितोऽयं,
सर्वेप्सितानि किल कल्पतरुः पिपर्ति ।। ३८ ।।

इनकी वाणी में माधुर्य है, मुखपर कान्ति है, मन में शान्ति है, विषयों के प्रति स्वभाव से ही वैराग्य है। श्रेष्ठ भावना को लेकर आनेवाले धनी और निर्धन सभी की इच्छा पूर्ण करनेवाले निश्चय ही यह कल्पवृक्ष हैं। ३८ ।।

श्रीब्रह्मचारिवरजीवनदत्तशर्मो —
पस्थापिता नरवरे खनिरद्भुतेयम् ।
कल्याणहेतुरखिलस्य च साङ्गवेद —
विद्यालयेत्यभिहिता भवतान्नितान्तम् ।। ३९ ।।

नरवर में श्रीजीवनदत्त जी ब्रह्मचारीजी महाराज के द्वारा स्थापति की गई साङ्गवेदमहाविद्यालय नाम वाली रत्नों की यह खान विश्वकल्याण का कारण बने । ३९ ।।

धन्या धरा प्रथमतो भुवनैकधर्त्री,
गङ्गातरङ्गपरिपूततरा ततोऽपि ।
तत्राप्यसौ जयति जह्नु कलिन्दकन्या —
मध्यङ्गता नरवरे पुनरद्भुतैव ।। ४० ।।

विश्वको धारण करने वाली प्रथम तो यह पृथ्वी ही धन्य है, श्रीगङ्गा की तरङ्गों से पवित्र होने पर और भी अधिक धन्य है, गङ्गा और यमुना के मध्य में इसकी और भी विशेषता है, सरस्वती के मिलजाने से नरवर में आश्चर्यमयी है । ४० ।।

इत्येवमेषपुरुषार्थचतुष्टयस्य
प्राप्तेर्निमित्तमथ तस्य महाविभूतेः ।
श्रीब्रह्मचारिचरणस्य दिवंगतस्य
संस्मारको भवतु मङ्गलराशये वः ।। ४१ ।।

इस प्रकार धर्म, अर्थ, काम और मोक्ष इन चारों पुरुषार्थों का देनेवाला और महामहिमास्पद श्रीब्रह्मचारी जीवनदत्त जी महाराज का संस्मारक यह महाविद्यालय आप सबके कल्याणों की वृद्धि करे ।४१।।

विद्यालयाय सकलेप्सितसाधनाय,
दत्तं समस्तमपि जीवनमेव येन ।
तस्मात्प्रसिद्धमिदमुत्तमपुण्यधाम,
तस्य प्रियं जयति जीवनदत्तनाम ।। ४२ ।।

विश्वकल्याण के साधन इस विद्यालय के लिए अपना जीवन सर्मपित करने वाले श्री महाराज जी का पुण्यधाम श्रीजीवनदत्त नाम जय को प्राप्त हो । ४२ ।।

संरोपितः क्षुप इवायमनेकयत्नैः
संवर्धितोऽपि च पुनः सुतनिर्विशेषम् ।
अस्माभिरप्यथ च भक्तजनैस्तदीयैः
संवर्धनीय इति संस्मरणं भवेत्सत् ।। ४३ ।।

छोटे पौधे के समान लगाये गये और पुत्र के समान पालन-पोषण के द्वारा बढ़ाये गये इस विद्यालय की उन्नति में प्रयत्नशील होना ही उनके भक्तों का उन्हें उचित याद करना है । ४३ ।।

येन स्थिरो भवति यत्र यथैष कीर्ति —
स्तम्भोऽस्य तत्प्रयतनीयमुपस्थितं नः ।
कार्याणि यानि पितुरर्धकृतानि तानि
पुत्राः कुलोन्नतिकराः पिपुरत्यवश्यम् ।। ४४ ।।

जहाँ जिसप्रकार उनका यह कीर्ति-स्तभ स्थिर है उसको वहां उसी प्रकार दृढ़मूल करना हमारा परम कर्तव्य है । सत्पुत्र अपने पिता के शेष कार्यों की पूर्ति किया ही करते हैं । ४४ ।।

विद्यालयस्त्वयमतिस्फुट एव साक्षा —
दालोक्यतेऽस्य विपुलं यश एव मूर्तम् ।
अन्यानि यानि शुभसंस्मरणानि तस्य,
गेयानि तानि कथमित्यवलोकनीयम् ।। ४५ ।।

यह विद्यालय तो उनका मूर्तिमान् यश स्पष्ट ही दीख रहा है । अब उनके-असंख्य शुभ संस्मरणों का गायन कठिन होने से दिग्दर्शन मात्र करें । ४५ ।।

स्नात्वा निरन्तरमसौ कुशविष्टरस्थो
रुद्राक्षभूषिततनुर्विहितत्रिपुण्ड्रः ।
यन्मन्त्रचिन्तनपरोऽपि गिरासुराणा —
मावश्यकं तदपिपोऽर्थिजनोपयोगि ।। ४६ ।।

श्रीमहाराज जी प्रतिदिन स्नान करके त्रिपुण्ड् धारण किये रुद्राक्षमाला पहने हुए कुशासन पर बैठकर जप करते समय भी संस्कृत बोल कर कार्यार्थियों की आवश्यकतायें पूरी करते थे । ४६ ॥

लोकोपकाररसिकस्य महाशयस्य,
नैजं न कार्यमभवत् किमपीति सत्यम् ।
नद्यः पिबन्ति न जलं न फलानि वृक्षाः
खादन्ति, साधुपुरुषव्रतमेतदेवम् ॥ ४७ ॥

लोकोपकार के रसिक इन महानुभाव का अपना कोई स्वार्थ न था । नदियाँ स्वयं जल नहीं पीतीं, वृक्ष स्वयं फल नहीं खाते; महापुरुषों का व्रत भी इसी प्रकार है । ४७ ॥

रोगातुराः कति न तेन कृतप्रबन्धा —
मार्गव्ययादिभिरपि प्रतिपालिताश्च ।
व्यासादिवैद्यवरभव्यचिकित्सकेभ्यः
सम्प्राप्य मुक्तगदतामभवन् प्रसन्नाः ॥ ४८ ॥

श्री महाराज जी की कृपा से अनेक रोगी मार्गव्ययादि सुविधायें प्राप्त करते हुए आगरा आदि स्थानों में डा० व्यास आदि की चिकित्सा से रोग मुक्त होकर स्वस्थ होते थे । ४८ ॥

मिथ्याभियोगकलुषीकृतमानसाना —
मुद्धारहेतुमपि कञ्चन पश्यतां न ।
श्रीमन्तमेव शरणं समुपागताना —
मासीत्सहायकगणो व्रजभूषणादिः ॥ ४९ ॥

झूठे मुकदमों से सताये हुए भी अनेक सज्जन महाराज जी के कृपापात्र श्री व्रजभूषशरण जैटली आदि विशिष्ट-अधिकारी राजपुरुषों की सहायता पाकर चिन्ता मुक्त होते थे । ४९ ॥

आजीविकार्थमपि तत्रभवन्तमन्ये
भूयांस एव सततं स्म समाव्रजन्ति ।
तद्योग्यतामनुसरन् व्यवहारदक्षः
तत्तत्प्रबन्धमुचितं कुरुतेस्म तेषाम् ॥ ५० ॥

आजीविका प्राप्ति के लिए भी अनेक पुरुष आते थे और व्यवहारकुशल महाराज जी उनकी योग्यता के अनुसार उनका यथोचित प्रबन्ध करते थे । ५० ॥

कन्यार्थिनः कतिपये च वरार्थिनोऽपि
स्वां स्वां परिस्थितिमिमे बहु वक्तुकामाः ।
पृष्ठेऽस्य गन्तुरुपवेष्टुरथापि भोक्तुः
पुच्छायिताः समलभन्त मनीषितानि ॥ ५१ ॥

कुछ अपनी कन्याओं अथवा पुत्रों के विवाह के लिए विस्तार से अपनी परिस्थिति सुनाने के लिए खाते-पीते उठते-बैठते महाराज जी के पीछे पड़कर अपनी समस्या सुलभा लिया करते थे । ५१ ॥

एताः कथाः कथयितुं यदि विस्तरेण
वाञ्छेदलं नहि भवेदपि हायनेषु ।

तस्मात्समासत इमा उपवर्ण्य वृत्त —
मग्रेऽपि विस्तृतिभयेन न वर्धयामि ।। ५२ ।।

भिन्न-भिन्न रूप से इन कथाओं के सुनने में वर्षों का समय चाहिए, इसलिए संक्षेप से इन्हें सुनाकर विस्तार के भय से अगले वर्णन का भी उपसंहार किया जा रहा है । ५२ ।।

देवद्रुमः स जनताहितपूर्तिहेतोः
स्वर्गादवातरदिहेति न संशयोऽत्र ।
दृष्टो रुदन्नुपगतः प्रहसन् गतः सन्
नासीत्स यस्य हृदयं न सुखाकरोत्सः ।। ५३ ।।

इसमें कोई संशय नहीं कि जनता के कल्याणार्थ इस भू-मण्डल पर श्रीमहाराज जी के रूप में कोई कल्पवृक्ष ही स्वर्ग से उतरा था । इनके पास जो रोता हुआ आया वह हंसता हुआ गया । ऐसा कोई न था जिसको इन्होंने सन्तुष्ट न किया हो । ५३ ।।

अद्याप्यसौ यदि निरावरणं निरीहं
वस्तुव्यवस्थितमनन्तमथाद्वितीयम् ।
वेदान्तवेद्यमखिलागमसाररूपं
प्राप्तस्तदा तु सुखसात्कुरुते पुनर्नः ।। ५४ ।।

यदि इन्होंने निर्गुण ब्रह्म को प्राप्त किया है तब तो चराचर की आत्मा होकर आज भी हम सब को सुख दे रहे हैं । ५४ ।।

यद्येष निर्मलधिया विमलैस्तपोभिः
स्वच्छैरुदारचरितैः सगुणं जगाहे ।
तत्रापि नः स्मरति वाञ्च्छति नः सुखं सः
सर्वातिशायि हृदयं मृदु तस्य दृष्टम् ।। ५५ ।।

यदि सगुण ब्रह्म को प्राप्त हुए है तब भी वह हमको याद कर रहे हैं और हमारी सुख-समृद्धि चाह रहे हैं । हमने उनका हृदय सबसे अधिक सुकोमल अनुभव किया है । ५५ ।।

यत्राप्यमुष्य वसतिर्वयमप्यथैनं
तत्रैव भावकुसुमैः परिपूजयामः ।
वन्दामहे नतशिरोभिरुपास्महे तं
सर्वेश्वरं शिवमभीष्टसुखाय तस्य ।। ५६ ।।

अस्तु – वह जहाँ भी हों वहाँ ही हमारी इस श्रद्धा-कुसुमाञ्जलि को स्वीकार करें । हम उन्हें प्रणाम करते हैं और भगवान् शंकर जी से प्रार्थना करते हैं कि वह महाराज जी के मनोरथों को पूर्ण करें । ५६ ।।

—०—

संस्मरणम्

आचार्यप्रवर श्रीविजयप्रकाश शर्मा, नरवर

श्रीमदनन्तगुणगणार्णवानामनल्पकृपाकल्पलताललितान्तःकरणानां विवेकविधूदयवर्द्धमानशमाम्भोनिधीनां शान्तिस्रोतस्वनीपूरप्रशमितक्रोधाद्यनेकदोषहुताशनानां विद्यावधूजीवनानामपि नैष्ठिकब्रह्मचारिणामगृहारणामप्यङ्गीकृतानेकगृहभारणां वीतरागाणामपि प्रदर्शितानुरागाणांमहादानानामपि तिरस्कृतदानानां समेधितद्विजराजश्रीणामप्यपहृतद्विजराजश्रीणां सदासुरभीणामप्यसुरभीणां भवभेदतत्पराणामपि भवभेदरसिकानां श्रीमहाराजपादानाम् कथमिव किमप्याभिनन्दनिकं प्रस्तूयते

श्रीमज्जीवनदत्ताख्यं प्रणम्य परमेश्वरम्
तदीयां स्मृतिमाश्रित्य किञ्चिद्वक्तुमुपक्रमे ॥ १ ॥
श्रीमतां पूज्यपादानां प्रयागे कुम्भपर्वणि ,
प्रथमं दर्शनं जातमस्मद्भाग्यविकासकृत् ॥ २ ॥
तदानीमङ्ग तावर्तः सकल्लोलः पदे पदे ,
प्रसन्नः सन्निधेरेषां तीर्थराजोऽप्यदृश्यत ॥ ३ ॥
हर्षकारणसामग्रोष्वङ्ग्यस्य सुषमानिधेः ,
संस्मरामि प्रदेशस्य तस्याद्यापि पुनः पुनः ॥ ४ ॥
तत्र ब्राह्म्याश्रिया जुष्टा ज्वलन्त इव तेजसा,
आश्राममादधाना हि वर्णिनस्ते तदाऽभवन् ॥ ५ ॥
धन्या सा मधुरा वाणी धन्या सा मधुराकृतिः ,
धन्यः स वेषविन्यासो धन्यः स दिवसो हि नः ॥ ६ ॥
धन्यास्ते सुहृदोऽस्मांकं मधुसूदनशास्त्रिणः ,
विधित्वमुपगच्छद्भिर्यैरयं योजितो विधिः ॥ ७ ॥
तत्रैवासन् स्वामिवर्या यतिवृन्दाब्जभास्काराः ,
ख्याताः षड्दर्शनाचार्याः श्रीमद्विश्वेश्वराश्रमाः ॥ ८ ॥
समर्च्य चरणैरेतैः शास्त्रीयः प्रश्न उद्धृतः ,
श्रवणेन च नस्तुष्टा जातरूपपरिष्कृतेः ॥ ९ ॥
सपदि स्वीकृतिं दातुमध्यापकपदे मम,
आग्रहीषुर्महाराजपादानाकृष्टचेतसः ॥ १० ॥
धीरोदात्ता महाप्राज्ञा उदासीना इमे तदा,
आगतायां सुवेलायां ससम्मानं समाह्वयन् ॥ ११ ॥
मदनमर्दन! देववर! स्वयम्
मयि कृपां भगवन् सततं कुरु,
गुणविहीनशरीरभृतस्त्वदम्.
अननुकम्पनमाशुतुषोऽवरम् ॥ १२ ॥

कुलपतिमहिमवर्णनम्

श्रीगोविन्द वासुदेव ब्रह्मचारी शान्ति-आश्रम, बिहारघाट ।

श्रीकीर्तिस्मृतिधर्म्यवाग्धृतिगुणामेधाक्षमासङ्गताः
जीर्णे यस्य कलेवरेऽत्यविचलागुर्वी प्रतिष्ठामधुः
वश्या यस्य त एव संयमनिधेः सप्तैवनार्योऽभवन्
नम्रैर्मौलिभिरर्हणां वितनुमस्तस्मै तपोमूर्तये ॥ १ ॥

श्री, कीर्ति, स्मृति, सङ्गतवाणी, मेधा, क्षमा, धृति, ये सातों गुण जिनके जीर्ण शरीर में भी निश्चल तथा भारी प्रतिष्ठा धारण करते थे तथा वेही सातों गुण जिन संयमनिधि महापुरुष की स्त्री अर्थात् स्त्री-स्थानीय बन कर रहे, विभूतियोग में वर्णित ये सातों भगवद् विभूतियां स्त्री लिंग मात्र से ही स्त्रीत्वख्याति रखती हैं इनसे अतिरिक्त कोई भी स्त्रीपरिग्रह जिन महाराजपाद का आजीवन न रहा उन तपोमूर्ति महाराजवर के लिये हम सभी कृतज्ञ शिष्यगण विनम्र मस्तकों से अर्हणा-पूजा-वामङ्यरूपिणी प्रस्तुत कर रहे हैं ।। १ ।।

दक्षाद्धर्मविचारणासु परमानन्दोपदेशप्रदा —
त्तस्मादेवगुरोस्तरोरिवफलं प्रेक्षामहे पावनात्
मत्तालिव्रजसंनिभैरतितरामध्येतृभिः स्वादितम्
हार्दस्नेहरसप्लुतं सुरुचिरं श्रीवेदविद्यामृतम् ॥ २ ॥

धर्मविचारणाओं में दक्ष परमानन्द रूप उपदेश देनेवाले उन्हीं गुरुदेव से उत्तम वृक्ष के समान फल हम देखते हैं जिस हार्दिक स्नेहरस से परिप्लुत श्री वेदविद्यामृत फल को मतवाले भौंरो के सदृश विद्यार्थियों ने चखाया ।। २ ।।

राजन्तेस्म मुखाम्बुजादिह यदुद्गाराः प्रमोदेषु ये
जह्यात् कोऽनुभवी स्थिरान् स्मृतिपथे तान् श्रेयसे प्रेयसे
वर्णी वर्णगुरुः सुवर्णसुषमो योऽवर्ण्यवर्णो बभौ -
रम्यं जीवनवृत्तमर्घ्यमजरं तस्यास्तु भव्याय वः ॥ ३ ॥

प्रमोद में भी स्वाभाविक रूपसे जिस मुख से निर्गत उद्गार, स्मृति पथ में जो स्थिर रहे-कौन अनुभवी श्रेय एवं प्रेय के लिए (पारलौकिक एवं ऐहलौकिक) या कहिये लोकोत्तर तथा लौकिक सुख के अर्थ उन्हें अपनी याद से हटायेगा जो वर्णी — ब्रह्मचारी-वर्णगुरु-ब्राह्मण-सुवर्ण के समान सुन्दर अथवा सुन्दर धर्ममय अक्षरों के उद्गार से सुहावने अवर्णनीय कीर्तिवाले भले भाते थे । उनका रमणीय जीवन-चरित्र पूज्य, प्रशस्त, अजर अमर होकर आपको चिरकालतक कल्याण के लिए हो ।। ३ ।।

कुक्षिर्मातुरपारभाग्यविभवा तस्यैव शस्ता जनिः
लब्धव्याः पदरेणवः स्वनिटिले तस्यैव शुद्ध्यै जनैः
पर्याप्ते विभवेऽपि यो न मलिनस्वार्थेन सङ्कर्षितः
तिष्ठन्नन्दति सच्चिदात्मनि सुखे सर्वोपकारव्रती ॥ ४ ॥

उनकी माता की कुक्षि अपार भाग्यवैभव वाली हैं, उन्हीं का जन्म प्रशंनीय है, अपनी पवित्रता के लिये उन्हीं की चरणरेणुका अपने मस्तक पर लोगों के धारण करने योग्य हैं जो परिपूर्ण, राजों से भी अधिक संमानित वैभव उपस्थित होने पर भी मलिन स्वार्थ से आकर्षित नहीं हुये, जो अपने सच्चिदानन्द स्वरूप आत्मा में ही-सर्वोपकारव्रतको निभाते हुए सदा प्रसन्न रहे हों ॥ ४ ॥

मध्ये संसदि भाषिणां सुविदुषां नाद्याप्यहो न्यूनता
होमे वाङ्मय एष मत्सरवलिर्दत्तोऽत्र नालोक्यते
दक्षं धर्मफलं च यत्प्रवचनं निर्मत्सरं शान्तिदं
यत्कार्यं व्यवहार्यमप्युभयथा तस्मै परस्मै नमः ॥५ ॥

सभा के बीच भाषण देनेवाले उत्तम विद्वानों की आज भी कोई कभी नहीं किन्तु जिसने वाङ्मय यज्ञ में मत्सर दोष को बलि चढ़ाया यहाँ इस काल में नहीं दिखाई पड़ता अर्थात् सुन्दर व्याखान में भी निर्मत्सर भाषण दुर्लभ है। परन्तु हमारे श्रीमहाराज जिनका प्रवचन-दक्ष कुशलता पूर्ण-धर्मरूप फलवाला-निर्मत्सर अन्य सत्पुरुषों को उत्कर्ष देकर स्वयं निरभिमानस्वरूप एवं श्रोतागणों को शान्ति देने वाला रहा और जिनके व्यावहारिक कार्य भी इसी प्रकार जैसा कि भाषण वैसा ही था दोनों समान हीं (मनस्येकं के बाद वचस्येकं कर्मण्येकं) थे उन लोकोत्तर गुणवाले महापुरुष के लिये नमस्कार है ॥ ५ ॥

साङ्गत्यं कुरु लोकपावनगिरां पुण्यात्मनां तादृशां
गर्ह्यां संसृतिमुज्झमानसपशो नृत्वं बुधत्वं भज।
वेशे वाचि कृतौ हृदिश्रयशुभामेकां हितां स्वस्थितम्
दग्धं माकुरुलोकमैहपरकं दुर्बोधदावानलैः ॥ ६ ॥

हे मानस पशो ! अर्थात् स्वेच्छाचार में वर्तनेवाले पशुप्रकृति वाले जन मानस ! उन जैसे ही पुण्यात्म-लोकपावनवाणी वाले महापुरुषों की संगति कर, आज की प्रचलित शास्त्रनिन्दित लोकपरिपाटीको छोड़। और सच्चा नर, और बुध — सदसद् विवेकी पंडित बन। वेशे वाचि कृतौ हृदि — वेश में वाणी में कर्म में हृदय में एक ही पारमार्थिक सच्चेहितभरी मंगलमयी मर्यादा को अपना। इस लोक एवं परलोक को दुर्बोध दावानलों से मत दग्ध कर डाल ॥ ६ ॥

विश्वासो निगमागमार्थनिकरे निष्ठा तदुत्थाकृती
द्यावाभूमिगतासु मृत्सु शुचिधीः स्वात्मैव नान्यः परः
लक्ष्ये ब्रह्मणि दीव्यतामिति गुणैः शक्योऽस्त्यविद्यालयः
यत्रायं स विभाति साङ्गमहितश्रीवेदविद्यालयः ॥ ७ ॥

वेदशास्त्र के अर्थों में विश्वास हो, उससे प्राप्त निष्ठा कर्म में आवे, द्यावाभूमिगत प्राणियों में पवित्र आत्म बुद्धि, सर्वत्र अपना आत्मा ही ओतप्रोत है और कुछ नहीं। लक्ष्य ब्रह्म में ही क्रीड़ा करनी चाहिये, इन्हीं उत्तम गुणों से जिसमें आकर अविद्या का नाश हो सकता है। इसी उद्देश्य से श्रीमहाराज जी का स्थापित सांङ्गवेद विद्यालय बड़ा सुहावना है ॥ ७ ॥

नस्याद् भारतभूररत्नजननी न स्यादवेदज्ञता
रम्येऽर्थे विपरीतधीर्न रुचये वैदेशिकी सभ्यता।
वर्मेदं दृढभावनात्मकमहो धृत्वैव शर्मार्हति
रक्ष्यं ब्रह्मकुलं त्वनेन निहितो विद्यालयो राजताम् ॥ ८ ॥

यह भारत भूमि रत्न प्रसवा हो, अरत्नों को न जने। वेदों के ज्ञान का अभाव नहो। उत्तम कल्याणकारी अर्थ में विपरीत बुद्धि न हो। विदेश से प्राप्त सभ्यता अशास्त्रीय रुचिकर न होने लगे। इसी सुन्दर दृढ़ भावना रूप कवच को धारण करके ही लोक का कल्याण हो सकता है। इन्हीं भावनाओं सेब्राह्मण कुल की वास्तविकता की रक्षा हो सकती है इस उद्देश्य से इन श्रीमहाराजपाद का स्थापित विद्यालय संसार में शोभाशाली हो ॥ ८ ॥

शुभ्रो भ्राजतु भारते कुलपतेर्भावात्मकोऽयं निधिः
भायान्मत्सररागदोषरहितः कार्यात्मकोऽस्मिन्विधिः।
श्रव्यं दृश्यमपेक्ष्य धर्म्यममलं यस्यास्ति तत्स्मारकं
मत्तं भानिव दुर्ग्रहान् दलयताच्छार्दूलविक्रीडितैः ॥ ९ ॥

हमारे कुलपति महोदय का यह सद्भावों का प्रतीक विद्यालयरूप निधि उज्ज्वल होकर भारत में चमके तथा कार्यात्मक विधि — व्यावहारिक मौलिक कार्य क्रम, मत्सरराग दोषों से रहित हो। सुनने में एवं दर्शन में भी धर्म का ही पथ बतलाने वाला निर्मल जिनका यह विद्यालय रूप स्मारक है वह-लोक में अकल्याणकारी दुर्ग्रहों को दुर्मतवादों के प्रचारों को मतवाले हथियों को जैसे सिंहों की खिलवाड़ मार देती है वैसे ही शार्दूलविक्रीडितछन्द या सिंहों जैसीवीरता धार्मिकप्रचार भरी क्रियाओं से विदलित करें ॥ ९ ॥

श्रीजीवन-विजयः

श्री बांकेलाल त्रिवेदी, नरवर

जयत्यजस्रनैष्ठिकव्रतोदयेन्दुकौमुदी–
द्युतिद्विजो द्विजाग्रगो जिताऽखिलेन्द्रियाशयः ।
सदाशयो महान् सुधीः सुधीजनैकजीवनः ।
जयत्यशेषलोकशोकहारिदिव्यजीवनः ॥ १ ॥

श्रौताचारपरम्पराप्रतिनिधिः सौजन्यवारान्निधिः
क्लेशक्लान्तजनावनैकनिपुणः कारुण्यपूर्णो विधिः
शास्त्रार्थाधिगमप्रधानसुधियां साधीयसी सिद्धिभूः
कोप्येको जयति प्रकृष्टतपसां राशिर्जगज्जीवनः ॥ २ ॥

यदीयतपसां निधिर्बुधजनैः सुरत्नैर्वृतः
यदीयवचसांततिः सुलभसिद्धिरेवापरा ।
जितेन्द्रियजनार्चितं प्रचुरपुण्यपुञ्जोदयम्
अनेकजनजीवनं विबुधजीवनं संश्रये ॥ ३ ॥

सदाश्रीमद्गङ्गाजलविमलमालोकशिवदम्
हरन्नन्तस्तापं श्रमितवपुषां संसृतिजुषाम् ।
मुषन्निःशेषांहोविशदतपसामास्पदमिदम्
न केनाराध्यन्नोविमलमनसां जीवनधनम् ॥ ४ ॥

यज्जीवनं जगदघौघहरं पवित्रं
मित्रं द्विजत्वसंरक्षणसक्षणानाम् ।
अज्ञानविप्लवनकर्मणि सुप्रसिद्धं
सिद्धं विशुद्धजनजीवनमाश्रयामः ॥ ५ ॥

सुरसरीवरतीरविराजितं
सुरगिरां रमणीयनिकेतनम् ।
यदपरं वपुरेव समुज्ज्वलम्
जगदिदं समलङ्कुरुतेऽनिशम् ॥ ६ ॥

यदालोकतो लोककल्याणपण्यम्
प्रशस्तं सदाचारचारुप्रचारम् ।
सवेदाङ्गसाहित्यसौहित्यपूर्णम्
सदाजीवनं जीवनं तन्नमामः ॥ ७ ॥

श्रीमज्जीवनवारिधिर्निधिरसौ सत्सूक्तिपंक्तिस्फुरन्–
मुक्तानामनवद्यहृद्यविपुलप्रद्योतिविद्यामणिः ।
क्षान्तिः शान्तिधृतीदयेति सरितामेकान्तविश्रान्तिभू–
र्भूयान्नः सततं द्विजेन्द्रमकरश्रेणीश्रयः श्रेयसे ॥ ८ ॥

श्रीजीवनप्रशस्तिः

श्री सत्यव्रत शर्मा, गढ़मुक्तेश्वर, मेरठ

सुरनदीपरिपूतमहावने सकलयज्ञजपादिफलप्रदे ।
सततहिंसकजीवगणैर्वृतो नरवरो रवरोषभयङ्करैः ।। १ ।।

समजनैर्विदितोऽस्ति महाश्रमः सुपवनैरपनीतमहाश्रमः ।
विविधसाधकसिद्धगणैर्युतः सुसफलैः सफलैस्तरुभिश्चयः ।। २ ।।

अथ विरोधपरान्परिसान्त्वयन् मृदुदृशैवचतांस्तरुणो मुनिः ।
व्रतधरः किल तत्र समाययौ विचरितुं चरितुं च महत्तपः ।। ३ ।।

सकलसज्जनजीवनभूतया निजपदेऽभिधया स महाश्रिया ।
शुभदजीवनदत्त इति श्रुतो गुरुवरोरुवलोमहतो महान् ।। ४ ।।

पठनपाठनशीलजनाय वै बहुलवस्तुचयं खलु दापयन् ।
सदसि तद्गुणवृत्तमहोगृणन् समुदितो मुदितोजनसन्निधौ ।। ५ ।।

चिरजितेन्द्रियतां परिपालयन् यमितमानसवृत्तितया स्थिरः ।
सवितृमन्त्रनिधिं मनसा स्मरन् जपरतो परतो निरपेक्षकः ।। ६ ।।

दिनकरे दिनमध्यगते सदा स्वयमुपागतवित्तकृतांन्धसा ।
सुलभगाङ्गजलैश्चमनोहरैरशनवृत्तिपरोऽतिपरोऽभवत् ।। ७ ।।

महासाङ्गवेदादिविद्यालयेशो यशोमण्डलैर्यस्य संपूरिताभूः ।
चतुर्वेदविन्नैष्ठिको ब्रह्मचारी बभावाश्रमे श्रीमहाराजपादः ।। ८ ।।

सकलागममर्मपारगान् निजवर्णाश्रमधर्मरक्षिणः ।
विविधान् खलु पण्डितानसौ भुविकृत्वापदमापशाश्वतम् ।। ९ ।।

चैत्रेऽसितेगुरुदिने च तिथौ दशम्यां नेत्रेन्दु विष्णुपदलोचनवैक्रमेऽब्दे
सर्वान् विधाय रुदतो निजनाथशून्यान् हा हा गुरुर्द्विजवरोऽस्तमुपागतो नः ।। १० ।।

वन्दना प्रसूनाञ्जलि

वियोगसंतापतप्ताः सहयोगगिनोऽध्यापकाः छात्राश्च

सोऽयं प्रातःस्मरणीयपूज्यपादपद्मानाममितसद्गुणगणगरिमान्वितानां नित्यनैमित्तकाम्यकर्मानुष्ठानपरिनिष्ठितानां महति श्रीसाङ्गवेदमहाविद्यालये सुचिरमुपाचार्यपदप्रतिष्ठितानामाजन्म-श्रीमज्जीवनचरणेषु समुपासनस्वभावानां तदीयतपःप्रसादोपगतवैदुष्यप्रकटानुभावानां यावज्जीवमधीते विप्रइति अन्वर्थ विप्राख्याविख्यातमुख्यानां पुत्रपौत्रदौहित्रप्रभृत्यैहिकाखिलसौख्यकृतसामुख्यानां स्वर्गकामो यजेत इति श्रुतिरिति गृह्याग्निमाधाय सावधानमाजीवमाजीवं तमेव मन्यमानानां तत्सन्निधान-समधिगतधीभिरनेकैः सुधीभिरन्तेवसद्भिरन्तःकरणे निरन्तरमाराध्यमानानां सर्वथाप्यैहिकजात-जातानुरागं विगमय्य लोकत्रयतारणपटीयस्याः सुरसरितस्तटे समलंकृतस्य विद्वज्जनाराध्य सुधीरप्रवर-नैष्ठिकव्रतधरविप्रवरश्रीमज्जीवनदत्तोपज्ञस्य निःशेषशास्त्रपरिशीलनशेमुषीजुषां महाविदुषां गुरुवर श्रीविजयप्रकाशशर्ममहाभागानां समधिकश्रमेणसमुद्धृतानेकदेशिकप्रवरस्य बुलन्दशहर-मण्डलान्तर्गतनरवरस्थश्रीसाङ्गवेदाश्रमस्य वरिष्ठताप्रतिष्ठितसेवनकर्मणैवात्मानंधन्यविदधा-नानामस्मत् पितृकल्पानां नश्वरं पार्थिवं शरीरमपहाय नित्यप्रतिष्ठितयशःशरीरेणास्मिन्नाश्रमे सतत-कृतसन्निधानानामाहिताग्नि स्वर्गस्थश्रीमत्पाठकोपाह्वश्रीपूज्यनवनिधिशर्ममहाभागानां श्री-चरणयोः सादरं सश्रद्धञ्च समर्प्यते ।

श्रीमत्पाठकवंशभूषणमणिः स्वाचारचिन्तामणिर्
मूलव्याकृतिपण्डिताः नरवरश्रीजीवनन्नांघ्रिश्रिताः
श्रौताचारविचारचारुचरितः स्मार्ताग्निनित्यव्रता ।
राजन्ते गुरुकल्पका नवनिधिप्रख्याः स्वलोकस्थिताः ॥ १ ॥

यस्माज्जातमिदं सदंशविशदं देदीप्यमानं जगत
तं सर्वात्मगतं मतं सुकृतिनामग्निश्रिताः कर्मिणाम्
देवं दिव्यगतिप्रदं तदधुना दिव्यां गतिं प्राप्नुवन्
नः सौभाग्यविधानबन्धुरधियः स्वर्गे विराजन्त्वमी ॥ २ ॥

धन्या येऽखिलजीवनं सुकृतिनि श्रीजीवनस्याश्रमे
श्रीमज्जीवनसंनिधौ सुरगवीदोग्दधृत्वमद्धा गताः
ब्राह्मण्यं सफलीकृतं निजजना निर्व्याजमाराधिताः
तेनो मान्यवराविदां गुरुवरा राजन्तु लोके स्वके ॥ ३ ॥

यैरेषा विटपावली निजकरैरारोपिता रक्षिता,
नाना पुष्पफलान्विता च सततं सानन्दमासेविता ।
श्रीमज्जीवनकानने नवनिधीनाधातुमेवागतास्
तान् भूयो निजलोकगान् नवनिधीन् नित्यं नुमः श्रेयसे ॥ ४ ॥

श्रद्धाञ्जलिविधानेन बालचन्द्रस्य सूक्तयः ।
श्रीमत्पाठकपादानां संभूयासुः प्रसत्तये ॥ ५ ॥

जीवन--जीवनम्

श्री छज्जूराम सारस्वत, खुर्जा

गजास्यं स्मेरास्यं सुकृतिजनतातापहरणम्
दधानं भृङ्गालिं मदविलुलिते गण्डपटले ।
तमोराशिं शीघ्रं चरणपतितानां हृदयतः
विदूरीकुर्वन्तं तमिह कलये चित्तनिलये ॥ १ ॥

सर्वप्रथम मैं उन गजानन भगवान को हृदयागार में विराजमान करना चाहता हूं जो प्रसन्नमुख हैं। पुण्यात्मा जनता के ताप-त्रय को दूर कर देते हैं, जिनके मदाप्लुत गण्डस्थलों पर भ्रमरावली मंडरा रही है तथा जो शरणागत भक्तों के हृदय से शीघ्र ही अज्ञानान्धकार को दूर कर रहे हैं। १ ॥

हृदा शान्तान् स्वान्तेवसदुदयकामाय सहसा
ह्यगाधं विद्याया उदधिमपि गाधं विदधतः ।
चिदानन्देऽद्वन्द्वे विगतविकृतौ ब्रह्मणि परे
प्रकाशान् प्रत्यक्षं विजयसहितांस्ताननुभजे ॥ २ ॥

गणेश-वन्दना के पश्चात् मैं अपने चरम विद्यागुरु पदवाक्यप्रमाणपारावारीण श्री विजयप्रकाश जी गौड़ का हृदय से स्मरण करता हूँ। वे शान्त स्वभाव हैं परन्तु फिर अपने अन्तेवासियों की हित-कामना मे उतावले हो जाते हैं। अगाध विद्यावारिधि को भी आसानी से विलोडित कर देते हैं। द्वन्द्वातीत निखिलविकारशून्य चिदानन्दपरब्रह्म के जो साक्षात् प्रकाशक हैं, विजय उभयथा जिनके साथ रहती है। २ ॥

वसन्ती भूलोके सुतयति चिरं स्मार्भकदले
समर्चाचर्चादौ पतिसहचरी फुल्लवदना ।
ह्यपर्णा सावित्री जनकतनया वा पतिपरा
सदाचार्यानी सा वसति हृदये कौशलसुता ॥ ३ ॥

आचार्य स्मरण के पश्चात् मैं उनकी धर्म-पत्नी अपनी माता आचार्यानी स्वर्गीया कौशल्यादेवी का स्मरण करता हूं जो मर्त्यलोक में रहती हुई छात्र-वृन्द पर सुतनिर्विशेष स्नेह करती थी। प्रसन्न मुद्रामें आचार्यजी की सेवा-शुश्रूषा, पूजा-सामग्री आदि चयन में सर्वदा सहयोग देती थी। पतिव्रताओं में साक्षात् पार्वती, सावित्री तथा सीताजी के समान थीं। उनकी स्मृति सतत हृदय में बनी रहती है ॥ ३ ॥

तमोव्रातं शान्तं निजवचनचन्द्रस्य किरणैः
प्रकुर्वन्तं सन्तं करयुगलपात्रं हरिहरम् ।
परानन्दं लोके निगमवचसां व्यापकवरम्
नमामो योगीन्द्रं यतिवरगुरुं नूतनहरम् ॥ ४ ॥

इसके पश्चात् मैं करपात्र-स्वामी की वन्दना करता हूं। वे अपने व्याख्यान के द्वारा अज्ञानान्धकार को शान्त कर देते हैं। करपात्र नाम से प्रसिद्ध हैं, वास्तविक नाम हरिहरानन्द सरस्वती है। वे वेदों के उत्तम व्याख्याता सन्यासी-श्रेष्ठ एवं नूतन शङ्करावतार हैं। ४ ॥

सदा क्षात्रं तेजो दधदपि हृदा ब्राह्मणवरः
सपत्न्या दुर्गायाः पयसि सततं दत्तनयनः ।
रमायाः पत्युश्च प्रतिसममनुष्ठापितकथः
स लालोनन्दादिर्विशति सहसा मानस-पथम् ॥ ५ ॥

इसके पश्चात् मैं उस तेजस्वी ब्राह्मण का स्मरण करता हूं, जिसका नाम चौधरी नन्दलाल था और जो उत्तम ब्राह्मण होते हुए भी क्षत्रियों के समान तेजस्वी थे। अपने निवास से निरन्तर गङ्गाजी के दर्शन करते थे और प्रति वर्ष श्रीमद्भागवत का अनुष्ठान करते थे। ५ ॥

महाराजश्रीणां हृदयमपरं नेत्रपथगम्
अगाधं पाण्डित्यं नरवरधरायास्तनुधरम् ।
सदाचाराचार्यं हरिहरगुरुं प्राच्चिसमये
नुमस्तच्छ्रीविश्वेश्वरचरणपाथोजयुगलम् ॥ ६ ॥

अब मैं दण्डी स्वामी श्रीविश्वेश्वराश्रमजी महाराज के चरण-कमलों को प्रणाम करता हूं। वे महाराजजी के द्वितीय हृदय थे। नरवर के पाण्डित्य की साक्षात् मूर्ति थे और सदाचारों के आचार्य एवम् ब्रह्मचर्यावस्था के करपात्र स्वामी जी के गुरु थे। ६ ॥

त्वदुत्सङ्गे गङ्गे ! नरवरधरायां निवसता
मया नीतः कालो बहुसुखमयः पुण्यबहुलः ।
अतोऽहं सम्मन्ये क्षपितकलुषं स्वं भगवति !
यदीदं सत्यं मां नय सुचरणौ स्वौ पुनरपि ॥ ७ ॥

मैं गङ्गा जी की प्रार्थना करता हूँ। हे गङ्गे माता नरवर आश्रम में आपके समीप रहकर मैंने बहुकाल सुखमय तथा पुण्यमय बिताया। अतः मैं स्वयं को निष्कलङ्क समझता हूँ। यदि तू भी माता मेरी बात का समर्थन करती हो तो फिर मुझे अपने चरणों में ले ले ॥ ७ ॥

न मन्ये विद्वांसं प्रथितयशसं स्वं न च तथा
तपस्यन्तं सन्तं विगलितविकर्मैकनिचयम् ।
अथाप्यास्मिन्पुण्ये कुलपतिगुणग्रामकथने
वचः पूतीकर्तुं भवति सततं मे शुभरुचिः ॥ ८ ॥

मैं न तो स्वयं को प्रसिद्ध विद्वान् समझता हूं और न निष्पाप तपस्वी महात्मा तथापि कुलपति के पवित्र वर्णन से वाणी को पवित्र करने की अभिलाषा है ॥ ८ ॥

यदाजिलालीगढान्तर्बरौलीनगर्याम्
सपर्यां जनानां हृदा सन्दधानः ।
नृपः कर्णसिंहश्शशासात्मवर्गम्
द्विजः प्राणनाथस्तदातं गुरुः सन् ॥ ९ ॥

जिस समय अलीगढ़ जिले के बरौली नगरमें राव कर्णसिंह शासन करते थे उसी समय एक प्राणनाथ नामक ब्राह्मण कर्णसिंह राजा के पुरोहित थे। राव साहब उन्हीं की सत्सम्मति से प्रजा का शासन चलाते थे। और प्रजा के सेवा-व्रत को हृदय से धारण किये हुए थे और प्रजा भी उनका हृदय से सम्मान करती थी ॥ ९ ॥

स रामप्रसादं सुतं पुण्यकर्मा
सुधर्मापतिः स्वौरसं वा जयन्तम्।
अवाप स्वपत्न्यां चिकित्साप्रधानः
हितं चापि पत्युर्नराणान्दधानः ॥ १० ॥

वे प्राणनाथजी चिकित्सालय के साथ-साथ राव कर्णसिंह का पौरोहित्य भी करते थे। जैसे सुधर्मापति इन्द्र ने अपनी पत्नी में अपने औरस पुत्र जयन्त को प्राप्त किया वैसे ही श्रीप्राणनाथजी ने अपनी धर्मपत्नी में श्री रामप्रसाद नामक पुत्र को प्राप्त किया ॥ १० ॥

स रामो मल्लानां निपुणतरकर्मापि सततम्
शिशिक्षे स्वाद्धे तोर्जनगतसुखाभावहरणम्।
विपश्यन्तो लोके निजमिव परञ्चापि मनसा
प्रवर्तन्ते स्वार्थान्नच कथमपि द्वन्द्वगदृशा ॥ ११ ॥

श्रीरामप्रसादजी यद्यपि अच्छे स्वास्थ्य वाले थे तथापि उन्होंने मनुष्यों के दुःखों को दूर करने का उपाय "आयुर्वेद शास्त्रानुसार चिकित्सा" अपने पूज्य पिताजी से सीख लिया था क्योंकि जो अपने पराये को समान भाव से देखते हैं उनकी प्रवृत्ति कभी भी भेदभाव पूर्ण नहीं होती है ॥ ११ ॥

अथाप्नोत्प्रौढत्वं प्रथमवयसो या परिणतिः
वधूटीं सर्वाङ्गीं रतिमिव वरां स्वात्मसदृशीम्।
ऋषीणां पूर्वेषामनुतदधुनापि स्थितिमताम्
अयं न्याय्यः पन्था विधिविधिकृतः कश्मलहरः ॥ १२ ॥

शनैः शनैः श्रीरामप्रसादजी ने प्रथमावस्था युवावस्था प्राप्त करली और अपने समान स्वभाव वाली रति के समान सुन्दरी नव-यौवना पत्नी को प्राप्त किया क्योंकि विवाह एक विधि के विधान से बना हुआ है। यह मनुष्य की बुराइयों को दूर करने का उचित मार्ग है जिसको प्राचीन एवं अर्वाचीन सभी ऋषिजन करते आये हैं ॥ १२ ॥

ततोऽसौ लोकानां विषयजसुखं बन्धनफलम्
गृहस्था यल्लब्धुं धनिकपदधूलिं प्रतिगताः।
वराकाश्चेष्टन्ते करचरणवागक्षिचलनैः
इतीदं सन्देष्टुं क्षितितलगतिं कोऽपि चकमे ॥ १३ ॥

बेचारे गृहस्थ जिस विषय-सुख को पाने के लिए लालायित रहते हैं और धनिकों की चरण धूलि में पड़कर हाथ, पैर, वाणी तथा नेत्रों के सङ्केतों से नाना प्रकार की चेष्टायें करते हैं वह विषय-सुख बन्धन का कारण है यह शिक्षा देने के लिए किसी देव-विशेष ने पृथ्वी पर आना चाहा ॥ १३ ॥

बरौल्यां श्रीरामो गुरुवरपदे कर्णनृपतेः
समासीनोऽप्यन्तर्ज्वलन इव निम्ने बहुसमाः।
अथैकस्मिन् वादे नरपतिदृशं वीक्ष्य विषमां
समासेनात्याक्षीद्गृहवसनभाण्डादि सकलम् ॥ १४ ॥

इधर श्रीरामप्रसादजी यद्यपि राव कर्णसिंह के गुरुपद पर आसीन थे, परन्तु भीतर ही भीतर कुछ घटना का अनुभव करते रहे और बहुत सा समय यों ही बीत गया। एक दिन किसी विवाद पर रावसाहब की कुटिलभ्रकुटि देख कर बिना कुछ कहे तथा बिना कुछ लिये ही अपनी धर्मपत्नी के साथ घर तथा उसकी सभी वस्तुओं को छोड़ कर चले आये। ॥ १४ ॥

स्वया सार्धं पत्न्या हरिचरणपद्मं हृदि दधत्
भ्रमन्स श्रीरामोऽलिगढ़ पुरमध्येऽथकटरे।
प्रतोल्यां स्वं वासं कतिपयदिनैरेव कृतवान्।
अवात्सीत्तत्रैवासुररिपुनगर्यां गुरुरिव ॥ १५ ॥

श्रीरामप्रसाद जी भगवान के सहारे अपनी पत्नी के साथ यों ही कुछ दिन घूमते रहे। कुछ दिन बाद अलीगढ़ के कटरा मुहल्ले में अपने निवास की व्यवस्था की और इन्द्र की राजधानी में गुरु के समान वहीं कटरा मुहल्ले में रहने लगे। ॥ १५ ॥

कथाभक्तिश्रद्धाजलविगलिते चित्तगमले
रसानामास्वादाद् वपुषि सति सिद्धे दृढबले।
शुभा सा संयोगात् प्रियतमतनोः पूतसमये
दधारांशं साध्वी जठरपिठरे जीवनकृते ॥ १६ ॥

कथा-भक्ति और श्रद्धा के जल से जब हृदय पूर्ण शुद्ध हो गया, इधर-उधर घूमने आदि से और भोजन एवं औषधियों के सेवन से शरीर जब पुष्ठ हो गया तब उनकी पतिव्रता पत्नी ने अपने प्रियतम के पवित्र संयोग से उनका अंश "जीवन" जन्म देने के लिए अथवा अपने जीवन को सुधारने के लिए उदर में धारण किया। ॥ १६ ॥

प्रसन्नाः सर्वाशाः श्रवणमुखकारी खगरवः
ददौ वायुः सौख्यं त्वचमनुगतो जीवनभृताम्।
पयो वै दोग्ध्रीणां स्तनगमसरन् क्षीरसरितः
शुभेऽच्छे पक्षे खे विमलतनुरिन्दुर्निरगमत् ॥ १७ ॥

महाराजजी जब गर्भ में आगये तो सारा जगत् सुखमय हो गया, दिशाएँ स्वच्छ हो गईं, पक्षी मधुर कलरव करने लगे, जीवधारियों की त्वचा को छूकर वायु सुख देने लगा, दुधारू जीवों के स्तनगत दूध में नदियाँ आगईं और स्वच्छ निर्मल आकाश में चन्द्र निकल आया। ॥ १७ ॥

श्रुतीनां घोषाणां द्विजवरगृहे व्याप्तिरभवत्
निलिम्पेभ्यो लोका हुतवहमुखे हव्यमददुः।
पयोजातं चासीद्विमलमधुरं विश्वसरिताम्
किमेवं संख्यानैः शुभशुभकरं दृश्यमखिलम् ॥ १८ ॥

प्रत्येक विद्वान् ब्राह्मण के घर में वेदों की ध्वनियाँ होने लगीं। देव प्रसन्नतार्थं भक्तों ने अग्नि में हवन किया। सब सरोवरों का जल निर्मल एवं मधुर हो गया। अधिक कहाँ तक गिनाएँ सम्पूर्ण जगत ही उस समय मङ्गलमय हो गया। ॥ १८ ॥

इषेऽन्त्ये दले वाणसंख्यातिथौ वै
क्रमे वत्सरे वेदरामाङ्कचन्द्रे ।
पुरेऽन्तस्सुतं रामजाया शुभास्यम्
अपर्णा यथासोष्ट देवी षडास्यम् ॥ १९ ॥

शुभ तथा पवित्र वातावरण में विक्रम सम्वत् १९३४ को आश्विनमास के शुक्लपक्ष की पञ्चमी तिथि में श्रीरामप्रसादजी की पत्नी ने एक सुन्दर मुख के बालक को जन्म दिया जैसे पार्वती ने अमर सेनानायक कार्तिकेय को उत्पन्न किया था । ॥ १९ ॥

शशाङ्कस्य कान्तिं हरन्तं स्वदीप्त्या
गभीरस्वभावं दृढां सन्धिबन्धैः ।
महामोहकूपं गतानां जनानाम्
समुद्धारयोग्यां धरन्तं तनूञ्च ॥ २० ॥

वह बालक अपने प्रकाश से चन्द्रमा की छटा को फीकी कर रहा था । वह गंभीर स्वभाव का था । सन्धिगत बन्धनों से दृढ़मांसल शरीर वाला था मानो वह संसार के अज्ञानकूप में पड़े जीवों के उद्धार के लिए ही दृढ़ शरीर लेकर आया हो । ॥ २० ॥

शरन्मेघाच्छन्ने हिमशिखरिसानौ भगवती
सबाला सा माता गजवदनयुक्तेव रहसि ।
शुभे सूच्चैस्तल्पे कृशतरतनुः शुभ्रवसना
शयानासूतेरादशदिनमयं कालमनयत् ॥ २१ ॥

शरत् काल के स्वच्छ मेघों से आच्छादित हिमालय के शिखर पर गजानन के साथ विराजमान पार्वती के समान बालक जीवनदत्त के साथ स्वच्छ उच्च पर्यङ्क पर विराजमान श्वेत परिधान से सुशोभित कृशशरीर वाली माता ने सूतक के दशदिन का समय बिताया । ॥ २१ ॥

पिता संस्काराणां क्रममविसृजन् जन्मसमये
अकार्षीज्जातादिं तदनुक्रमशो नामकरणम् ।
ततश्शाणोल्लीढो मणिरिव शिशुर्दीप्तदहनः
अकाशिष्ट श्रीमान् विगतमलजालोऽधिसदनम् ॥ २२ ॥

पिता श्रीरामप्रसादजी ने क्रमानुसार जन्म-समय में जातकर्म-संस्कार किया और उसके पश्चात् क्रम-प्राप्त नामकरण संस्कार किया । इन संस्कारों से बालक का जन्मजात प्रकाश और बढ़ गया । वह घर में ऐसे चमकने लगा जैसे शाण पर चढ़ाने से मल-जाल से रहित मणि प्रकाशित होने लगता है । ॥ २२ ॥

यज्जीवनायाद्य पितामहेन
दत्तः सुतो मे जगतां हिताय ।
अतो नृलोके भवतु प्रसिद्धः
नाम्ना स्वयं जीवनदत्तशर्मा ॥ २३ ॥

श्रीरामप्रसादजी ने सोचा कि ब्रह्माजी ने यह पुत्र मुझे मेरे जीवन के लिए और जनता के हित के लिए दिया है । अतः मैं चाहता हूं कि यह संसार ने जीवनदत्त शर्मा नाम से प्रसिद्ध हो । ॥ २३ ॥

यज्जीवनेनाद्य रमावरेण
दत्तः सुतो मे जगतां हिताय ।
अतो नृलोके भवतु प्रसिद्धः
नाम्ना स्वयं जीवनदत्तशर्मा ॥ २४ ॥

श्रीरामप्रसादजी ने सोचा कि संसार के जीवनदाता रमापति विष्णु भगवान ने मुझे यह बालक लोक-कल्याण के लिए दिया है इसलिए मैं चाहता हूं कि यह बालक संसार में जीवनदत्त शर्मा नाम से प्रसिद्ध हो। ॥ २४ ॥

यज्जीवनं स्वं जनताहिताय
दत्तं परस्ताद्भविताह्यनेन ।
अतो नृलोके भवतु प्रसिद्धः
नाम्ना स्वयं जीवनदत्तशर्मा ॥ २५ ॥

श्रीरामप्रसाद जी ने सोचा कि यह बालक भावी काल में अपना जीवन जनता के लिए अर्पित कर देगा, अतः मैं चाहता हूं यह संसार में जीवनदत्त नाम से प्रसिद्ध हो। ॥ २५ ॥

देयादमुं जीवन आर्तिहारी
सद्ब्रह्मचर्यं परिपालयन्तम् ।
मह्यं ततोऽयं भवतु प्रसिद्धः
नाम्ना स्वयं जीवनदत्तशर्मा ॥ २६ ॥

श्रीरामप्रसादजी दीनोद्धारक रमापति भगवान से प्रार्थना करते हैं कि भगवन् नैष्ठिक ब्रह्मचर्य व्रत का पालन करने वाले इस बालक को आप मुझे दें तथा शतायु करें जिससे यह संसार में जीवनदत्त शर्मा नाम से विख्यात हो ॥ २६ ॥

पितैवोपानैषीच्छिशुमृजुधियं पञ्चशरदम्
शुभे वारे लग्ने सुरगुरुयुते पापरहिते ।
अकाशिष्टास्मिन् सा श्रुतिसवनदात्री भगवती
यथा वै राकायां शरदि हिमगुः स्वच्छवियति ॥ २७ ॥

पिता श्रीरामप्रसाद जी ने ही शुभ दिन देव-गुरु से युक्त पापग्रहों से रहित शुभलग्न से पञ्चम वर्षीय बालक का उपनयन संस्कार किया। जिस प्रकार शरद् कालीन निर्मल आकाश में चन्द्र प्रकाशित होता है ठीक उसी प्रकार मन्त्र दान के अव्यवहितोत्तर काल में उस पूत हृदय बालक में वेदजननी भगवती गायत्री प्रकाशित हो गईं। ॥ २७ ॥

गृहे वर्णाभिज्ञं प्रतिदिनमहो ! सौरजपने
समासक्तं भक्तं हरिचरणपाथोजयुगले ।
शुभे विद्यागारे कुशलतमशिक्षाप्रदयुते
प्रवेश्यैनं बालं सुखमतुलमाप्नोत्किल पिता ॥ २८ ॥

बालक जीवनदत्त प्रतिदिन गायत्री जपने लगे। भगवद्भक्ति तो जन्म से ही उनके हृदय में थी। घर में ही जब बालक साधारण अक्षरज्ञान कर चुका तो पिता ने बालक जीवन को कुशल अध्यापकों से युक्त उत्तम पाठशाला में प्रविष्ट कराकर बड़ा सुख पाया। ॥ २८ ॥

उदञ्चत्सद्बुद्धिप्रसरणकलाकोविदमुख—
कृपाक्षिप्रक्षेपप्रवणगुरुपादैकशरणः ।
सुखावाप्तप्रारम्भिकनिगमविद्यालघुचयः
दयानन्दार्याणां चरणकमले प्राप शरणम् ॥ २९ ॥

जब बालक जीवनदत्त शर्मा उदीयमान सद्बुद्धि के प्रसार की कला के कोविदों में अग्रणी हो गये तथा दयालु गुरुजनों की देख-रेख में रहने लगे और प्रारम्भिक शिक्षा एवं आर्ष ग्रन्थों का कुछ ज्ञान कर चुके तब कभी आर्य–समाज के जन्मदाता महर्षि दयानन्द सरस्वती के चरणों में पहुँचे ॥ २९ ॥

त ईक्षामात्रेण श्रुतिचरणशीलं शिशुममुम्
विजानन्तः प्रोचुः ऋषिनिगमपाठी भव सुत !
तथा वाणाक्ष्यब्दान् वसुमिथुनधर्मान् परिहरन्
विचारैः सत्रोच्चैः ऋजुसरलचर्यामनुसरन् ॥ ३० ॥

ऋषि दयानन्दजी ने प्रथम दर्शन में ही इनको ब्रह्मचर्यव्रतनिष्ठ समझ लिया और बोले वत्स ! तुम वैदिक ग्रन्थों का अध्ययन करो तथा २५ वर्ष तक आठ प्रकार के मैथुन का परिहार करते हुए सादा जीवन उच्च विचार का आदर्श उपस्थित करो ।। ३० ।।

ऋषेरादेशोऽसौ सरलविरले जीवनहृदि
चकार स्वस्थानं घट इव नवे चित्रकरणम् ।
भविष्णौ जीवे च प्रतिफलति वाणी हितकृताम्
समत्येत्यन्यस्मात्सहसुषिरपात्रादिव पयः ॥ ३१ ॥

जिस प्रकार नवीन घट पर चित्रकारी अमिट हो जाती है उसी प्रकार परमसरल जीवनदत्त शर्मा के हृदय में महर्षि का आदेश अपना घर कर गया । उन्नतिशील प्राणियों में गुरुजनों की वाणी अपना प्रभाव करती है अन्यथा सच्छिद्र घट में से जल के समान सहसा चली जाती है ॥ ३१ ॥

तदैवेटावाख्ये भुवि पुरमणावेव वसतः
विरुद्धं वक्तॄणां प्रचुरमदभक्त्या द्विपयताम् ।
प्रकृष्टाभिः स्वाभिर्दिवसकरभाभिः श्रुतिभिदाम्
श्रुतीनां व्याख्याभिर्हृदयपटलं भेदनपटोः ॥ ३२ ॥

उसी समय पृथ्वी के नगरों में शिरोमणि इटावा नामक नगर के निवासी अपार मद एवं अभिमान के कारण हाथियों जैसा उच्छृङ्खल व्यवहार करने वाले श्रुतिनिन्दक विरोधी वक्ताओं के हृदय-पटल को अपनी नवीन–नवीन सूर्य के समान तीक्ष्ण वेदों की व्याख्याओं से भेदन करने में प्रवीण—॥ ३२ ॥

वटूनां वृद्धानां युवजनततेश्चापि सततम्
समासेव्याग्र्यस्य प्रथितयशसो नाम दधतः ।
सभीमं सेनान्तं प्रखरमतिमन्दीकृतकवेः
यशो वागीशस्यातिथिरभवदस्य श्रवणयोः ॥ ३३ ॥

बालक, वृद्ध, युवा सभी के सेवाग्रणी, विख्यात यशस्वी अपनी तीव्रतम बुद्धि के द्वारा पण्डितों की बुद्धि को भी मात देने वाले वागीश के पक्ष में शुक्राचार्य की बुद्धि को मात देने वाले देवगुरु के समान श्री भीमसेनजी वेद–व्याख्याता का यश श्री जीवनदत्त शर्मा के कानों का अतिथि हो गया ॥ ३३ ॥

प्रफुल्लं पद्मानां चयमिव सृता षट्पदततिः
सुवीणाझङ्कारं वशमनुगतो वा मृगगणः ।
समाकृष्टस्वान्तः श्रुतिविशदव्याख्यातृयशसा
इटावामागाजीत् किमपि पठितुं वैदिकवचः ॥ ३४ ॥

जिस प्रकार विकसित पद्म–समुदाय पर गन्ध से आकृष्ट होकर भ्रमर मण्डली पहुँच जाती है अथवा जैसे सुन्दर वीणा की झङ्कार का वशीभूत मृग–समुदाय हो जाता है उसी प्रकार वेदों के विशद व्याख्याता पं० भीमसेनजी के यश से आकृष्ट होकर ब्रह्मचारी श्री जीवनदत्त शर्मा कुछ वैदिक अध्ययन करने के लिए इटावा में आ गये ॥ ३४ ॥

ततः पादोपान्तं विनयभजनाराध्यहृदयः
अवाप्योपाध्यायस्य गुरुवरसंदीपनिमुनेः ।
सुदामा वा वर्णी विविधपरिचर्यादिचरणैः
सुसन्तुष्टादस्मादलभत वरं कामफलकम् ॥ ३५ ॥

जिस प्रकार विनयभक्ति से पूतहृदय सुदामा ने अपने गुरुवर संदीपनि मुनि के चरणों में पहुँचकर सेवाकर उनको सन्तुष्ट करके अभीप्सित वर की प्राप्ति की, उसी प्रकार ब्रह्मचारी जीवनदत्त शर्मा ने भी इटावा में पहुँच कर अपने गुरुवर भीमसेन जी को प्रसन्न कर कामनासिद्धि का आशीर्वाद प्राप्त किया ॥ ३५ ॥

श्रुतौ सत्वङ्गायां सविधिपठनात्प्राप्यफलिताम्
प्रचारं चाप्यस्या भरतभुविकर्तुं कृतधिया ।
निदेष्टुश्चादेशात्तदभिजनवासं विसृजता
समैषि स्थानन्तद्यदधिकफलं स्यात्त् तपसे ॥ ३६ ॥

ब्रह्मचारी जीवनदत्त शर्मा ने विधिपूर्वक गुरुमुख से पढ़कर षडङ्ग वेदों में सफलता प्राप्त करली तथा भारतवर्ष में उनके प्रचार का विचार किया तथा गुरुजी की आज्ञा से उनके चरणारविन्द से पृथक होकर ऐसे स्थान की खोज करनी प्रारम्भ कर दी जो तपस्या के अधिक उपयुक्त हो ॥ ३६ ॥

समेत्यातः कोलं जनकचरणौ भक्तिसहितः
ववन्दे सस्नेहं कुशलमभिपृष्टश्च शिरसि ।
समाघ्रातस्ताभ्यां श्रुतिचरणशीलः स तु युवा
तदन्ते तुष्टात्मा न्यवसदखिलं कर्म विदधत् ॥ ३७ ॥

ब्रह्मचारी जीवनदत्त शर्मा इसके पश्चात् अलीगढ़ में आये। पिता को श्रद्धापूर्वक प्रणाम किया। उन्होंने आशीर्वाद के रूप में उनके शिर का आघ्राण किया, कुशल क्षेम पूछा। प्रसन्नतापूर्वक पिता की सेवा करते हुए ब्रह्मचारीजी उन्हीं के चरणों में रहने लगे ॥ ३७ ॥

ततः कालेऽतीते पतिसुखमिताप्यत्र निखिलम्
वसन्ती भूलोकं जननमरणद्वन्द्वबहुलम् ।
सती सा तन्माता परमजनकेनात्मनिकृता
न विद्वान् चेतस्वान् स्मरणविमुखः सन्ततिगुणे ॥ ३८ ॥

इसके पश्चात् कुछ समय बीतने पर सती-साध्वी ब्रह्मचारीजी की माता को परमपिता परमात्माने अपनी गोद में ले लिया। यद्यपि वे अपने जीवन-काल में पूर्ण पतिसुख भोग चुकीं थीं परन्तु जिस भू-लोक में रहती थीं वह जनन-मरण द्वन्द से भरा हुआ है। कोई भी मनस्वी विद्वान् सन्तति के गुणों से बहिर्मुख नहीं होता ॥ ३८ ॥

ततो दुखं हातुं निजहृदिभवं मातृविषयम्
वियुक्तत्वात्पत्न्या जनकमनसोऽप्यस्थिरतया ।
जनानामाह्वानाच्छ्रुतिवचनवादे कृतमनाः
स्वयं पित्रा सार्धं वनमभिगतो विल्वसहितम् ॥ ३९ ॥

फिर अपने हृदय में विद्यमान मातृविषयक दुःख को छोड़ने के लिए, पत्नी के वियोग के कारण पिताजी के मन के अस्थिर होने से, वेलौन के निवसियों के विशेष आह्वान से, वेदों के अध्ययन-अध्यापन करने का निश्चय करके अपने पूज्य पिताजी के साथ ही वेलौन चले गये। ॥ ३९ ॥

समाजस्यार्याणां भवनमधिवासं विदधता
तथा दर्शं दर्शं परमजननीं मन्दिरगताम् ।
विना हेतुं धर्मो द्विजजनहितं वेदपठनम्
इति स्मारं स्मारं शिशुजनहितेऽनायि समयः ॥ ४० ॥

वे वेलौन में जाकर आर्यसमाज मन्दिर में रहने लगे तथा प्रतिदिन चण्डी के मन्दिर में देवी के दर्शन करने जाने लगे। बिना स्वार्थ के धार्मिक बुद्धि से वेद पढ़ना ब्राह्मण का कर्तव्य है इस बात का स्मरण करते हुए बालकों के हित में समय बिताने लगे ॥ ४० ॥

तथैकाकीप्रातः प्रतिदिनमितः क्रोशतुलिते
प्रसिद्धे सुक्षेत्रे नरवरधरां चापि निकषा ।
जले भागीरथ्या ऋषसपितृदेवान् सुखयितुम्
स्वनिष्ठातो गत्वा द्विजजनविधिं सर्वमकरोत् ॥ ४१ ॥

वहाँ से अकेले ही प्रतिदिन प्रातः वेलौन से लगभग एक कोस दूर नरवर भूमिके निकट प्रसिद्ध क्षेत्र में अपनी निष्ठा से जाकर भागीरथी के जल में देव ऋषिपितरों को तृप्त करने के लिए ब्राह्मणोचित सर्व आह्निक क्रिया करते थे ॥ ४१ ॥

तपो योग्यं सत्यं नरवरवनं सिद्धवसुधम्
महाभीष्माकारं मुनिजनहितं सिद्धिवसुदम् ।
सकामैः कामाक्षिप्रणिहितकटाक्षैः क्षतधियाम्
असेव्यं सेव्यं श्रीहरिचरणपद्मैकमनसाम् ॥ ४२ ॥

गङ्गा स्नान को जाते हुए महाराजजी नरवर वन के दर्शन करते हुए जाते थे और सोचते थे कि यह स्थान वास्तव में तपस्या के योग्य है, सिद्धि-भूमि है, बड़ा भयङ्कर है, मुनि-जनों के योग्य यह स्थल है, अष्टसिद्धियों को देने वाला है। कामिनी के कटाक्षों से जिनका हृदय विदीर्ण हो चुका है उनके योग्य नहीं है केवल उन्हीं के योग्य है जिनका मन श्रीहरिचरणारविन्द का भ्रमर हो चुका है ॥ ४२ ॥

पयोवृक्षैः प्लक्षैर्जघनफलभण्डीरसहितैः
अरिष्टैर्न्यग्रोधैश्चलदलगजाशैश्च ककुभैः ।
बवूलैः सश्यामैः पवनहरशारवोटतिनिशैः
सुवृक्षैश्चाप्यन्यैर्गगनतलशाखैर्विलसितम् ॥ ४३ ॥

इस वन में गूलर, पिलखन, शिरीष, रीठे, नीम, वट, पीपल, शल्लकी, अर्जुन, बबूल, शीशम, पलाश, सिहोरा, वञ्जुल आदि अनेक गगनचुम्बी वृक्ष खड़े हैं ॥ ४३ ॥

क्वचिच्चैणं रावं हरिणगणभ्रान्तं क्वचिदपि
कुरङ्गाणां पृषतदलकूर्दा क्वचिदपि ।
क्वचित्सेधोत्सेधं क्वचिदपि च गोधाप्रसरणम्
क्वचिन्न्यङ्कोर्रक्ति शशकशिशुकास्यां क्वचिदपि ॥ ४४ ॥

कहीं पर मृगों की ध्वनि हो रही है, कहीं दूसरे प्रकार के मृगों का भ्रमण, कहीं पर कुरङ्ग जाति के मृग क्रीड़ा कर रहे हैं, कहीं पर पृषत चितकबरे मृग कूद रहे हैं, कहीं पर सेधा उछल रही, कहीं पर गोधा सरक रही है, कहीं पर बारहसिंहा जा रहा है, और कहीं पर शशकों के शिशु छिपे बैठे हैं ॥ ४४ ॥

तथारण्याभ्यन्ता रसमुखपितुर्देमतहतः
सुलिङ्गं सिद्धाख्यं शुभमसृणपाषाणघटितम् ।
विलोक्यायं स्वान्ते श्रुतिसवनदात्रीं भगवतीम्
पुरश्चारैः स्तोतुं मतिमलभतैकान्तवसने ॥ ४५ ॥

वहीं पर वन के भीतर षडानन के पिता, देवों में महान् शिवजी का सुन्दर चिकने पाषाण से निर्मित सिद्धेश्वर नाम का शिवलिङ्ग था। इन सब को देखकर महाराजजी ने एकान्त में रहकर वेद-माता गायत्री के पुरश्चरण करने का विचार किया ॥ ४५ ॥

पिता ज्ञात्वा पुत्रं तपसि सततं लग्नमनसम्
स्वजीवं शर्माणं सकलजगतो जीवनकरम् ।
तथा स्मृत्वा पत्नीं परमजनकेनात्मनि कृताम्
स्वयं स्वस्मिन् कर्त्तुं परमजनकं सोपि गतवान् ॥ ४६ ॥

पिता श्रीरामप्रसादजी अपने पुत्र के सत्सङ्कल्प को जानगये कि उनके जीवन के आधार सारे जगत के जीवनसञ्चालक जीवनदत्त शर्मा तपस्या करना चाहते हैं तथा उनको यह भी स्मरण हो आया कि उनकी पत्नी परमपिता की गोद में चली गई हैं। वे भी स्वयं को स्वयं में विलीन करने के लिए परब्रह्म में लीन हो गये ॥ ४६ ॥ ४६ ॥

गते रामे रामं पितरि पितरं जीवनयुवा
सदैकान्तं शान्तं जनकचरणशून्यं क्षितितलम् ।
तटे भागीरथ्या नरवरवनाभ्यन्तरतमम्
चिरं स्थातुं सिद्धयाह्यचकमतपूर्वं दृशिगतम् ॥ ४७ ॥

जब पिता रामप्रसादजी परमपिता राम में लीन हो गये तो महराजजी ने सर्वदा एकान्त और शान्त जनसञ्चार से बिलकुल शून्य नरवर वन के भीतर भागीरथी के किनारे जिस भूतल के पूर्व में दर्शन भी होते रहते थे उस स्थान को सिद्धि के लिए चिरकाल बैठने के निमित्त चाहा ॥ ४७ ॥

कदाचिद्वै मत्याद्भवनपतिभिश्चार्यसदसः
वनान्तं तद्विल्वं सुरपुरनिभं सर्वसुखदम् ।
पराधीना वृत्तिः सकलजननिन्द्येति मनसा
परित्यज्याभ्यागात् खरसनवचन्द्रे नरवरे ।। ४८ ।।

उधर कभी आर्य-समाज के अधिकारियों से किसी विषय पर मतभेद हो गया जिससे महाराजजी को कुछ ठेस लगी । बस अपनी स्वतन्त्रता की रक्षा के निमित्त महाराजजी सर्वसुखसम्पन्न स्वर्ग योग्य बेलौन का परित्याग करके सम्वत् १९६० में नरवर के शिव मन्दिर में आ गये ।। ४८ ।।

तथा योगानन्दैर्नरवरशिवस्यान्तिकचरैः
गवां सेवासक्तैः सततमनुरक्तैः शिवपथे
स्वभावे काठिन्यं परममृदुतां चेतसि पुनः
दधानैः स्वैर्मित्रैरचकमत सार्धं न वसनम् ।। ४९ ।।

वहीं पर योगानन्द नामक ब्रह्मचारी भी रहते थे । वे नरवरस्थ शिव के भक्त थे और कल्याण-मार्ग के अनुगामी थे, गो-सेवक थे, स्वभाव में कठिन तथा हृदय से कोमल महाराजजी के मित्र थे । परन्तु महाराज जी उनके साथ न रहकर पृथक् ही रहे । ।। ४९ ।।

सशाल द्वारिभ्यां गुरुवरहिताभ्यां स्वमनसा
युवभ्यां शिष्याभ्तां नवविरचिते मात्त सदने ।
वटाभ्यन्तःकुञ्जे कतिपयदिनानान्तु परतः
न्युवासान्तस्तृप्तः श्रुतिचरहितेच्छाविवशगः ।। ५० ।।

कुछ दिनों के पश्चात् महाराजजी दो वटों के बीच में बनीं हुई एक कच्ची मिट्टी की कुटिया में रहने लगे और ब्रह्मचारी छात्रों को पढ़ाने लगे । उस कुटिया को महाराजजी के आदि-शिष्य द्वारिकादत्त तथा शालग्राम-नामक छात्रों ने स्वयं बनाया था वे दोनों ही युवा महाराजजी के परम भक्त थे । ।। ५० ।।

मुहूर्ते स ब्राह्मे लघुविगतनिद्रोप्यनलसो
ह्यनासक्तो बाह्ये विषयसुखजाले पतनदे ।
समासक्तः प्रातः स्मरणजपयोग्ये सुवचसि
हरिं स्मारं स्मारं प्रतिदिनविधिं कर्त्तुमुदयात् ।। ५१ ।।

महाराजजी ब्राह्म मुहूर्त में ही सहसा निद्रा का परित्याग कर देते थे, आलस्य का उनमें अंश भी न था । बाह्य विषय-सुख जो पतन का कारण है उसमें उनकी आसक्ति नहीं थी । उनकी आसक्ति तो प्रातःस्मरण करने योग्य जप आदि में थी । अतः "श्रीकृष्ण गोविन्द हरे मुरारे हे नाथ नारायण वासुदेव" का कीर्तन करते हुए नित्य-आवश्यक कर्म में प्रवृत्त हो जाते थे । ।। ५१ ।।

मलं त्यक्त्वा दूरे विधिविहितशौचः प्रतिदिनम्
करौ पादावन्धूद्धृतसलिलमृत्स्नागतमलान् ।
विधायास्यं स्वच्छं दशनगणशुद्धया च विधिना
जले स्नातं दध्यौ नरकरिपुनद्यास्तटवरम् ।। ५२ ।।

प्रतिदिन दूर जाकर मल-त्याग करते थे । उसके पश्चात् मृतिका आदि से शुद्धि करके कूपोदक तथा शुद्ध मिट्टी से हाथ-पैर शुद्ध करके कुल्ला, दातौन आदि से मुख शुद्ध करने के पश्चात् गङ्गा जी के जल में स्नान करने के लिए गङ्गाजी का ध्यान करते थे । ।। ५२ ।।

ततो गत्वा गङ्गामृषिमुनिगणैः सेविततटाम्
भटां कल्कध्वंसे सगरतनयोद्धारजननीम् ।
हिमाद्रेस्तुङ्गात्सुशिखरतलाच्चुम्बितधराम्
धरन्तीं कल्लोलान् प्रणमति सदा स्मार्द्रहृदयः ।। ५३ ।।

उसके पश्चात् ऋषि-मुनि-गण जिसके तट का सेवन करते हैं, जो पापों का ध्वंस करने में प्रबल समर्थ है, जिसने सगर के पुत्रों का उद्धार किया है, जो हिमालय के उच्च शिखर से उतर कर पृथ्वी पर बहती है तथा जिसमें नित्य नई तरङ्गें उठती हैं उस गङ्गाजी को आर्द्रमना होकर प्रणाम करते थे । ।। ५३ ।।

शुभासङ्गे गङ्गे जननि नरलोकेऽहमवसम्
नृशंसे दुःसङ्गे सदयजनसङ्गे विवशतः ।
सुगर्भे सन्मातुस्तदनुवसुधायाश्च भुतले
इदानीं मामन्तर्गमयपयसः पादपतितम् ।। ५४ ।।

अयि ! सुन्दर संसर्गवाली माता गङ्गे ! मैं इस मृत्युलोक में अनेक स्थानों में रहा, दुष्टों के साथ में, कभी-सभी सज्जनों के साथ में, कभी माता के गर्भ में, और कभी भूतल में परन्तु सर्वत्र विवश ही रहा । अब मैं तेरी शरण में आगया हूं तू अब मुझे अपनी गोद में लेले । ।। ५४ ।।

न बिभ्ये स्वात् कष्टात् बहुजननदुष्कर्मकुफलात्
न चाकांक्षे स्वस्मै सुरपुरसुखं नैव जननि
पुनर्जन्माभावं कथमपि धनं नैव भयदम्,
परं याचे मातः समजनसुखं क्लेशरहितम् ।। ५५ ।।

माता मैं अपने अनेक जन्मार्जित पापों के परिणाम-भूत अपने कष्टों से नहीं डरता और न अपने लिए स्वर्ग का सुख ही चाहता हूं, न मोक्ष ही चाहता हूँ, निरन्तर भय का मूल-धन तो किसी प्रकार भी नहीं चाहता, केवल यही चाहता हूं कि संसार के सभी प्राणियों को क्लेशरहित सुख हो । ।। ५५ ।।

स्तुतेः पश्चादित्थं भसिततिलके नाञ्चितशिराः
प्रवाहस्याभ्यास्यं कटिगतजलाभ्यन्तरतनुः ।
समाङ्गीनं स्नानं विधिवदनुसृत्यार्द्रवसने
परित्यज्यानार्द्रेन्यभृत स विधिं सान्ध्यमभजत् ।। ५६ ।।

इस प्रकार गङ्गाजी की प्रार्थना करके गङ्गा की धूलि को मस्तक पर लगाकर कटि-प्रमाण जल में जाकर प्रवाहाभिमुख खड़े होकर सर्वाङ्गीण स्नान करके गीले वस्त्रों का परित्याग करके शुष्क वस्त्र पहिनकर सन्ध्योपासन करते थे । ।। ५६ ।।

वटाभ्यन्तः कुञ्जे सलिलयुतया गोमयमृदा
सुलिप्ते स्वस्थाने त्रिदिवपतिनद्या अभिमुखः
तरोर्विल्वस्याग्रे सुकुश उपविष्टः स्थिरमनाः
जपञ्श्रीगायत्रीं समयमगमन्मध्यदिवसम् ।। ५७ ।।

तदनन्तर वटों के भीतर बनी अपनी कुटिया में आकर गोबर-मिट्टी से लिपवा कर विल्व-वृक्ष के सामने गङ्गाजी के सम्मुख मुख करके सुन्दर कुशाओं से निर्मित आसन् पर एकाग्र-चित्त बैठकर गायत्री जपते-जपते मध्याह्न समय पर पहुँच जाते थे । ।। ५७ ।।

अथर्तौ हेमन्ते तदनुशिशिरे चाम्बरतले
सुखं सुप्तेधर्मे जलचरचये देवकृपया ।
तटे रेणुच्छन्ने मृदुकुसुमशय्यातल इव
विधातुं मध्याह्ने सुरसरिति संध्यां स गतवान् ॥ ५८ ॥

इसके पश्चात् हेमन्त तथा शिशिर ऋतु में मृदुल-कुसुमों से आच्छन्न शय्या के समान कोमल तट पर आकाश के नीचे जब भगवान की कृपा से जलचर समुदाय धूप में सोता था उस समय महाराजजी मध्याह्न में सन्ध्या करने के लिए गङ्गाजी पर जाया करते थे। ॥ ५८ ॥

वसन्ते ग्रीष्मे च प्रखरतमभानुप्रतपनैः
धरायामङ्गारप्रतिमकणतन्वां वियति च ।
प्रगाढं सन्तप्ते पदमपि गतं यत्र कठिनम्
विधातुं मध्याह्ने सुरसरिति सन्ध्यां स गतवान् ॥ ५९ ॥

बसन्त और ग्रीष्म ऋतु में जब पृथ्वी सूर्य की प्रचण्ड किरणों से सन्तप्त-वालु के कणों में अङ्गारों से आच्छन्न-सी हो जाती थी, आकाश भी पर्याप्त तपा सा हो जाता था, जहाँ एक पद भी चलना कठिन था, उस समय मध्याह्न सन्ध्या-करने महाराजजी गङ्गाजी पर जाया करते थे। ॥ ५९ ॥

तथर्तौ वर्षाख्ये त्रिदशतटिनीतीरपुलिने
चिरं व्याप्ते वर्षाप्रभवभवजीवैस्तनुतमैः
इवाच्छन्नेधूल्या पयसि चिति मायाशबलिते
विधातुं सन्ध्यां श्रीद्विजकुलकलावान् स गतवान् ॥ ६० ॥

इसी प्रकार वर्षा-ऋतु में वर्षाकालजन्य जीवों से जब गङ्गाजी का किनारा व्याप्त हो जाता था तथा पानी माया-शबलित ब्रह्म के समान मैला हो जाता था उस समय वे द्विजकुलकुमुदचन्द्र मध्याह्न में सन्ध्या करने गङ्गाजी पर जाया करते थे। ॥ ६० ॥

तथाकाशो मेघैर्जिन इव मुनिः श्वेतवसनैः
सुयुक्तो वर्षाजैर्मनसिजभवैर्दोषपटलैः
वियुक्तो यत्रानेहसिचविमला सर्वककुभः
विधातुं मध्याह्ने सुरसरिति सन्ध्यां स गतवान् ॥ ६१ ॥

जिस समय श्वेतवस्त्रों से जिन-मुनि के समान आकाश स्वच्छ मेघों से आच्छन्न हो जाता था तथा काम-जनित दोषों से रहित जिन-मुनि के समान ही जब आकाश बादलों से रहित हो जाता था और सब दिशाएँ निर्मल हो जाती थीं उस समय महाराजजी मध्याह्न सन्ध्या करने के लिए भागीरथी-तट पर जाया करते थे। ॥ ६१ ॥

अथ प्राणायामं विधिवदनुसृत्याघहननम्
उपस्थायादित्यं श्रुतिविहितमन्त्रैर्जपमनु ।
विधायस्वस्थाने वलिमतिथिपूजां च हवनम्
प्रसादं श्रीविष्णोरशनमभजत्स्नेहसहितम् ॥ ६२ ॥

वहाँ जाकर विधिपूर्वक प्राणायाम तथा अघमर्षण-करके वैदिक मन्त्रों से सूर्य का उपस्थान तथा जप करके, अपनी कुटिया में वैश्वदेव का अङ्गभूत हवन एवं अतिथि-सत्कार करके, काकादि को बलि देकर श्रीनारायण के भोग से प्रसादीभूत भोजन स्नेह सहित करते थे। ॥ ६२ ॥

शुभेरामक्षेत्रे नरवरवनात्पूर्वककुभि
स्थितान् पूर्णानन्दान् यतिवरवरान् सिद्धतपसः
उडीयाबाबाख्यान् दृशमभिगतान् नित्यमकरोत्
प्रदोषात् प्राक् सन्ध्यां व्यवसितमनाः शान्तकरणः ॥ ६३ ॥

नरवर भूमि से पूर्व दिशा में स्थित रामघाट स्थान में पूर्णानन्द नामक उड़िया बाबा रहते थे। वे सन्यासी शिरोमणि तथा सिद्ध–तपस्वी महात्मा थे। महाराजजी उनके दर्शन करने जाया करते थे तथा प्रदोष काल से पूर्व ही नित्य शान्त–चित्त होकर सायम् सन्ध्या कर लेते थे।॥ ६३ ॥

तथाच्छात्रान्नैकान् सयमनियमान् शान्तकरणान्
सदासेवालग्नान् गुरुचरणध्यानैकमनसः ।
स्वयं भिक्षावृत्तीनृजुसरलशीलान् श्रमवतः
निजीयं ब्रह्मत्वं सफलयितुमध्यापिपत च ॥ ६४ ॥

तथा अपने ब्रह्मत्व की रक्षा के लिए यम–नियमों का पालन करने वाले, स्वभाव से शान्त सदा सेवा में संलग्न, गुरुचरणों के ध्यान में रत, स्वयं भिक्षा माँग कर निर्वाह करने वाले सीधे और सरल स्वभाव के परिश्रमी अनेक छात्रों को पढ़ाते थे।॥ ६४ ॥

कदाचित्पूर्णायाँ गुरुचरणपूजां प्रतिगतः
शुभे शुक्रे मासे सुरजमलवैश्योस्य सविधे
समस्तौषीद्बावां निखिलजनभाषापरिगतैः
नवीनैः स्वैः भावैः सरल हृदयो जीवनयतेः ॥ ६५ ॥

कभी अषाढ़ शुक्ल पूर्णिमा के दिन सेठ श्रीसूरजमलजटिया महाराजजी को चरण-पूजा करने गये वहीं विराजमान उड़िया बाबा की भी समस्तजनों की भाषा में नवोन-नवीन भावों से वन्दना की क्योंकि वे सरल हृदय थे॥ ६५ ॥

चिदानन्दध्यानान् निगमवचसाँ व्यापकवरान्
वदान्यान् भक्तेभ्यो भजनसरणीं सम्प्रथयतः ।
कषायैः संरक्तान् विगलितकषायान्हृदयतः
सदापूर्णानन्दान् भजत मनुजा रे यतिवरान् ॥ ६६ ॥

अयि भक्तो, आप सदा पूर्णानन्द बाबा का भजन करो। ये सदा चिदानन्द के ध्यान में मस्त रहते हैं, वैदिक वचनों के सुन्दर व्याख्याता हैं, बड़े उदार हैं भक्तों को भक्ति–मार्ग का उपदेश देते है यद्यपि ऊपर से काषायाम्बर धारण किये हुए हैं परन्तु इनके हृदय में से वासनाओं का नाश हो चुका हैं।॥ ६६ ॥

महासौम्याकारान् सकलजगताँ भेदनिचयान्
विभस्मीकुर्वाणान् हुतभुज इव स्वात्मपतितान् ।
शुभारम्भैर्दम्भोलिकरसौख्यं संप्रददतः
सदापूर्णानन्दान् भजतमनुजा रे यतिवरान् ॥ ६७ ॥

ये स्वभाव के सरल है। यह संसार के भेदभावों को ऐसे भस्म करते है जैसेजैसे अग्नि अपने में पड़े हुए पदार्थों को भस्म कर देता है और इनके यहाँ नित्य नवीन उत्सव होते हैं जिन के दर्शनों से भक्तों को स्वर्ग का सुख का अनुभव होता है।॥ ६७ ॥

क्रियाशान्तिर्ज्ञानं रतिरपि सुता ब्रह्मणि चिति
विहाय स्वत्वंस्वान् विदधति च धर्मक्रमयुताः।
समाधि तत्त्वंभक्तिमतिसरलं सङ्क्रमयतः
सदापूर्णानन्दान् भजतमनुजा रे यतिववरान् ॥ ६८ ॥

इनका उपदेश है कि यदि कर्म, शान्ति, ज्ञान, और प्रेम-इन चारों का सम्बन्ध संसार से हट कर ब्रह्म में हो जाता है तो ये चारों अपने को खो बैठते हैं। उस समय कर्म कर्म न रहकर धर्म हो जाता है, शान्ति शान्ति न रहकर समाधि कहलाती है, ज्ञान भी अपना रूपान्तर कर तत्व–ब्रह्म बन जाता है और स्नेह का रूप भक्ति में बदल जाता है। ॥ ६८ ॥

इवासीनं तत्रा सुरसरिति जातं वसुवरम्
उवाचैनं वर्णिप्रवनमरहङ्कारसरलः
महाराज श्रीमन् प्रथिततपसस्तेतुपदयोः
निमग्नं चित्त'मेऽशरणमधुना तौहिशरणम् ॥ ६९ ॥

वहीं पर गङ्गात्मज अष्टम वसु के समान विराजमान नैष्ठिक ब्रह्मचारी महाराजजी से सेठ श्रीसूरजमल जटिया अहङ्कार शून्यता से सरल भाव से कहने लगे-महाराजजी, आप सिद्ध तपस्वी हैं आपके चरणों में मेरा अशान्त मन लग गया है, आपके चरण ही उसकी अशान्ति दूर कर सकते हैं ॥ ६९ ॥

नियोगं मे कञ्चिद्वदतु भगवन्नर्थविषयम्
यदीयापूर्तिः स्यात्सुखयितुमलं दासहृदयम्।
अकामोपि स्वार्थे परहितकृतेऽदभ्रकरुणः
प्रसन्नोमादृक्षे वसुसदुपयोगाय भवति ॥ ७० ॥

हे भगवन्, धन–विषयक कोई आज्ञा मुझे दीजिये जिसको पूर्ण करके सेवक को सन्तोष प्राप्त हो। यद्यपि आपकी अपने विषय में कोई कामना नहीं है फिर भी परोपकार के लिए बड़े दयालु हैं, अतः मुझ जैसों पर तो धन का सदुपयोग कराने के लिए प्रसन्न हो ही जाते हैं। ॥ ७० ॥

महाराजोपीत्थं तदनुमनसा तेन महितः
प्रसन्नोभूच्छ्रेष्ठी तदभिमतसिद्ध्यैचभवनम्
अधीत्यैच्छात्राणां प्रथममथ वृत्तिञ्च गुरवे
व्यवस्थामापन्ने द्विजवरनियोगात्तु कृतवान् ॥ ७१ ॥

इस प्रकार सरल हृदय से आत्म-निवेदन करने पर महाराज श्रीसेठ सूरजमल जटिया पर प्रसन्न हो गये और सेठजी ने एक अध्यापक की मासिक वृत्ति तथा छात्रों के अध्ययनार्थ एक अध्यापन-कक्ष की व्यवस्था कर दी ॥ ७१ ॥

नरौरावास्तव्यो द्विजकुलपयोजस्यदिनकृत्
अधिष्ठाता चासीत् नरवरमहावेदवसतेः
सलालोनन्दादिः कुलपतिकृपासम्बलवलः
ददौ योगं स्वीयं श्रुति सदननिर्माणहृदयः ॥ ७२ ॥

ब्राह्मण कुल-कमल-दिवाकर महाराज चरणों के सम्बल नरौरा निवासी चौधरी नन्दलालजी ने विद्यालय निर्माण में योग दिया। वे ही विद्यालय के व्यवस्थापक पद पर थे ॥ ७२ ॥

समारब्धेर्वर्षात्खरसनवचन्द्रान्नस्वरे
श्रुतेर्विद्यागारे श्रुतिचरहिते पाठनविधौ ।
व्यवस्थामानेतुं सुरजमलप्राप्येण वसुना
समानर्चाचार्यानधिसमयमेतान् यतिवरः ।। ७३ ।।

सम्वत् १९६० से चले आ रहे साङ्गवेद महाविद्यालय में ब्रह्मचारियों के हितार्थ अध्ययन में व्यवस्था लाने के लिए महाराज जी ने वहाँ एक वैतनिक अध्यापक की नियुक्ति कर दी। उस पद पर जो भी आचार्य आया उसका सत्कार सेठ सूरजमल जटिया से मिलने वाले धन से किया। ।। ७३ ।।

क्रमादेतान् यातान् श्रममिव विदन् पण्डिततया
सचन्द्रं श्रीरामं विबुधशिवरत्नं शिवपरम् ।
गुरुं श्रीरामाज्ञां करयुगलपात्रस्य च यतेः
चतुर्थं श्रीरामेश्वरमभजतामन्दधिषणान् ।। ७४ ।।

महाविद्यालय के प्रधानाचार्य पद पर अनेक विशिष्ट-विद्वान् आये। पण्डित होने के कारण महाराजजी ने उन सभी का सत्कार किया। सर्व-प्रथम प्रधानाचार्य थे श्री शिवरत्न जी, उनके पश्चात् श्री रामचन्द्र जो तथा उनके पश्चात् करपात्रस्वामी के परीक्षा दिलाने के गुरु श्री रामाज्ञा जी तत्पश्चात् चौथे नम्बर में आने वाले श्री रामेश्वर जी थे। ।। ७४ ।।

तथा काले काले विविधबुधविद्याप्रणयिनो
यतीन् वानप्रस्थान् श्रुतिचरणशीलांश्च गृहिणः ।
सुवस्त्रैः सद्ग्रन्थैः सदशनधनैश्चापि धनिभिः
समर्चां प्रापय्यालभत परमं स्वान्तरसुखम् ।। ७५ ।।

उन आचार्यों के अतिरिक्त अनेक विद्वान् तथा विद्याप्रेमी यति, वानप्रस्थी, ब्रह्मचारी, गृहस्थी, समय-समय पर आश्रम में जो भी आते थे श्रीमहाराजजी उन सभी का धनिकों द्वारा सुन्दर वस्त्रों, उत्तमोत्तम ग्रन्थों, मधुर स्वादिष्ट भोजनों तथा द्रव्य से सत्कार कराकर आभ्यन्तर सुख का अनुभव करते थे। ।। ७५ ।।

पदे वाक्ये न्यायेऽप्रतिहतगतैर्लब्धयशसः
कदाचिच्छ्रीविश्वेश्वरयतिवराणां च चरणाः ।
समायातास्तच्छ्रीकुलपतिपदं नेत्रविषयम्
विधातुं सस्नेहं नरवरधरायां भृगुपदात् ।। ७६ ।।

एक बार पंजाब से आकर भृगुक्षेत्र में रहने वाले पण्डित-स्वामी, यति-शिरोमणि श्रीविश्वेश्वराश्रमजी महाराज जो न्याय-व्याकरण-मीमांसा आदि शास्त्रों में अव्याहत-प्रवेश होने से लब्धप्रतिष्ठ थे श्रीमहाराजजी के स्थान का दर्शन करने के लिए भृगुक्षेत्र से नरवर में आये। ।। ७६ ।।

ससत्कारं तानासनवरमधिष्ठापितपदः
प्रसन्नात्मावोचत् कुलपतिरमून् नम्रवचनः ।
अहो भाग्यं स्वेषां चरणकमलैरञ्चितभुवाम्
इदानीमस्माकं यदिह भवतां स्नेहवसुधाः ।। ७७ ।।

महाराजजी ने उनका बड़ा सत्कार किया। सुन्दर, उत्तम आसन पर बैठाकर नम्र-वचनों से प्रसन्न मुद्रा में महाराजजी कहने लगे कि हम लोगों का अहोभाग्य है जो आपने अपने चरणों से हमारे आश्रम की भूमि को पवित्र किया और हमें स्नेह का पात्र बनाया। ।। ७७ ।।

आगतं स्वागतं श्रीमतां स्वामिनाम्
अत्र विद्यालयप्राङ्गणे तिष्ठताम् ।
स्वान्तरं चान्तरा तुष्यतामीशितुः
भक्तिगङ्गातरङ्गैः शुभैः शोधितम् ॥ ७८ ॥

महाराजजी कहने लगे कि इस विद्यालय के प्राङ्गण में विराजमान भक्ति की गङ्गा की तरङ्गों से शुद्ध, अपने अन्तरात्मा में सदा प्रसन्न रहने वाले श्रीस्वामीजी का स्वागत करते हैं । ॥ ७८ ॥

ब्रह्मविद्यामृतस्रोतसां शीतलैः
शीकरैः शीतलं जीवनं कुर्वताम् ।
गत्वरं सत्वरं तप्यमानं सदा
खिद्यतां मानवानां हितं ताम्यताम् ॥ ७९ ॥

दुःखित मानवों के हित की कामना से सन्तत नश्वर सांसारिक तापों से सन्तप्त मानवों के जीवन को ब्रह्म-विद्या के सरोवर से निकले हुए स्रोतों के शीतल शीकरों से शीतल करने वाले स्वामीजी का हम स्वागत करते हैं । ॥ ७९ ॥

उष्यतामाश्रमे पाठ्यताम् वर्णिनः
पूर्यतां दिक्सरित् कीर्तिकल्लोलकैः ।
ध्यायतामात्मनि ब्रह्मचिन्मात्रताम्
प्राप्यतामाश्रमो धन्यतापात्रताम् ॥ ८० ॥

आश्रम में रहिए, ब्रह्मचारी समुदाय को पढ़ाइये; दिशारूपी सरिताओं को कीर्ति की लहरों से भरिये, आत्मा में ब्रह्म की चिन्मात्रता का ध्यान कीजिए, आश्रम को धन्यता का पात्र बनाइये ॥ ८० ॥

प्रसन्नात्मावाक्यैरवितथपदार्थैस्तुसरलैः
तथेत्युक्त्वा दण्डी कतिपयदिनानान्तुपरतः ।
भृगुक्षेत्रं त्यक्त्वा सुत इव भृगोर्दैत्यसदनम्
अवात्सीत्स स्वर्गे नरवरपदे क्षोणितलगे ॥ ८१ ॥

सरल तथा सत्यार्थ वाक्यों को सुनकर बड़ी प्रसन्नता के साथ स्वामीजी ने महाराजजी की बात मान ली और भृगु के पुत्र जैसे दैत्यसदन को छोड़कर स्वर्ग में आकर रहने लगे थे वैसे ही वे भृगुक्षेत्र को छोड़कर पृथ्वी पर विद्यमान अपर स्वर्ग के समान नरवर आश्रम में आकर रहने लगे । ॥ ८१ ॥

सखा सखायं जनकः सुतं वा
सहोदरो वापि सहोदरं वा ।
गुरुं श्रुतेर्विज्ञतमं वटुर्वा
परस्परं तौ भजतः स्म तत्र ॥ ८२ ॥

चिरकाल साथ में रहने से स्वामीजी तथा महाराजजी परस्पर में ऐसा व्यवहार करते थे जैसे मित्र मित्र से, पिता पुत्र से, सहोदर भाई सहोदर भाई से और पिपठिषु छात्र वेद-विद् गुरु से करता है । ॥ ८२ ॥

पिता सुतान्वा भजतो मनस्वी
गुरुप्रियान् शान्तिदमोपयुक्तान् ।
स पात्रमुख्यान् करपात्रमुख्यान्
विश्वेश्वरोऽध्याप्य सुखी बभूव ॥ ८३ ॥

जिस प्रकार मनस्वी पिता सेवा-प्रवीण अपने पुत्रों से बात करने में प्रसन्नता का अनुभव करता है उसी प्रकार श्रीस्वामीजी भी अपने में श्रद्धा रखने वाले, शम-दम से युक्त, सच्छात्र-शिरोमणि करपात्रीस्वामी जी आदि को जो उस समय ब्रह्मचारी वेष में रहते थे- पढ़ा कर सुख का अनुभव करते थे। ॥ ८३ ॥

प्रयागे कुम्भे पर्वणि सदसि स्वैरं तु विदुषाम्
प्रवृत्ते शास्त्रार्थे प्रतिभटगजेन्द्रेषु पुरतः।
मृगेन्द्रान्सत्तर्कप्रखरनखघातं विदधतो
विलोक्यार्यानेकान् मुमुहतुरिवैतौ गुणितया ॥ ८४ ॥

एक बार प्रयाग में कुम्भ पर्व था। विद्वानों का किसी विषय पर विवाद चल रहा था। सब पण्डित-मण्डली एक तरफ थी तथा दूसरी तरफ अकेले एक पण्डित। अपनी प्रबल युक्तियों से मृगेन्द्र जैसे अपने विरोधी गजों को नखप्रहार से भगा देता है वैसे ही अकेले ही वे अपने विरोधी विद्वानों को मूक कर रहे थे। यह दृश्य देख कर दोनों मित्र उन पर मुग्ध हो गये। ॥ ८४ ॥

जले नौकायद्वत्स्थल इव समे स्यन्दनगतिः
निरालम्बं विष्णोः पदमनुविमानस्य गमनम्।
पदे न्याये शास्त्रेऽप्रतिहतगतौ वाचि विदुषः
सदाचारान् यूनः वयसि वपुसि ज्ञानमहितान् ॥ ८५ ॥

उस विद्वान की व्याकरण-न्याय आदि शास्त्रों में जलमें नौका के समान, सम-भूमि में रथ के समान तथा निरालम्ब आकाश में विमान के समान गति थी। सदाचारी तथा अवस्था और शरीर में युवा होते हुए भी ज्ञान में वे वृद्ध थे। ॥ ८५ ॥

प्रकाशानाचार्यान् विजयसहितान् विश्रुततमान्
विधाय प्राचार्यानृषिवसुनवेन्दौ तु शरदि।
श्रुतेः सर्वाङ्गाया अधिसदनमेतान् प्रभवतो
लभेतेस्मानन्दं नरवरनिवासे यतिवरौ ॥ ८६ ॥

उस विद्वान का नाम था आचार्य श्री विजयप्रकाश शर्मा गौड़। अतः उनकी प्रसिद्धि और विद्वत्ता देख कर महाराजजी तथा स्वामीजी ने उनको श्रीसाङ्गवेद महाविद्यालय के प्रधानाचार्य पद पर नियुक्त कर दिया तथा आचार्यजी भी अपनी विद्वत्ता से वहाँ अपना प्रभाव स्थिर कर बैठे, इसको देखकर दोनों मित्रों को बड़ा आनन्द हुआ। ॥ ८६ ॥

उपाचार्यः शास्त्री नवनिधिरसौ पाठककृती
विधातादेशानां कुलपतिकृतानां स्वमनसा।
वटूनांशिक्षाबित्स्मृतिविहितकर्माग्निहवनः
प्रलभ्यप्राचार्यानधिगतहृदर्थोऽपि मुमुदे ॥ ८७ ॥

उस समय उपाचार्य-पद पर शास्त्री नवनिधि पाठकजी थे। वे महाराजजी के आदेशों का अपने हृदय से परिपालन करते थे अथवा अपने मन से ही महाराजजी के आदेशों का आदेश देते थे। वे बालकों को पढ़ने की कला के पण्डित थे। नित्य-प्रति स्मार्त-हवन किया करते थे। वे भी आचार्यजी के आने से सफल मनोरथ हुए ॥ ८७ ॥

समागत्य स्वामी शरवसुनवेन्दौ नरवरे
विधायासौ तस्य स्मृतिमिह गुरोः पूतहृदये।
विधातुं सुस्थानं तदुचितमिव ब्रह्मणिपरे
गतः स्वस्मिन्भूम्नि श्रुतिनवनवेन्दौ तु शरदि ॥ ८८ ॥

श्री स्वामी विश्वेश्वराश्रमजी महाराज विक्रम सम्वत् १९८५ में नरवर आये तथा अपने गुणों से नरवर आश्रम के संस्थापक के पवित्र हृदय में अपना स्मरण छोड़कर विक्रम सम्वत् १९९४ में परब्रह्माभिन्न स्वरूप में लीन हो गये। मानो वे अपने मित्र के उपकार की प्रत्युपकृति के लिए ब्रह्म में उनके स्थान की व्यवस्था करने गये। ॥ ८८ ॥

ततो मन्दं मन्दं श्रममगणयन्पाठनविधौ
विवित्सुच्छात्राणां हृदिपरमतोषं समनयत्।
शतं विद्यावित्तान् स्वसमकृतविज्ञान् बहुपटून्
प्रकाशानाचार्यो विजयमुखरान् सोऽपिकृतवान् ॥ ८९ ॥

नरवर आश्रम में आने के पश्चात् आचार्य श्री विजयप्रकाश जी ने शनैः शनैः बड़ा श्रम किया। दिन-रात पढ़ाते-पढ़ाते जिज्ञासु छात्रों को हृदय से सन्तुष्ट किया। सैकड़ों छात्र सामान्य कोटि के, सैकड़ों अपने जैसे सफल विद्वान् तथा सैकड़ों मध्यम कोटि के विद्वान् तैयार किये जो प्रदेश के कोने-कोने में उनका प्रकाश कर रहे हैं। ॥ ८९ ॥

मुहूर्ते सद्ब्राह्मे श्रुतिसुखदगङ्गालहरिका —
सुघोषान् खं व्याप्तान् नरवरधरादेवमुखजान्।
दिवान्नापूर्णाम्बास्तुतिसततसंन्तानरवगुणान्।
मुहुः श्रावं श्रावं कुलपतिवरास्ते मुमुदिरे ॥ ९० ॥

नरवर में ब्राह्म मुहूर्त में छात्र-वृन्द द्वारा की गई गङ्गा-लहरी की मधुर ध्वनि से आकाश गूंज उठता है। मध्याह्न में भी अन्नपूर्णा-स्तोत्र की सतत पाठ-परम्परा की भी आकाश में ध्वनि गूंज जाती है। महाराजजी जब इन ध्वनियों को सुनते थे तो प्रसन्न होते थे। ॥ ९० ॥

द्विजानाञ्चाप्यन्तर्हितमनुसरन्तः स्वहृदये
निशीथे शास्त्रार्थे श्रुतिगुणनिकायामपि च वा।
निरुत्साहान् छात्रान् पठनविषये लग्नमनसो
विधातुं सद्वृत्तीः कुलपतिवरास्ते ददृदिरे ॥ ९१ ॥

महाराजजी हृदय से द्विजों के हित-चिन्तक थे इसी से वे रात्रि में छात्रों से शास्त्रार्थ कराते थे और वैदिक मन्त्रों का अभ्यास कराते थे। जो छात्र इन कामों में उत्साह नहीं दिखाते थे उनको भी महाराजजी द्वारा उत्तम छात्र-वृत्तियाँ दी जाती थीं जिससे उनका भी मन अध्ययन में लग जाय। ॥ ९१ ॥

अथैकस्मिन् काले श्रुतिसुभगबोधो द्विजवरः
हृषीकेशीरामः शतमुखभृते कोटिहवने।
दिदृक्षामापन्नः कुलपतिपदाम्भोजयुगले
न्यवेदीत्कर्तुञ्च श्रुतिजविधिना यागममुना ॥ ९२ ॥

एक बार वेदों के उद्भट विद्वान् ऋषिकेश निवासी पं० बालकरामजी अग्निहोत्री के मन में शत-मुख कोटि होमात्मक यज्ञ को देखने की इच्छा हुई। उन्होंने महाराजजी के चरणों में निवेदन किया कि आप एक शतमुख कोटि होमात्मक यज्ञ वैदिक विधि से करायें। ॥ ९२ ॥

श्रीकृष्णबोधाश्रमदण्डिवर्यैः
तन्मित्रमुख्यैः करपात्रसंज्ञैः ।
विद्वद्भिरन्यैः श्रुतितत्त्वविद्भिः
श्रुतान्वमोदि क्षितिदेववाणीम् ॥ ९३ ॥

यह प्रस्ताव श्री महाराजजी द्वारा श्री स्वामी कृष्णबोधाश्रमजी महाराज तथा उनके मुख्य मित्र पण्डित प्रवर करपात्री स्वामीजी महाराज तथा अन्य वेद पारङ्गत विद्वानों के कानों तक पहुँचा । सभी ने अग्निहोत्रीजी की वाणी का समर्थन किया ॥ ९३ ॥

सम्प्रार्थितो जीवनदत्तशर्मा
दुष्प्रापमन्यैर्यजमानकृत्यम् ।
स्वीकृत्य यागे समुवाह सम्यक्
सन्दर्शयन् द्रव्यवतां सुमार्गम् ॥ ९४ ॥

जिस यजमान-कर्म को अन्य लोग इच्छा करने पर भी नहीं पा सके वही यजमान-कर्म महाराजजी ने विशिष्ट-जनों के आग्रह से स्वीकार किया और धनिक व्यक्तियों को द्रव्य के व्यय का सुमार्ग प्रशस्त करते हुए उस याग में यजमान कृत्य भली प्रकार से पूरा किया ॥ ९४ ॥

स इन्द्रप्रस्थे रविजासुकूले
सम्वत्सरे वै खखखाक्षिसंख्ये ।
यागे भृतो भारतभूमिपुण्यैः
पूर्वं न दृष्टः परतो न भावी ॥ ९५ ॥

सम्वत् २००० विक्रम में यमुनाजी के किनारे दिल्ली नगर में वह याग सम्पन्न हुआ । वह याग भारत भूमि के पुण्यों के बल पर ही सम्पन्न हुआ क्योंकि इस प्रकार के उत्तम कोटि का याग न पहले कभी हुआ और न भविष्य में होने की सम्भावना है ॥ ९५ ॥

गुणाः सर्वे नार्यां दृशमभिगतास्तस्य महतः,
ऋते जायात्वात्स्वात्श्रुतिचरणशीले प्रभवतः ।
तथा दृष्टा भूते भवति समये भाविनि न च
विलुप्तिस्त्वेकापि व्रतविषयिका तत्र मनुजैः ॥ ९६ ॥

महाराजजी नैष्ठिक ब्रह्मचारी थे । अतः उनको महिलाओं में स्वजायात्व के अतिरिक्त सभी गुण मिले । महाराजजी में भी किसी भी व्यक्ति को भूत, भविष्य और वर्तमान काल में नैष्ठिक ब्रह्मचर्य के विषय में एक भी त्रुटि नहीं मिली ॥ ९६ ॥

शुभैः स्वच्छैः शुभ्रैःसदशपटखण्डैः खरतमैः
स्वदेशे सञ्जातैः खदिरसमसंज्ञैरविहतैः ।
उभे स्वे कौपीने सकटिबसनञ्चोर्ध्ववसनम्
विधायाङ्गे धृत्वा परिभवति स स्मान्तररिपून् ॥ ९७ ॥

महाराज जी शुभ, स्वच्छ, शुभ्र और बिना सिले जिनके छोर लटकते हों, मोटे अपने देश में उत्पन्न खद्दर के खण्डो से अपने दोनों कौपीन तथा कटि वस्त्र, ऊर्ध्व बनाकर शरीर पर धारण करके काम क्रोधादि आभ्यन्तर शत्रुओं पर विजय पाते थे ॥९७ ॥

विपत्यां पत्यौ वा यमसदसि जातेऽतिथिवरे-
निरालम्बाम्बाभ्यो धनवसनभाण्डादिकचयैः।
पिता वा पुत्रो वा सुहृदिव गुरुर्वापिधनिनः,
स साहाय्यं दातुं परजनहितेऽबूबुधत च ॥ ९८ ॥

जब किसी महिला के पति पर कोई भारी विपत्ति आजाती थी अथवा वह यमलोक का अतिथि हो जाता था, उस निरालम्ब अवस्था में पुत्र, पिता, मित्र, अथवा गुरु के समान महाराजजी माताओं को सहायता दिलाने को धनिकों को प्रेरित करते थे ॥ ९८ ॥

विकल्पः शास्त्राणां कुलपतिकृतानां न वचसाम्
विवृद्धया व्याकृत्यां स्वगुणपररूपे च विहिते।
कणादीये शास्त्रे व्यभिचरणदोषप्रसरणम्
विलुप्तो नैवासीत्स्वजनहृदये प्रत्ययगणः ॥ ९९ ॥

महाराजजी के यहाँ स्वाध्याय के लिए शास्त्रों का विकल्प तो था। परन्तु उनके वचनों का विकल्प नहीं होता था। इसी प्रकार व्याकरण-शात्र में ही केवल वृद्धि करने वाला सूत्र गुण तथा पररूप करने वाले सूत्र का बाधक था, न तु आश्रम में बलवान् अबल का बाधक था। व्यभिचार दोष भी कणाद प्रोक्त शास्त्र में था परन्तु आश्रम में नहीं था। एवं आत्मीय जनों के हृदय में प्रत्यय का लोप भी व्याकरण शास्त्र के समान नहीं था ॥ ९९ ॥

न सत्यं याथार्थ्यं भवति तदिह प्राणिहितदम्
न वस्त्रः काषायैः लसति यतिता कामहननैः।
न शौचं मृद्वाभ्यामपितु वसुतो व्यक्तिशुचिता
उपाशिक्षिष्टेत्थं व्यवहृतिमिषाज्जीवनवरः ॥ १०० ॥

महाराजजी अपने व्यवहार से निम्नाङ्कित उपदेशों की शिक्षा देते थे—वस्तु कीर्तन का नाम सत्य नहीं है, जिससे प्राणी का हित हो वह सत्य है, केवल कषाय वस्त्रों से संन्यासी की शोभा नहीं है यदि उसने इच्छाओं का दमन नहीं किया है। इसी प्रकार केवल पानी और मिट्टी से शुद्धि नहीं यदि व्यक्ति में धन की शुद्धि नहीं है ॥ १०० ॥

यदीये क्षीणाशः प्रतिभवति गेहेऽतिथिजनः
समादायास्मात्तत्सुकृतमखिलं पूर्वनिचितम्।
ददाति स्वं पापं नरकफलकं स्वात्मनिभृतम्
उपाशिक्षिष्टेत्थं व्यवहृतिमिषाज्जीवनवरः ॥ १०१ ॥

जिस व्यक्ति के घर से अतिथि निराश होकर लौट जाते हैं, वे उस घर के रहने वालों के पूर्व पुण्यों को लेजाते हैं तथा नरक के साधन अपने में भरे पापों को उनको दे जाते हैं। अतः कभी भी किसी भिक्षुक को निराश नहीं करना चाहिए ॥ १०१ ॥

न याचन्ते दीनाः प्रतिपदमिमे बोधजनकाः
ददध्वं दानघ्नोऽशुभगतिमितां हतुं मनसः।
नचेत्स्यादयुष्माकं परिभवफलास्माकमिवसा
उपाशिक्षिष्टेत्थं व्यवहृतिमिषाज्जीवनवरः ॥ १०२ ॥

भिक्षुक केवल माँगने नहीं आते हैं, अपितु वे पद-पद पर उपदेश भी देते हैं, कि अयि धनिको, यदि आप हमारी जैसी दुर्गति नहीं चाहते तो हमें दान दो अन्यथा ऐसा न करने से हमारी जो दुर्दशा आप देख रहे हैं वही आपकी भी होगी ।। १०२ ।।

शतं सच्छात्राणामतिथिसतिथिन्यासिवनिनः
कृतावासांस्तस्मिन् नरवरभुवश्चाश्रमपदे ।
सुवस्त्रैः सद्ग्रन्थैः सदशनचयैः स्नेहसहितै–
रकार्षीत्सन्तुष्टानणुमपि तु नात्मार्थममुतः ।। १०३ ।।

महाराजजी आश्रम में रहने वाले सैकड़ों छात्रों, संन्यासियों, वानप्रस्थियों आदि को सुन्दर वस्त्रों उत्तम पुस्तकों, सुस्वादु घृतप्लुत भोजनों से सन्तुष्ट करते थे परन्तु अपने उपयोग में विद्यालय की किञ्चिन्मात्र वस्तु भी नहीं लेते थे ।। १०३।।

विना तां गायत्रीं पणमपि तु पार्श्वे न धृतवान्
विना तां गायत्रीं पदमपि तु मार्गं न गतवान्
विना तां गायत्रीं कणमपि तु नास्ये स कृतवान्
विना तां गायत्रीं क्षणमपि न कालं स इतवान् ।। १०४ ।।

गायत्री के अतिरिक्त वे एक पैसा भी पास में नहीं रखते थे। गायत्री के विना जप के एक पैर भी मार्ग में नहीं चलते थे। गायत्री के विना जप किये एक दाना भी अन्न का मुख में नहीं रखते थे। विना गायत्री जप किये उनका एक क्षण भी व्यतीत नहीं होता था ।। १०४ ।।

स्तुता सा गायत्री दिनमनुदिनं तेन महता
पुरश्चारैः पूतैर्ऋषिभिरमला वेदजननी ।
कलङ्कैः पङ्कैर्जीवनकमलमेवं विरहितम्
व्यकासीत्पुण्येऽस्मिन् नरवरभवे जीवनजले ।। १०५ ।।

इस प्रकार उस महात्मा ने वेद माता गायत्री की पुरश्चरणों से उपासना की। एक पुरश्चरण २४ लाख बार गायत्री मन्त्र जपने से होता है। इस प्रकार नरवर स्थान के संस्थापक जीवनदत्त शर्मा के आयु के जल में कलङ्क की कीचड़ के बिना ही जीवन पङ्कज खिलता रहा ।। १०५ ।।

अथैकस्मिन् वादे क्षितिविषयके केनचिदपि
सतामाचार्याणां मतिमतितमां वीक्ष्यनिपुणाम् ।
श्रुतेर्विद्यागारे विगतभयचिन्तो यतिवरो
महायात्राकांक्षी निभृतनिजकृत्योऽभवदिह ।। १०६ ।।

एक बार विद्यालय की भूमि का विवाद किसी ने चलाया। श्रीआचार्यजी ने विद्यालय का पक्ष लिया और श्री महाराज जी दूसरे पक्ष में गये। विजय आचार्यजी की हुई। इससे महाराज जी समझ गये कि आचार्यजी की विद्यालय में पूर्ण निष्ठा है। वे मेरे बिना भी विद्यालय को चला लेंगे अतः अपने कृत्य को पूरा समझ कर परलोक गमन की सोचने लगे ।। १०६ ।।

मधौ कृष्णे पक्षे तदभिमतसिध्यै कृतमतिः
विरूपाक्षो वर्णी धनशशिखनेत्रेऽथ समये ।
समायातो द्रष्टुं कुलपतिमुखं दैववशतो
दशम्यां तं दृष्ट्वा समलभत मौनं द्विजवरः ।। १०७ ।।

एक दिन सम्वत् २०१२ विक्रम में चैत्र मास की कृष्णपक्ष की दशमी तिथि को वर्णी रूपधारी विरूपाक्ष शिवजी दैवयोग से महाराजजी के अभिमत की सिद्धि की सूचना देने के लिए महाराज जी के पास आये। उनको देखकर महाराजजी ने मौन धारण कर लिया। विशेष-इस दिन एक काणा ब्रह्मचारी महाराजजी के दर्शन करने आया था। इसका निर्देश रामस्वरूप त्रिकालदर्शी ने २० बर्ष पूर्व ही कर दिया था॥ १०७॥

अथोदीनान्खिन्नान्विलपत इतान् सर्वमनुजान्
विहायेमं देहं वसनमिव जीर्णं विषयजम्।
कलङ्कैरस्पृश्यो जनजनहितः सर्वसमयम्
गतो भूम्निस्वस्मिन् सरसिरसजे ब्रह्मणिपरे॥ १०८॥

चैत्र मास के कृष्ण-पक्ष की दशमी तिथि को समागत समाज को विलखता छोड़कर नश्वर विषयजन्य देह को जोर्ण वस्त्र के समान त्याग कर सम्पूर्ण जीवन में कलङ्कों से अस्पृश्य प्रत्येक प्राणी का हित करने वाले महाराजजो आनन्दमय सरोवर स्वरूपाभिन्न व्यापक ब्रह्म में विलीन हो गये॥ १०८॥

भृतः शोको लोके गृहिवनियतिव्याकुलकरः
प्रलिप्तानीवाङ्गानिधनतमसावै तनुभृताम्।
मुहुः श्रावं श्रावं कुलपतिकृतं ब्रह्मलयनम्
समाजग्मुर्लोका विशिथिलमनोवागसुभृतः॥ १०९॥

सारे जगत् में शोक छा गया गृहो, वानप्रस्थ, ब्रह्मचारी, संन्यासी सभी व्याकुल हो गये, प्राणियों के अङ्ग निविड़ अन्धकार से लिप्त से हो गये। महाराजजो की ब्रह्म में लीनता को सुनकर आश्रम में मन, वाणी और प्राणों में शिथिलता वाले भी सभी लोग सत्यता का अन्वेषण करने के लिये आ गये॥ १०९॥

चिताधूमे पूर्णे सुरसदसि पातालरसयो–
र्विखिन्ना भूदेवाः असुरसुरतामध्यमहिताः।
भ्रमन्तः स्वैर्नेत्रैर्जलकुसुमवृन्दानि सततम्
किरन्तः सम्प्रोचुर्दिवमनुगतोदिव्यमहिमा॥ ११०॥

जब चिता का धूम्र स्वर्ग, पाताल और पृथ्वी पर छा गया तब भूदेव, असुरश्रेष्ठ तथा सुर-श्रेष्ठ चिता की परिक्रमा करते हुए अपने नेत्रों से जल के कुसुमों की वर्षा करते हुए कहने लगे कि स्वर्ग की महिमा स्वर्ग को चली गई॥ ११०॥

कृष्णबोधाश्रमस्याथ सांयात्रिकम्
जीवनं जीवतां कृष्णबोधाश्रमम्।
कृष्णबोधाश्रमे प्राणिनां प्राणने —
प्रापयत्तं स्वयं कृष्णबोधाश्रमः॥ १११॥

कृष्णबोधाश्रम पद में कर्मधारय तथा षष्ठी तत्पुरुष समास मानकर में चला हूँ, कृष्णबोधरूप आश्रम ब्रह्म के यात्री तथा जीवों के लिए कृष्णबोध के आश्रम श्री जीवनदत्तजी महाराज को स्वामी कृष्णबोधाश्रमजी ने प्राणियों के कृष्णरूप बोधरूप आश्रम में स्वयं पहुँचा दिया॥ १११॥

सारस्वतप्रसूपित्रोः सारस्वतोपनामकः ।
सारस्वतगुरुः शास्ता सारस्वतगुरुद्रुहाम् । १ ॥
सारस्वतसमर्चायै सारस्वतसुकोरकान् । ॥
समर्पयामि सश्रद्धं सारस्वतपदद्वये ॥ २ ॥
समर्पकः साङ्गवेदाख्यविद्यागारस्य विश्रुतः ।
भूदेवैरपि वैदुष्ये विजयादिप्रकाशकैः ॥ ३ ॥
श्रीविजयप्रकाशैश्च विद्वद्भिः पाठितो मुदा ।
अध्यक्षो व्याकृतौ भागे खुर्जास्थे वेदमन्दिरे ॥ ४ ॥
लक्ष्मणदासनाम्ना यः सूरजबाबुसूनुभिः ।
चाल्यते पाल्यते प्रेम्णा श्रीरामेश्वरलालकैः ॥ ५ ॥

श्रीगुरुगुणगौरवस्मरणम्

लेखक—श्री शिवप्रसाद वासिष्ठ श्री साङ्गवेदमहाविद्यालय (नरवर)

यद्वात्सल्यरसाब्धावासीन्मनुजोऽभिषिक्तसर्वाङ्गः ।
अपितद्विन्दुरिदानींदुर्दैवाद्दुर्लभो जातः ॥ १ ॥

आर्द्रीभवति मदीयं हृदयंस्मृत्वाद्यगद्गदा वाणी ।
हन्त तथापि क्रियते श्रीगुरुगुणगौरवस्मरणम् ॥ २ ॥

हिमाचलसुतासुतोभवतुविघ्नबाधाहरो हरो हरतु चाज्ञतां गिरिजयाजयाभ्यर्चितः ।
जितेन्दुवदनाधुना ध्वनिविशारदा शारदा रदांशुजितचन्द्रिका द्रुतमभीप्सितंयच्छतात् ॥ ३ ॥

गुरुप्रसादेन शिवप्रसादः शिवप्रसादेन गुरुप्रसादः ॥
गुरुःशिवोऽथापि शिवोगुरुर्मे सदैवकल्याणदिशं प्रदिश्यात् ॥ ४ ॥

श्रीरामतीर्थादथ च प्रतीच्यां गव्यूतिगोविल्ववनादुदीच्याम् ।
श्रीजाह्नवीकूलगतो 'नरौरा' ग्रामो नलक्षेत्रसमीपवर्ती ॥ ५ ॥

रम्यः सदा प्राकृतिकैश्च दृश्यैः सेव्योऽस्ति यायावरसज्जनानाम् ।
ग्रीष्मेऽवकाशंप्रतिपद्यदूरा — च्चेतोविनोदायसमागतानाम् ॥ ६ ॥

स्थित्वा क्षणं यत्र समाधिमङ्गी—कुर्वन्ति चित्तानि चलानि पुंसाम् ।
पापौघहृद्देवसरित्सुधाम्भः सम्पर्कशीतानिलसेवितानाम् ॥ ७ ॥

विद्यातपःपूततमा महान्तः सच्चित्सुखब्रह्मविचारपूर्णाः ।
सत्साधवो यत्र समेत्य काले कालेऽनुगृह्णन्तिकृपाकटाक्षैः ॥ ८ ॥

ग्राम्याञ्जनान् वंशपरम्पराप्त — निश्छद्मसद्धर्मरुचीन् विनम्रान् ।
श्रद्धाभरेणानमितोत्तमाङ्गानातिथ्यसेवाव्रतमादधानान् ॥ ९ ॥

तस्योपकण्ठेऽस्तिविराजमानं गोपालसिद्धायतनं प्रसिद्धम् ।
तत्र वसिद्धेश्वरपीठमेकं श्रीवृद्धकेशीतिपदाभिधानम् ॥ १० ॥

अथमत्तमातङ्गलोलाकरदण्डकेनतद्वर्णनम् ।

तदिहनरवरेतिनाम्नासमाख्यातमेकं महीखण्डमाभाति रम्यं, तदेवोच्यतेवृद्धकेशीतिसंज्ञं पुराविद्भिराकीर्तितं सिद्धपीठस्थलम्, वारिपीयूषमज्जज्जनौघाघहृज्जह्नुकन्यानवद्याम्बुवीचिच्छटाकान्तकूलस्थितम् ।

यत्र संशोभमानावनौ, देवकल्लोलिनीलोलकल्लोलमालामिलन्मन्दानिलाधूतशाखासमुद्भूत शोभालसद्वल्लरीव्रातजातप्रसूनप्रभूताग्र्यसौन्दर्यमाधुर्यसौरस्यसौगन्ध्यलुब्धालिमालासमारब्धसङ्गीत—वीणानिनादानुगं तालदानं प्रकुर्वन्ति मार्दङ्गिकाः प्रीतपारावताः, कोकिलाश्चालपन्तिस्फुटं मरागालामलं लास्यलीलाललामं लता लोभनीयं वपुर्दर्शयन्त्यो मनोमोहयन्ति प्रकामं नृणां नृत्य मातत्यमन्दानिलान्दोलिताः ।

तत्र चाविक्रिया निम्बविल्वाम्रजम्बीरजम्बूवटाश्वत्थरम्भामलक्यादिनानावनोद्भूतवृक्षाः समक्षं जनानां वितीर्यात्मसम्पत्तिमेते सदर्थिभ्य आरान्महावातशीतातपक्लेशचिन्तामनादृत्य दिग्वस्त्रसंछन्न-देहाश्चिरं दुश्चरं सत्तपः कुर्वते प्रत्यहं चित्रमेतन्नकिम् ?

तत्र भूतानुकम्पाव्रतं बिभ्रतां मानवानां कथाकैव तेषां शुचौ सिद्धपीठस्थले सुस्थितिं कुर्वतां, येऽन्वहं व्यासवाल्मीकिमन्वङ्गिरोऽत्र्यादिनानामुनिव्रातसन्दिष्टसद्धर्मसंसेवनेनात्मकल्याणपूर्वं परेषां समेषां सदा मानुषाणां त्रितापोपशान्तिं परां भावयन्तो वयोऽनैपुरीशानभक्त्या समस्तं नयन्ति प्रशस्त-व्रतेनैव नेष्यन्त्यथो नास्ति संशीतिलेशोमनाक् ॥ ११ ॥

अथ नरवरभुव्यखण्डां मनोवृत्तिमास्थाय कृच्छ्रे तपस्येव सर्वं जगद्रङ्गमञ्चीयदृश्यप्रपञ्चं पराभूय निःशेषमाजीवनं नैष्ठिकब्रह्मचर्यव्रतंवोढुकामैर्निकामं महाशान्तगम्भीरमुद्राङ्कितस्मेरसम्भ्रा-जमानाननान्तः समुद्द्योतिदन्तावलिव्याजराजत्सुधासूतिशीतातप प्रोल्लस द्वाक्सुधावर्षबिन्दुप्रमन्दीकृत-श्रान्तपान्थाखिलस्वान्तसन्तापसार्थैः परार्थोद्यमैः ।

ईशनिश्वासभूतश्रुतिप्रोक्तवर्णाश्रमाचारमार्गस्थितैः, सर्वकालं करालं महाकालकालं कृपालुं समाराध्य भक्त्या महेशं मनीषासमुन्मेषकृद्वेदमातुर्मनुञ्च प्रजप्योत्तमां सिद्धिमाप्तैर्महाप्तैर्गिराम् ।

सर्वदिग्भ्रान्तकीर्तिप्रसूतप्रभोपेतलोकोपकारव्रतत्यागसन्तोषशान्तिप्रतीकैः, प्रगेस्मर्यपादाम्बुजैः श्री महाराजपादैः सुसञ्जीवनैः स्वेसमग्रेऽमले जीवने दत्तवद्वीतरागत्वमापद्यघोरे युगे संयतात्मेन्द्रिय—त्वात् प्रशस्तं शुभं तादृशं नाम सम्प्राप्तवद्भिर्महोदारचित्तैश्चतैः ।

देहगेहादिनानाविकल्पासदभ्याससञ्जातविष्वङ्महामोहसंछन्नबोधानबोधानगाधाद्भवाम्भोनिधेर्दुस्तरादुत्तितीर्षून् मनुष्यान् सदावेदवेदाङ्गवेदान्तसत्सङ्गनौभिः समुद्धर्तु मद्धासमृद्धो महादेशिकैरेषकः साङ्गवेदाभिधानो महानत्र संस्थापितो ब्रह्मविद्यालयस्तस्य ते वै स्वयं कौलपत्येऽप्यधिष्ठाय यावत्क्षयोनायुपस्तावदेतं चिरञ्चारुसञ्चाल्य च ब्रह्मनिर्वाणभावंगताः ॥ १२ ॥

तदनु च विजयश्रियः प्राप्तवन्तः प्रकाशं समाजे सतां, प्रौढपाण्डित्यसंशोभिसंख्यावदग्रेसराणां मिथः सर्वशास्त्रीयचर्चाप्रसङ्गोत्थवादेषुये, श्रीसमायुक्तपूर्वं तदेवोत्तमं नाम शर्मान्त मन्वर्थकं भूषयन्तो महान्तोऽधुना ते महाराजपादैः समादिष्टमध्वान मालम्ब्य सर्वात्मना सत्प्रयत्नैरिमं साङ्गवेदाश्रमञ्चाल-यन्ति प्रकुर्वन्ति संवर्धनं सुस्थिरामुन्नतिं प्रत्यहं तस्य ते ।

ते च प्राचार्यवर्याः समर्यादमध्यापकैश्छात्रवृन्दैः समासेविता नित्यमत्रस्थिताः स्वानबोधान्ध-कारान्धलोकेषु सद्बोधरश्मीन् किरन्तश्च तेषां समुन्मुद्रय सम्मुद्रितान्याशु हृत्पङ्कजानि स्फुटं सर्वदो दीयमानप्रभापूर्णसूर्या इवाराजमाना महाराजपादाम्बुजातानुरक्ताः समेषां सदाकामयन्ते हितम् ।

ते सदभ्यस्तषड्दर्शन प्रौढपाण्डित्यभाजां समाजात् समालब्धसत्कीर्तिहारावलीमण्डिताः सर्व तन्त्रस्वतन्त्रा महापूर्वमाहेश्वरा भौमदिव्यादिभोगेषु निर्वासनं मानसं साधु सन्धारयन्तः सदा सच्चिदा-नन्द बोधामृतापानपीना अदीनाः पुनः सर्वविद्यासमुद्राद्विजोपेतवामार्धशोभालसच्छङ्करोपासनावासना वासगेहं स्वदेहं तदाराधनासाधनं मन्यमानाः समर्चन्ति विश्वेश्वरं साम्बमीशं शिवं भक्तिभावेन मृत्यु-ञ्जयं मृण्मयम् ।

साङ्गवेदाश्रमेऽस्मद्गुरूणा मिहैषां दयावारिमन्दाकिनीपूरदूरीकृतानन्तसन्तापशिष्यव्रजानां, तपः

श्रीसमापन्नवैदुष्यभाजांसतामाधिपत्येस्थिता वन्द्यतत्पादपद्मातपत्राद्ध्रुतच्छायया निवृ तास्तद्विधेयाः समेऽध्यापकाः सन्ति सान्तेवसन्तः सदा ।। १३ ।।

इहखलु गुरुशिष्यभावानुरूपां स्थितिं साधुसम्पालयन्तः समेऽध्यापकाध्येतृलोकाः सदा व्याकृति-न्यायवेदान्तवेदार्थ साहित्य वैशेषिकज्यौतिषप्रौढ योग प्रसंख्यानतन्त्रागम श्रौतमन्त्रार्थसिद्धान्तसारान्वितं सर्व मार्षं महावाङ्मयं सेवमाना नृलोके परां दर्शयन्ति स्फुटं भारतीयां जनैरादृतां संस्कृतिम् ।

यत्र मन्वङ्गिरोयाज्ञवल्क्यादिनानामुनिप्रोक्तसद्धर्मशास्त्राणि सर्वाणि च व्यासपादप्रणीतानि नित्यं पुराणानि रामायणंभारताख्यानमावाचयन्तः पठन्तस्तथा पाठयन्तो विलोक्या भवन्ति प्रभाभासुरा भूसुराः ।

यत्र वर्णाश्रमाचारधर्मोपदेशैश्चशङ्कासमाधानशैल्या समागत्य नाना प्रदेशा द्विजिज्ञासवो मानुषाः प्राप्नुवन्तीह नैःश्रेयसीं श्रद्धया पद्धतिम् ।

यत्र चामूलचूलं समभ्यस्य शास्त्राणि सर्वाणि वैदुष्यमाप्ताः सदन्तेवसन्तो नितान्तं प्रवाचः सदा वन्द्यवृन्दारकव्रातविद्याविनोदार्णवाविर्भवन्नैकसत्सूक्तिरत्नावलीमण्डिताः पण्डिताग्रेसराः साङ्गवेदा-श्रमात् सश्रमं वेदवेदाङ्गवेदान्तविद्याव्रतस्नातकत्वंसमासाद्य सर्वत्र देशेविदेशेऽधुनाधीतिबोधप्रचार-प्रसारादिनानाप्रकारैः समस्तं ततं भारतीयं समृद्धं प्रकुर्वन्ति गीर्वाणवाण्या वरं वाङ्मयम् ।। १४ ।।

कृतयुग इव यत्र कालः श्री महाराजपादारविन्दद्वयस्पर्शसञ्जातपुण्याधिकश्रीसमापन्नभूभाग-भाक्सिद्धपीठस्थले यत्र सर्वे जना धर्मसापेक्षभावं भजन्तः समादृत्य नित्यं स्ववर्णाश्रमाचारपूतं सद-ध्वानमू रीकृतं स्वस्वकर्मात्मनीनं समभ्याचरन्तो विलोक्यन्त आधूतकामादिदोषाश्चरे स्थावरे प्राणि-मात्रे च सन्दर्शयन्तो दयाम् ।

यत्र वन्द्या यतिव्रातमूर्धन्यधन्या वनस्था गृहस्थास्तथा ब्रह्मचर्यव्रतोपेतसद्वृत्तनिष्ठाः प्रतिष्ठा-ङ्गताः श्रीमहाराजपादप्रसादान्विता आस्यजा बाहुजाश्चोरुजाः पादजाः स्वस्वसत्कर्मणाराधयन्तीश्वरं वर्णधर्मानुसारं सदा ।

यत्र वैदुष्यपूर्णप्रभोपेतशास्त्रार्थशैल्या निरस्तं महानास्तिकानां श्रुतिप्रातिकूल्यानुकूलं मतं, यत्र दण्ड्योन कश्चिन्न वा दाण्डिकः स्वस्वधर्मेरता वै स्वतःशासिताः सन्ति सन्तो महाराजपादाम्बुजासेवना-दत्तसौभाग्यभाक्पादुकाराधका स्तत्तपःसिद्धसत्यात्मसङ्कल्पशक्तेः प्रभावाज्जना मोदमानाः सदा ।

वन्द्यपादारविन्दद्वयानेकदिग्भ्रान्तकीर्ति प्रभूताग्रयशोभालसद्दण्डिसंन्यासिसन्मण्डलीमण्डिताभ्यर्च्य षड्दर्शनाचार्यविश्वेश्वरस्वामिसत्पादपाथोजनिर्यद्रसास्वादसाक्षित्वभृत्पादुकापीठकाधिष्ठितं सद्म विद्योतते यत्र शोभावहम् ।। १५ ।।

अगणितगुण गाम्भीर्यसौजन्यधन्यस्वभावाप्तसर्वाधिकख्यातिभाजां, सदभ्यागतातिथ्यसत्कार-सन्तर्पणेनाथ, नानाविपद्ग्रस्त संत्रस्तसम्प्रार्थिलोकोपकारप्रकाराशु दूरीकृताशेषसन्तापसत्कर्मणा चापि लोकप्रियत्वं गतानां सताम् ।

वेदवेदान्तचिन्तापनीताखिलाविद्यकातिभ्रमाणां महाराजपादाम्बुजानां निवासस्थले, तत्कुटीरे शुभे यत्र तद्ब्रह्मधामाप्तिपश्चात् तदीया सितप्रस्तरोत्कीर्णसौम्याकृतिमूर्तिराराजते, प्रेरणादायिनी शुद्धसद्भावनाभाविता चापि हृन्मन्दिराभ्यन्तरालेसदा श्री महाराजपादाश्रितानां जनानां मनोमोहहृत्त-न्महाभक्तिभाजां शुभा ।

यत्र सायं स्थिता वेदमातुर्जपं प्रत्यहं कुर्वतेस्माद्य सेयं शिला विल्ववृक्षादधः श्रीमहाराजपादान–नुस्मारयन्ती वियोगाधिमूढेव संलक्ष्यते ।

यत्र तत्पादपङ्क्रेरुहस्पर्शसञ्जातपुण्याप्तपूज्यत्वमाबालवृद्धैश्चभक्तैः सदाभ्यर्चितं पर्वकाले विशिष्टैश्च सम्भारजातैः समाराधितं पादुकायुग्ममत्रैव रुद्राक्षमाला तदीया तथा भस्ममञ्जूषिका चापि ताम्राघ्र्यपात्रादिकं वस्तु संस्थापितं श्रीमहाराजपादस्मृतिं कारयन्ति प्रणम्यानि तन्नश्चिरम्।।१६।।

आब्रह्मनिर्वाणमिहस्थितानामाजीवनं जीवदयामयानाम् ।
वात्सल्यपीयूषपयोनिधीनां श्रीमन्महाराजपदाम्बुजानाम् ।। १७ ।।
साकारभावं जगति श्रितानां नित्यं निराकारविवेकभाजाम् ।
नैसर्गिकानन्तगुणैर्युतानां तेषामथो निर्गुणताजुषाञ्च ।। १८ ।।
ब्राह्मीं स्थितिं प्राप्य सुनिर्वृतानां सर्वात्मभावं समुपागतानाम् ।
श्रीमद्गुरूणां गुणवर्णनं नो कर्तुं क्षमो यद्यपि बालबुद्धिः ।। १९ ।।
आपावयाम्येव तथापि वाचं स्वीयां परं तद्गुणकीर्तनेन ।
स्मृत्वाद्यतांस्तत्प्रणतिं विधातुं गीरुद्गता सम्प्रति मे किलैषा ।। २० ।।
तपसोर्जितान् सुरगिरां समवनदिशि दत्तजीवनान् ।
तद्गुरुसमुदितजीवनदत्तपदाभिधान् गुरुवरान् वयं नुमः ।। २१ ।।
यदुपासनातुलवलेन भवति भवपाशमोचनम् ।
धर्ममखिलनिगमागमसिद्धसनातनं तमुपसंश्रितान् नुमः ।। २२ ।।
धृतिमत्स्वभावविनिवारितसकलकरालषड्रिपून् ।
वेदविहितसुकृताचरणेऽनुदिनं गुरून्व्ययितजीवनान् नुमः ।। २३ ।।
श्रुतिमातरं समुपसेव्य विहितविमलान्तरिन्द्रियान् ।
त्यागशमदमदमादिगुणैः समलङ्कृतान् सफलजीवनान् नुमः ।। २४ ।।
जनमात्रमानससरोरुहरुचिरविकासभास्करान् ।
संस्कृत मथ निजसंस्कृतिमप्युददीधरन् यइहतान् गुरून् नुमः ।। २५ ।।
प्रतिसम्प्रदायगतमानवविहितपरादरान् सदा ।
हिन्दुयवनजनतानतमौलिसमर्चितांघ्रियुगलान् गुरून् नुमः ।। २६ ।।
श्रवणेन्द्रियाभरणतां प्रतिदिवसमुपागतं नृणाम् ।
लौकिकमपि परलोकहितं वचनं यदीयमिहतान् गुरून्नुमः ।। २७ ।।
अभिवाञ्छितं सपदि सिद्धमभवदखिलं यतोऽर्थिनाम् ।
याचकजनहितकल्पतरूपमविग्रहान् प्रथितजीवनान् नुमः ।। २८ ।।
व्रन मास्थितानार्विजितेन्द्रियगणजनदुर्लभं परम् ।
नैष्ठिक ममृनमयाचितमप्यथ वर्तनं भृशमुपाश्रितान् नुमः ।। २९ ।।
वसुदेवसूनुमुखनिर्गतमुपनिपदां सुधारसम् ।
आलय मनुदिवसं प्रणिपीय सुनिर्वृता नजरजीवनान् नुमः ।। ३९ ।।
श्रुतिमातृमन्त्रजपकर्मणि परमपरायणान् सदा ।
निर्जरसरिदवगाहसुनिर्मलविग्रहान् महितजीवनान् नुमः ।। ३१ ।।

परमोपकारपरया निजकुशलधिया समेधितान् ।
तानवनतशिरसा समुपार्जितसद्यशोंऽशुधवलीकृतान्नुमः ॥ ३२ ॥
मनुयाज्ञवल्क्यसमुदीरितसुकृतपथानुयायिनः ।
सुस्मितविमलवलक्षरदावलिभूषितास्यसरसीरुहान् नुमः ॥ ३३ ॥
उपदेशदर्शितदिशावनिसुरभुजजार्यपादजाः ।
स्वस्वचरितरतयोविहिताः किल यैरुदारचरितानमून् नुमः ॥ ३४ ॥
सुविपश्चितः सकलसद्गुणगुरुतरकीर्तिराजितान् ।
बुद्धिविभवजननं श्रुतिमातृमनुं सदैव जपतां वरान् नुमः ॥ ३५ ॥
वृतभूसुरेण सरुजोजपनिजपितृवारिकर्म ये ।
सान्ध्यविधिसुरसमर्चनपूर्वमकार्षुरासुविगमं गुरून् नुमः ॥ ३६ ॥
परमात्मतत्त्वमधिगत्य दुरधिगमशाश्वतं पदम् ।
दुश्चरतपसिरता निरतं य उपागताः सपदितान् गुरून् नुमः ॥ ३७ ॥
वयमावितत्य पदवन्दनममरगिरा कृतार्थताम् ।
सम्प्रति मनसि मुदा बिभृमो गुरुपादपङ्कजपरागनिर्वृताः ॥ ३८ ॥
लोकाः समस्तास्तपसा जितायैः पराजिताः षड्रिपवो बलिष्ठाः ।
निरन्तरायः परलोकमार्गो व्यधायिपूर्णकृतमात्मकृत्यम् ॥ ३९ ॥
वसन्ति ये मानसमन्दिरेषु दयालवोऽन्तेवसतां जनानाम् ।
विधीयतेतत्पदकञ्जपूजा श्रद्धारसाविप्लुतभावपुष्पैः ॥ ४० ॥
प्रासीसरन् संस्कृतभारतीं ये लोकोपकारव्रतमादधानाः ।
वर्णाश्रमाचारपरम्पराप्तं सनातनं धर्मपथं प्रपन्नाः ॥ ४१ ॥
नित्यं समेषां विपदन्तकामा दयाद्रवीभूतसदाशया ये ।
यशोयदीयं शशिशुभ्रमस्मिन् विराजते भारतभूमिभागे ॥ ४२ ॥
श्री साङ्गवेदाश्रममाध्यमेन येऽकार्षुरत्रामरशारदायाः ।
समुन्नतिं तानभिनन्द्यकीर्तीन् वन्दामहे जीवनदत्तपादान् ॥ ४३ ॥
जीवनदत्ता अपि ते लोकेऽस्मिन् दत्तजीवना आसन् ।
दत्तात्रेयभगवतो जीवनमिव जीवनं येषाम् ॥ ४४ ॥
श्रीमज्जीवनदत्तैरन्वर्थंनामधारितं लोके ।
संस्कृतरक्षायां यैः सम्पूर्णं जीवनं दत्तम् ॥ ४५ ॥
नरवरभुवि संस्था साङ्गवेदाभिधाना गुरुवरचरणानां भौतिकीमूर्तिरेषा ।
मनसि वचसि काये स्नातकानां समेषां प्रयतनमभिवाञ्छत्यालयं स्वाभिवृद्धयै ॥ ४६ ॥
प्रतिदिनमधिकामुपैतु वृद्धिं सुरतटिनीतटवर्तिनी तदीया ।
नरवरभुविसाङ्गवेदसंस्था भवतु चिरं फलितापि पुष्पिताग्रा ॥ ४७ ॥

संस्मरणाञ्जलिः

पाद-प्रमाध्यासमयो मृषाऽपि, प्रभासते सन्निव सुप्रपञ्चः ।
यस्मिन्नधिष्ठानमयेऽ द्वितीये, तज्जीवनं तंत्वमहम्भजामि ॥ १ ॥

सविलास अज्ञान के विषयीभूत जिस अद्वितीय तत्व में भ्रान्त्याभास-स्वरूप होने से मिथ्या होता हुआ भी यह सुन्दर जागतिक प्रपञ्च वस्तुसत्ता-सा भासित होता है उस जीवन तत्व (अनारोपित स्वरूप) को मैं भजता हूं ॥ १ ॥

श्रीमज्जगन्नाथ-गया-प्रसाद, साकास्-तीर्थद्वय-सम्प्रयुक्तः ।
सारस्वते श्रद्ध-विधौ गुरूणाम्, श्राद्धाञ्जलीन् कल्पयितुं प्रवर्त्ते ॥ २ ॥

श्रीमती जगन्नाथपुरी तथा श्रीमती गयापुरी (दोनों पवित्र तीर्थ स्थानों) के प्रसाद ही श्रीमान् पं० जगन्नाथप्रसाद शर्मा (स्मृतिग्रन्थ प्रकाशन समिति के अध्यक्ष) तथा श्रीमान् पं० गयाप्रसाद उपाध्याय (स्मृतिग्रन्थ-समिति के मन्त्री) के रूप में साकार हुए दो तीर्थों (विद्वान पुरोहितों) द्वारा अच्छी प्रकार आसप्त मैं गुरूदेव के वाङ्मय श्राद्ध में श्रद्धा-समन्वित उञ्जलियों की रचना करने के लिए प्रवृत्ति होता हूँ ॥ २ ॥

शब्दास्तिलानक्षत-याव-युक्तान्, अर्थञ्च गङ्गोदक-दिव्य-रूपम् ।
स्वां लेखनीं सत्कुश-मुष्टि कल्पा,मास्थाय कुर्वे गुरवे निवापम् ॥ ३ ॥

यहाँ त्रिविध शब्द ही अक्षत, यव के सहिततिल हैं, अर्थ ही गङ्गोदक के समान दिव्य रूप वाला है तथा मेरी लेखनी ही अच्छे कुशाओं का मूठा है । इतनी मात्र साधन-सामग्री लेकर मैं गुरूदेव के लिए पितृदान कर रहा हूं ॥ ३ ॥

आचम्य संयम्य च चित्तवृत्ती, यथा-यथान्तर्मुखता मुपैमि ।
तथा-तथा संस्मृति-पट्टके मे, विचित्र-चित्राणि समुल्लसन्ति ॥ ४ ॥

आचमन-प्राणायाम करके मैं जैसे-जैसे अन्तर्मुखता को प्राप्त होता हूं वैसे-वैसे ही मेरे संस्मरण रूप पटल पर अनोखे चित्र उभरते हैं । ४ ॥

कानि तानि चित्राणीत्याह,—

संस्वाप-सम्प्रत्त-महासुखायाः, यामे तुरीये सुभगे निशायाः ।
प्रद्धय यन्नाद् गुरूमासनस्थम् आत्म स्वरूपं कलयन्तकीक्षे ॥ ५ ॥

सम्यक् निद्रा द्वारा दिया है महान् सुख जिसने ऐसी रात्रि के सुन्दर चतुर्थ प्रहर में प्रयत्न-पूर्वक जग कर आसन पर विराज कर आत्म स्वरूप का चिन्तन करते हुए गुरूदेव को देख रहा हूं ॥ ५ ॥

ब्राह्मे मुहूर्ते कृत-बाह्य-शौचम्, प्रातस्स्मृते वैदिक-सूक्तमेकम् ।
गीतान्तथा विष्णुसहस्रनामान्यावर्तयन्तं गुरूदेवमीक्षे ॥ ६ ॥

ब्राह्म मुहूर्त में बाह्य शुद्धि करने के अनन्तर प्रातः स्मरण के एक वैदिक सूक्त (प्रातरग्नि प्रातरिन्द्र इत्यादि) का, गीता तथा विष्णु सहस्रनाम का पाठ करते हुए गुरूदेव को में देखता हूँ ॥ ६ ॥

व्युत्पित्समानै रधिशास्त्र-वृदम्, विद्यार्थि-वृन्दैरनुगम्यमानम् ।
शास्त्रार्थ-विज्ञान-दिशं दिशन्तम्, गङ्गा व्रजन्तं गुरुदेवमीक्षे ॥ ७ ॥

विविध शास्त्रों में व्युत्पत्ति की कामना करते हुए विद्यार्थियों की टोलियों से अनुगमन किये जाते हुए एवं उन छात्रों को शास्त्रों के अर्थ जानने का दिग्दर्शन कराते हुए गंगा की ओर जाते गुरुदेव को मैं देखता हूँ।

निर्वर्तित-स्नान-विधि विधानैजपन्तमन्तह्य घमर्षणानि ।
प्रत्यूष-सन्ध्यामभिवन्दमानम्; गुरुं विलोके निगमागमज्ञम् ॥ ८ ॥

शास्त्रविहित प्रकारों से सम्पादन की है स्नान क्रिया जिन्होंने, जल के भीतर अथवा मन में अघमर्षण मन्त्र का जप करते हुए, प्रातःकालीन सन्ध्या-वन्दन करते हुए, वेद-शास्त्रों के विद्वान् गुरु महाराज को मैं देख रहा हूँ।

भावार्द्र-दृष्ट्याथ विभाव्य साक्षा-दुपस्थितं पितृ-कुलं पुरस्तात् ।
सन्तर्पयन्तं सलिलाञ्जलीभिः; पश्यामि तं जीवनदत्तमीड्यम् ॥ ९ ॥

इसके अनन्तर समक्ष उपस्थित हुए पितृकुल को प्रेमार्द्र दृष्टि से साक्षात् देखते हुए, जलाञ्जलियों से सन्तर्पित करते हुए विख्यात श्री जीवनदत्तजी महाराज को मैं देख रहा हूँ।

सावित्र-वर्चो-विभवैकतान— ध्यानेन मन्त्रस्य गतिं मिमानम् ।
बिल्वस्य मूले कमलासनस्थम्, साक्षात्करोमीव गुरुं गिरीशम् ॥ १० ॥

भगवान् सविता के तेजःपुञ्ज के एकटक ध्यान से मन्त्र (गायत्री) की उच्चारण गति को नापते हुए, बिल्व वृक्ष के मूल में वेदी पर पद्मासन से बैठे हुए गुरुदेव को मैं भगवान् शंकर की भांति साक्षात् देख रहा हूं।

विधेरनासक्तधिया कृतस्य, रात्रिन्दिवं पुण्य-फलं यथाप्तम् ।
शिवाशिवाभ्याम्मनसार्पयन्तं, शिवालये सद्गुरुदेवमीक्षे ॥ ११ ॥

निष्काम बुद्धि से अहोरात्र में किये हुए कर्म के फल को यथा प्राप्त रूप में शिव-पार्वती के लिए मन से समर्पित करते हुए सद्गुरु श्री महाराज जी को मैं शिव-मन्दिर में देखता हूं।

वृन्दागतांश्छात्रबटून्समन्ता— दुपस्थितान्बोध-नद-प्रवाहम् ।
वेदांस्तदङ्गानि सभाष्य-वृत्ती,न्यध्यापयन्तं गुरुदेव मीक्षे ॥ १२ ॥

टोली-की-टोली आकर चारों ओर उपस्थित विद्यार्थी-ब्रह्मचारियों को चारों वेद, ६ वेदाङ्गभाष्य तथा वृत्ति सहित—इस प्रकार जिसमें ज्ञान-नदी का प्रवाह चल रहा हो, पढ़ाते हुए गुरुदेव के दर्शन कर रहा हूँ।

मध्याह्न कालेऽभिषवं विधाय, तत्काल-सन्ध्यामभिवन्दमानम् ।
वेदत्रयी-सार-मनुं जपन्तं, गुरुं विलोके श्रुति-कर्म-निष्ठम् ॥ १३ ॥

मध्याह्न काल में स्नान करके तत्कालीन सन्ध्या-वन्दन करते हुए, तीनों वेदों के सारभूत गायत्री मन्त्र को जपते हुए, वैदिक कर्म कलाप में निष्ठा वाले गुरु महाराज का मैं दर्शन कर रहा हूं।

स्वयम्प्रकाशंविभुमात्मदेवम्, विश्वेन कामं हविषा यजन्तम् ।
भूतेन्द्रियेभ्यो बलिमुत्सृजन्तं, गुरुं विलोके द्विज-कर्म-दक्षम् ॥ १४ ॥

स्वयम्प्रकाश, व्यापक आत्मदेव को जगत्स्वरूप हवि से यजन करते हुए, भौतिक इन्द्रियों के लिए बलि उत्सर्ग करते हुए, ब्राह्मणोचित कर्मों के सम्पादन में निपुण महाराज जी को मैं देखता हूं।

सुस्वागती कृत्य वरैर्वचोभिः, संभोज्य यत्नादतिथीन्समेतान्।
स्वयं मुदा सात्त्विकमाहरन्त, मातृप्ति पथ्यं विधिना प्रणीतम् ॥ १५ ॥

आये हुए अतिथियों का सुन्दर वचनों से स्वागत कर, यत्न-पूर्वक भोजनादि से सन्तुष्ट कर, स्वयम् भी प्रसन्न मन से विधि पूर्वक सम्पादन किये हितकर, सात्त्विक भोजन को तृप्ति पर्यन्त पाते हुए गुरुवर को मैं दृष्टिगत करता हूं।

राज्ञो धनाढयान् विदुषो यतीन्द्रान्, नियोक्तुकामं परमार्थ-मार्गे।
पत्रं प्रबध्नन्तमथाभिरामम्, मयाऽथवा साधु निबन्धयन्तम् ॥ १६ ॥

इसके पश्चात् राजाओं को, धन-कुबेरों को, विद्वान् तथा श्रेष्ठ संन्यासियों को जन-हित कार्यों में लगाने की इच्छा वाले, एतदर्थ पत्र का सुन्दर मसौदा स्वयम् बनाते हुए अथवा मुझ (इन पद्यों के निर्माता) से बनवाते हुए गुरुदेव को मैं देख रहा हूँ।

बाल्मीकि-पाराशर-सम्प्रणीताः, कथास्तथा नैगम-धर्म-मुख्याः।
व्यासेन केनापि बुधेन वापि, व्याख्यायमानाः सरसं पिबन्तम् ॥ १७ ॥

समय-समय पर किसी कथा वाचक अथव विद्वान् प्रवचन कर्ता द्वारा सरस प्रकार से व्याख्या की जाती हुई बाल्मीकीय रामायण, व्यासकृत महाभारत, वेद तथा धर्म-शास्त्र प्रधान कथाओं को सादर श्रवण करते हुए श्री महाराज जी को मैं देख रहा हूँ।

वर्णाश्रमाचार-विचार-नीतौ, सनातने धर्मपथे तथेशे।
शंका-कलङ्कान् सकलान् स्व-वाचाम्, पीयूष-वर्षैः परिमार्जयन्तम् ॥ १८ ॥

ब्राह्मणादि वर्णों, ब्रह्मचर्यादि आश्रमों से सम्बन्धित विचार एवं व्यवहारों के विषय में, सनातन धर्म के सिद्धान्तों पर तथा ईश्वर के सम्बन्ध में उपन्यस्त समस्त शंका रूप कलंकों को अपने तर्कवचनों के अमृतमय प्रवाह से प्रक्षालित करते हुए गुरुदेव को मैं दृष्टिगोचर कर रहा हूँ।

स्नात्वा शुचीभूय दिनावसाने, सायन्तनं सान्ध्य-विधिं विधाय।
शान्तोपविष्टं कुशमुष्टि-हस्तं, सावित्र-मन्त्रं प्रजपन्तमन्तः ॥ १९ ॥

दिनान्त काल में स्नान कर, पवित्र होकर तथा सायंकालीन सन्ध्या विधि को समाप्त कर शान्ति पूर्वक आसन पर बैठे हुए, हाथ में कुश-मुष्टि थामे हुए, गायत्री-मन्त्र का मानस-जप करते हुए गुरुदेव को मैं देख रहा हूँ।

नीराजन-प्रीत-हृदा हरेण, नोनुद्यमानैरिव शिष्य- वृन्दैः।
नन्नम्यमानौ चरणारविन्दौ, ध्याये गुरोः प्रश्रयमादधानैः ॥ २० ॥

आरती करने से प्रसन्न हृदय शंकरजी से मानों बार-बार अत्यन्त प्रेरित हो रहे हों—ऐसे विनीत शिष्य-समूह से अतिशय वन्दित होते हुए गुरुदेव के सुन्दर चरणों को मैं ध्यान कर रहा हूं।

इत्थं समस्तं दिवसं व्यतीत्य, तपोमयैश्चिन्तन-चारु-कार्यैः।
विशन्तमानन्दमयीं निशायानिद्रां, गुणातीतया प्रकाशाम् ॥ २१ ॥

इस प्रकार विचारपूर्वक सुन्दर तपोमय कार्य कलापों से समस्त दिन को व्यतीत करके रात्रि-काल में गुणातीत होने के कारण प्रकाशपूर्ण आनन्दमयी निद्रा में प्रवेश करते हुए गुरुदेव का मैं दर्शन कर रहा हूँ।

षडङ्ग-वेदाध्ययनेन पूतम्, लोकोत्तरं यस्य महच्चरित्रम् ।
श्रीभीमसेनेन सताम्मतेन, विकासमानीयत तं स्मरामि ।२२॥

जिनका षडंग वेद के अध्ययन से पवित्र, लोकोन्त्तर, महान् चरित्र विद्वद्वर पं॰ भीमसेनजो वेद-व्याख्याता द्वारा विकास को प्राप्त कराया गया उन श्री जोवनदत्तजी गुरुवर को मैं स्मरण कर रहा हूं।

विद्या-तपस्त्याग-परीत-जातौ, द्विजत्वमूलं निहितं विदित्वा ।
योऽस्थापयन्नार वरे प्रदेश, सदाश्रमं संघमिवाश्रमाणाम् ॥२३॥

द्विजत्व का मूल विद्या, तप, त्याग से समन्वित जन्म के आधार पर स्थित है—ऐसा जानकर जिन गुरुदेव ने 'नरवर' स्थान पर ब्रह्मचर्यादि आश्रमों का संघ जैसा सुन्दर आश्रम स्थापित किया—मैं उन गुरुजी को स्मरण करता हूँ।

आद्यक्षरं जीवनमेव दिव्यम्, विश्वेश्वरं चैव परं गृहीत्वा ।
प्रत्याहरद्यो विजयप्रकाश–विद्वत्स्वशिष्यैर्गृहि-काननस्थौ ॥२४॥

जिम गुरुदेव ने दिव्य जीवन (अनासक्त जीवन अथवा तपोमूर्ति ब्रह्मचारी जीवनदत्तजी महाराज) को ही आदि अक्षर मानकर, प्रकृति से परे अथवा तुर्याश्रमी विश्वेश्वर (परब्रह्म अथवा पण्डित स्वामी अनन्त श्री विश्वेश्वराश्रमजी दण्डी) को अन्तिम अक्षर ग्रहण कर एवं विद्वद्वर आचार्य श्री विजयप्रकाशजी महाराज तथा उनके शिष्यमण्डल को गृहस्थी और वानप्रस्थाश्रमी रूप में अन्तः पाती अक्षर लेकर प्रत्याहार की स्थापना की-- मुझे उनका स्मरण हो रहा है।

यहाँ यह स्मरणीय है कि महावैयाकरण पाणिनि ने प्रत्याहार प्रणाली की अद्भुत स्थापना 'आदि रन्त्येन सहेता'—अष्टाध्यायी १-१-७१ सूत्र द्वारा प्रस्तुत की है। गुरुदेव ब्रह्मचारी जीवनदत्तजी महाराज ने भी प्रकृत आश्रम (महाविद्यालय नरवर) की स्थापना में इसी प्रणाली का उपयोग किया था। शास्त्रीय गम्भीर सिद्धान्तों को लौकिक उपयोग में लाने की उनमें अद्भुत क्षमता थी।

आवर्जितो यत्तपसा विवस्वान्, विधेयमेकं भुवि सूर्यमल्लम्।
नाम श्रुतं प्रेषितवान् यदीया - नाजन्म सम्पालयितुं निदेशान् ॥२५॥

जिनकी तपस्या से वशीभूत हुए सूर्य भगवान् ने जिन गुरुदेव के आदेशों का आजन्म पालन करने के लिए अपने आज्ञावर्ती श्री सूर्यमल्ल (से॰ श्री सूर्यमलजटिया), (खुरजा) को जो इसी अन्वर्थ नाम से विख्यात हुए भेज दिया—उन गुरुदेव को मैं स्मरण करता है।

प्रवर्तनायेव कलौ कृतस्य, महामखान् कोटिमुखान् यजन्तम्।
यज्ञावसाने च महाधनानि, सद्याजकेभ्यः प्रतिपादयन्तम् ॥२६॥

मानों कलियुग में सतयुग की अवतारणा करने के लिए ही अनेक शतकोटिमहायज्ञों का यजमानत्व करते हुए और यज्ञों के अन्त में पुष्कलधन विद्वान् याजकों के लिए प्रदान करते हुए गुरुदेव को मैं स्मरण करता हूँ।

विद्यालयोन्नीतिकरानुपायान्, श्रीनन्दलालाय समादिशन्तम् ।
आसञ्जयन्तं विजयप्रकाशे, विद्याव्यवस्था विदुषां वरेण्ये ।। २७ ।।

विद्यालय (महाविद्यालय नरवर) की उन्नति करने वाले उपायों का श्री नन्दलाल शर्मा (उक्त विद्यालय को तत्कालीन प्रबन्धक अथवा कृष्ण भगवान्) के लिए आदेश करते हुए तथा ज्ञानोपलब्धि की समस्त व्यवस्थाएं श्री विजयप्रकाश शर्मा (उक्त विद्यालय के तत्कालीन और वर्तमान में भी प्राचार्य) को सौंपते हुए गुरुदेव को मैं स्मरण करता हूँ ।

नवा नवाः सन्निधयो नवापि, सकाश-बिल्वादि-वनादुपेत्य ।
आजीवनं यच्चरणाम्बुजेषु, विशश्रमुस्तं मनसा स्मरामि ।। २८ ।।

नवीन-नवीन नौ भी अच्छी २ निधियां (अनेक प्रकार की समृद्धियां कुबेर के नो कोष अथवा स्व० पं० नवनिधि शास्त्री पाठक, उक्त विद्यालय के तत्कालीन उपाचार्य) समीप की बेलौन आदि बस्तियों से आकर अथवा कास समेत बेलों के वनों से आकर जहां आजीव (अपने जीवन भर अथवा जब तक गुरुदेव रहे तब तक) जिनके चरण कमलों में विश्राम पाते रहे—उनको मैं मन से स्मरण करता हूँ ।

यत्प्रेमतो भोग-सुखं विहाय, नारायणो मन्त्रि पदेस्थितोऽभूत् ।
गृहीत-दण्डोऽपि मुदाश्रमान्ताम्, जहाति नाद्यापि नरोत्तमाख्याम् ।। २९ ।।

जिन गुरुवर के प्रेम के कारण नारायण (श्रीमान् पं० नारायणदत्तजी महाराज अथवा शेषशायी विष्णु भगवान्) भोग (सांसारिक सुख अथवा शेषनाग-शय्या) का सुख त्याग कर मन्त्रिपद पर स्थित हुए (पं० नारायणदत्तजी ने महाविद्यालय के मन्त्रिपद का भार संभाला अथवा शेषशायी विष्णु ने मन्त्रयोगी या जपयोगी ब्र० जीवनदत्तजी महाराज के चरणों में स्थिति प्राप्त की) । केवल अतीत में ही नहीं आज भी पं० नारायणदत्तजी प्रसन्नता से दण्ड ग्रहण कर लेने पर भी दण्डी संन्यासी हो जाने पर भी दण्डनीति का आश्रय करने पर भी) आश्रम-पदान्त नरोत्तम नाम को नहीं त्याग रहे हैं । (नरोत्तम-नरवर, नरोत्तमाश्रम;–नरवराश्रमः) । महाराजजी के अनुराग के कारण ही मन्त्री नारायणदत्त अपना दण्डिनाम भी 'नरोत्तमाश्रम-नरवराश्रम रख रहे हैं । पक्षान्तर में द्रण्ड ग्रहण-मात्रेण नरो नारायणो भवेत्' की फलव्यवस्था की अवहेलना कर नारायण नरोत्तम होने में अपना अधिक गौरव-गर्व अनुभव कर रहे हैं । जिनके प्रेम से यह हुआ है, हो रहा है उन गुरुदेव का मुझे स्मरण आ रहा है ।

हरिहरश्चाद्वयतामुपेतम्; चैतन्य-युग्मं-धृत-वर्णि-वेषम् ।
यदाशिषा नन्द-सरस्वदोधम्; सम्प्राप तं जीवन मामनामि ।। ३० ।।

विष्णु और शिव नामक चैतन्य-युगल अद्वयता (एकता) को प्राप्त कर ब्रह्मचारी वेश धारण करके जिनके आशीर्वाद से आनन्द सरस्वती के प्रवाह में मग्न हुआ मैं उस जीवन का ध्यान कर रहा हूं ।

हरि-हर-चैतन्य ब्रह्मचारी वेष में प्रणत हो जिन ब्र० जीवनदत्तजी महाराज के आशीर्वाद से हरिहरानन्द सरस्वती रूप में पहुँचा उनका मुझे मन में स्मरण हो रहा है ।

श्रीकृष्ण-बोधायित-सर्वसृष्टिः; श्रीशंकराचार्य-पदोपगूढः ।
श्रीकृष्ण बोधाश्रम-वीतरागो–ह्यद्यापिनिध्यायति यत्सुनिष्ठाम् ।। ३१ ।।

श्रीकृष्ण ज्ञान रूप में समझा है समस्त प्रपंच को जिन्होंने, श्रीशंकराचार्य के पद ने स्वयम् जिनका आलिंगन किया है—ऐसे वीतराग अनन्त श्रीकृष्ण बोधाश्रमजी महाराज आज भी जिनकी सुन्दर धर्मनिष्ठा का चिन्तन करते रहते हैं उन गुरुवर महाराजजी की स्मृति मन में उठ रही है।

यल्लन्ध-विद्या-विभवैः समृद्धो–विष्णवाश्रमः श्रीशुकताल-तीर्थे।
विश्रान्तिदो भागवत-प्रसंगैः शुकायते दग्ध-परीक्षिदोघे ॥ ३२ ॥

जिन गुरुदेव से प्राप्त विद्या-धन से समृद्धिशाली हुए अनन्त श्री विष्णु आश्रम महाराज श्री शुकताल नामक तीर्थ में श्रीमद्भागवत के कथा प्रसंगों अथवा भगवत्प्रसंगों से विश्रान्ति प्रद हो सांसारिक ज्वाला से झुलसे परीक्षितों के समूह में शुकदेव का आचरण करते हैं उन गुरुवर की स्मृति मन में हो रही हैं।

किं चित्रितैस्तैश्चरितै रनन्तै–र्यान्यद्य धैर्यं प्रविलापयन्ति ।
चेतः समाधातुमतो यतेऽहम्; श्राद्धे निषिद्धोहि शुचाश्रुपातः ॥ ३३ ॥

उन अनन्त चरितों के चित्रित करने से क्या जो आज (उस छाया के न रहने पर) धैर्य को विलीन करते हैं। अतः मैं चित्त को शान्त करने का प्रयत्न करता हूँ। क्योंकि श्राद्ध में शोक से अश्रुपात शास्त्र-निषिद्ध है।

श्रीमज्जीवनदत्त-सूरि-सुगुरोः; पादारविन्दद्वये
सौभाग्येन चिरं मयातिगमितं; प्रीते प्रतीते वयः ।
तत्सम्पर्क-मनश्रितैः सुचरितैः; स्मृत्यंजलावर्पितैः;
प्राप्त-ब्रह्म-पदाभितृप्यतु तरां; सा जीवनाख्या चितिः ॥ ३४ ॥

विद्वद्वर गुरुदेव अनन्त श्री जीवनदत्तजी महाराज के चरण-कमलों की प्रसन्न और पवित्र छत्र छाया में सौभाग्य से मैंने चिरकाल तक जीवन का भाग व्यतीत किया है। उनके सम्पर्क काल में मन में संजोए हुए सुन्दर चरितों से जो इस समय इस संस्मरणाञ्जलि में निविष्ट किये गये हैं, वह ब्रह्मीभूत, विख्यात, व्यापक जीवन तत्व सन्तृप्त हो।

बहोरिदत्तस्य कवे गुरूणाम्; शृंगार-भृङ्गस्य पदाम्बुजेषु।
समर्पिता संस्मृति-पद्यमाला; प्रीणातु नित्यं सुमनोमनांसि ॥ ३५ ॥

गुरुजनों के चरण कमलों में भ्रमर रूप से शोभा पाते हुए कवि बहोरिदत्त शर्मा की उन्हीं चरणों में समर्पित यह संस्मरण-पद्यपुष्प-माला सर्वदा विद्वज्जनों के मनों को प्रसन्न करती रहे।

बहोरिदत्त शर्मा, साहित्यायुर्वेद-सांख्ययोग-वेदान्ताचार्य,
काव्य-पुराण तीर्थम्,
एम० ए० (संस्कृत, हिन्दी)
साहित्य रत्नम् आदि
पीली कोठी, टूण्डला (आगरा)

"जीवन-संस्तुतिः"

(ले० श्री श्यामलाल शर्मा, प्र० आ० श्रीधर्म संघ महावि० देहली)

गाङ्गं वारिपुनाति वीचिनिचयैर्यस्याजिरं सन्ततम्,
सेवन्ते सुधियश्च यत्र मुदिता आम्नायमङ्गैः सह ।।
यू० पी० मध्यगतो बुलन्दशहरस्तस्यास्ति पूर्वाञ्चले,
विद्वत्तल्लजसेव्यमानमनिशं श्री ब्रह्मचर्याश्रमम् ।।१।।

भूदेवा व्रतिनस्तथेह गृहिणोऽरण्यस्थिता भिक्षवः,
शिक्षन्ते, गृहमाश्रयन्त्यपितपस्यन्त्यासते ब्रह्मणि ।।
श्रीमज्जीवनदत्तशर्मसुधियां निष्ठावतां त्यागिनाम्,
सिद्धोऽयत्नफलोदयो 'नरवरे' विद्यालयो राजते ।।२।।

गायत्रीं जपतां बुधश्च जुषतां, गङ्गाजलैस्तृप्यताम्,
तृप्तिं यावदभीप्सिताः, श्रुतवतां गाथाश्च पौराणिकीः ।।
छात्रांश्चौरसपुत्रवत्कृपयतां शिक्षावतः कुर्वताम्,
श्रीमज्जीवनदत्तशर्मविदुषामांर्षपदं मन्महे ।।३।।

यस्योद्यानजपुष्पपुंजरचिते वाते मृदौ शीतले,
घ्रायं घ्रायमतीव सौरभभरं मोदन्त एवाधुना ।।
स्वामि श्री 'करपात्रीजी' हरिहरानन्दादयो योगिनः,
गायन्त्युन्मनसः शिवं परतरं यत्रोदितं सर्वदा ।।४।।

यत्र श्री 'विजयप्रकाश' विबुधा अग्रेसरा ज्ञानिनाम्
प्राचार्या विविध-प्रमाण-पटवोऽन्तेवासिवृन्दार्चिताः ।।
स्वाध्यायादिविधौ निरस्तसकलव्यापार-बद्धस्पृहाः
निस्तन्द्राः समुपासते सुरगिरं विद्यार्थिहृद्वासिनः ।।५।।

यत्रासन् विविधाः कुटीरनिवहा अग्रेभुवां वर्णिनाम्,
वेदान् घोषयतां निषेधविधिवच्छास्त्राणिचाभ्यस्यताम् ।।
सत्ये ब्रह्मणि कल्पितं जगदिदं रज्जौ यथाहिस्तथा,
इत्येवं परमात्म-जीव जगतां चिन्ता जुषां सच्चयाः ।।६।।

श्रौतस्मार्तविधौ रतानहरहर्ग्ृ ह्याग्निपूजापरान्,
गार्हस्थ्ये वसतोऽवल्लोकन परः कोऽसौ सुखं नाप्नुयात् ॥
तुर्येऽप्यत्र युगे कलौकलयति त्रेतायुगस्यच्छटाम्.
चत्वारो युगवर्णवेदविभवाः सन्तीह मन्यामहे ॥७॥

एकस्मिन् लघुकायभूमिविषये पुण्ये कुटीरे वसन्,
यस्याद्याप्यजिरे पतत्त्रिनिवहैः संसेव्यमानस्तरुः ॥
मालूरो निशि यस्य शीतलतले प्रायो जनांस्तर्पयन्,
सावित्रंमनुमाजपन् वितनुते तेजस्वितां कश्चन ॥८॥

हं हो ! कालकरालः ! तेऽस्ति विदिता सर्वेगंतिर्निन्दिता,
यत्त्वं नैव कदापि कस्यचिदपि क्षन्तासि शुभ्रान् गुणान् ॥
कारुण्यं तव नास्ति येनसुधियामाधारभूतो महान्,
शोचत्यर्थिजने प्रभातसमये क्रोडीकृतो द्राक्त्वया ॥९॥

विप्राणां न च केवलं समभवत् शर्माणि कर्तु क्षमः,
योह्यागच्छदनीश्वरः स्वविपदां शान्त्यै रुदन्दुर्मनाः ॥
कार्यंतस्यचिकीर्षतो न मनुते भारं यदीयं मनः,
सोऽस्मान विक्लव चेतसः परिहरन, यातो दिवं पुण्यवान् ॥१०॥

किं भूयोऽपि तदेवधाम महसां तस्मिन् कुटीरे वसत्
तत्रत्यान् विबुधानथापि परितोषोषस्थितान् नागरान् ॥
संशासत् मधुरस्मितैरधरजैरानन्दयच्छात्रकान्,
प्रश्नैश्चापि तदुत्तरैः सुरणदी मार्गे चलच्चालयत् ॥११॥

दृष्टि यास्यति मन्मनोविकलतां जह्याशु धैर्यं धर,
संसारस्य गतिं विचिन्त्य नियमानप्यायुषोहीदृशान् ॥
सन्तोषङ्कुरु भौतिकं भवति किं कस्यापि जन्तोरिदम्,
सोऽद्याप्यस्ति कलेवरेण यशसा सर्वत्रकिं ? विष्टपे ॥१२॥

॥ श्रीजीवनाष्टकम् ॥

(रामचरण दीक्षित - फीरोजाबाद)

येषां विद्वन्मणीनां सकलजननुता कीर्तिरत्यन्तरम्या
तेजः शान्तं पवित्रं शमयति नितरां मानसं मोहजालम् ।
मूर्तिः काचिन्मनोज्ञारविकरनिकरस्पर्धिनी चारुहासा
तेषामम्भोजरम्यं चरणयुगमहं सन्ततं संस्मरामि ॥१॥

दिव्यागीर्वाणवाणी विलयमुपगता वीक्षिता भारतेऽस्मिन्-
धर्मश्चैषोऽस्मदीयः प्रतिदिनमधुना क्षीयमाणश्चदृष्टः ।
सन्तः सीदन्ति सत्यं खलजननिवहो मोदयुक्तः सदैव-
येषांचित्तं दयार्द्रं निखिलमिदमहो वीक्ष्य संजातमाशु ॥२॥

सायं प्रातस्त्वभीक्ष्णं सुरसरिति कृतस्नानसन्ध्यादिकृत्याः
दिव्यांरुद्राक्षमालां करकमलगतां धारयन्तः पवित्राम्
शिष्यैः श्रद्धालुभिस्तैः सततमनुगता भस्मनालंकृतास्याः
मन्दं मन्दं हसन्तः स्मृतिविषयगता नोमनः पावयन्तु ॥३॥

येषां दिव्यं चरित्रं गुणगणसहितं गीयते सर्वलोकैः
चर्याधर्मानुकूला मुनिजनसदृशी वन्दनीया यदीया ।
वाचः सारेणयुक्ताः कलिकलुषमहोनाशयन्त्येव नूनम्-
तेषां पूज्येषु पादेष्वयमहमधुना वन्दनामादधामि ॥४॥

वेदान् साङ्गान् समस्तान् भरतभुवि कलौ क्षीयमाणाङ्गकान्तीन्
वीक्ष्यैतैः पूज्यपादै रुपसुरसरितं स्थापितः साङ्गवेदः ।
यत्राधीत्याशुविज्ञाः विविधगुणगणैः पूर्यमाणाः समन्तात्-
शिष्यास्तच्छिष्यशिष्याः सुरगिरमधुना भूतले वर्धयन्ति ॥५॥

आर्तान् वित्तेनहीनान् भवजलधिगतान् पीडितान् भूरि दुःखैः
कुर्वन्तः कल्पवृक्षोपमचरणयुगच्छायया शीतलाँ स्तान् ।
सस्नेहं वीक्षमाणाः सरलसरलया भावमय्या च दृष्ट्या-
वन्द्याः सर्वस्यनित्यं मम हृदय गतां भ्रान्तिमुत्पाटयन्तु ॥६॥

सामान्या तृणनिर्मिता निजकुटी ह्याजीवनं सेविता
भोगा यौवनसम्भवा मुनिजनश्लाध्यैः समेऽपाकृताः ।
निष्ठापूर्णमखण्डमेव भवतां ब्रह्मत्वमासीदिदम्-
तान् वन्द्याननिशं प्रसन्नवदनान् श्रःश्रेयसायार्थये ॥७॥

विद्योद्योतितदिङ्मुखानविरतं वेदध्वनिं शृण्वतो
गङ्गातीरनिवासदत्तमनसो वेदान्तचर्चामयान् ।
द्रव्यस्पर्शनमप्यपास्य सततं पूर्वाश्रमे दीक्षितान्-
लोकोऽजीवनजीवनाननुदिनं क्षेमाय संप्रार्थये ॥८॥

श्रीकुलपति-प्रशस्तिः

(श्री हरस्वरूप शर्मा, फिरोजाबाद)

विद्यावारिधितां धृतेर्विपुलतां धर्मस्य तत्त्वज्ञताम्
सिद्धान्तदृढतां परेशपरतां सौजन्यशालीनताम् ।
पूर्वाचार्यगुणज्ञतां मतिमतां चर्यासु पारीणताम्
प्राप्तो जीवनदत्त ? देवसमतां स्वर्गे भवान् राजताम् ।।१।।

वेदानां परिपोषणाय सततं विद्याविलासाय च
स्ववाणीं परिषेवितु भगवतः श्रोतु यशः पावनम् ।
धर्मं पालयितु सतां च भवता विद्यार्थिनः शिक्षितान्
कर्तु देवसरित्तटे नरवरे विद्यालयः स्थापितः ।।२।।

छात्राणां हितचिन्तकं कृतमतिं वेदान्तविद्याविदम्
गायत्रीजपपारगं सुमनसामातिथ्यसेवापरम् ।
यज्ञानां परिचालकं च विदुषां शास्त्रार्थसंयोजकम्
त्वामानेतुमिहात्र कांक्षति पुनः पद्मासना शारदा ।।३।।

छात्रान् भोजयितु सुभोज्यविविधैरिच्छा न जागर्ति किम् ?
अन्तेवासिजनस्य पाठनरुचिर्नोत्पद्यते मानसे ।
बद्ध्वा मण्डलमेकतस्तरुतले वेदस्य विद्यार्थिनाम्
श्रोतु सामऋचः सदास्वरयुताः किं नेहसे त्वं दिवि ।।४।।

स्ववाण्याः निजसंस्कृतेरविरतं धर्मस्य देशस्य चाप्यु-
द्धारं यदि साम्प्रतं कलियुगे वांच्छन्ति सर्वे जनाः ।
पेया जीवनदत्तजीवनसुधा निष्पक्षपातं तदा
एवं मे विनिवेदनं हि भवतां भूयात् सदा प्रेयसे ।।५।।

सर्वेषां सुखमेव ते सुखमतो नासीत् सुखाशा तव
स्वान्तं ते परदुःखकातरमतो नोद्विग्नता मानसे ।
एवं ब्रह्मपरायणस्य सततं शान्तं मनो यस्य वै
वन्देऽहं तमनाथपोषणपरं निष्ठावतां जीवनम् ।।६।।

शैथिल्यं दुरिते न वेदवचसां पाठेषु विद्यार्थिनाम्
दैन्यं दानिजने न भोज्यवसने पातस्तरौ नात्मनि ।
लावण्यं लतिकासु नात्रवसतामाप्तु तदीहा क्वचित्
एवं शिक्षक साधवोऽनवरतं जाताः कृतार्थाः त्वया ।।७।।

प्रातः शीतलमन्दमन्दमरुतामान्दोलनैः क्षोभिते
केकाकोकिलकाकलीकलरवैः सूर्यस्तुतिं शृण्वति ।
सन्ध्योपासनमग्नछात्रनिकरैरर्घ्याञ्जलिं गृह्णति
सिस्नासुः किल गच्छतिस्म नितरां गङ्गाजले निर्मले ॥८॥

सर्वान्तेवसतां तवाश्रमसुधा शिक्षा समीहावताम्
या या घोरतरा समेति पुरतस्तीव्रा समस्या यदा ।
तस्यास्त्वं विदधासि पावनसमाधानं स्वबुद्धया तदा
एवं तेऽनुभवं विलोक्य परमं के वा न मोदं दधुः ॥९॥

स्ववर्क्सुकीर्तिकमलस्य रसं पिवन्तः
सर्वे तवाश्रमजना अपि दीनबन्धो ।
द्रष्टुं भवन्तमधुना पुनराश्रमेऽस्मिन्–
भागीरथीं भगवतीं सततं स्तुवन्ति ॥१०॥

जीवन-वन्दनम्

(आचार्य श्रीवर शास्त्री, मथुरा)

श्रौतस्मार्तपरायणानि समधीत्याशेषशास्त्राण्यहो
येनालोकि महात्मनाऽस्यजगतः स्वल्पे वयस्येवतत् ।
हेयत्वं न कृता प्रविष्टिरपि संमान्ये द्वितीयाश्रमे
तं श्रीजीवनदत्तमेकशरणं वाचः सुराणां नुमः ॥

कुलपति-वन्दनम्

(डा० वासुदेवकृष्ण चतुर्वेदी, मथुरा)

ब्रह्मण्यं सुविशारदं यतिवरं गौर्यर्धदेहोपमम्
वंद्विष्टं परमं पवित्रहृदयं शान्तं सुशीलं वरम् ।
ब्रह्मर्षिप्रतिसेवितं कविकुलप्रोद्भासकोज्जीवनम्
श्रीमज्जीवनदत्तकं कुलपतिं वन्दे सदा सादरम् ॥

महाराजश्रीशीलपञ्चकम्

(श्री हरस्वरूप शास्त्री, चांदपुर–बिजनौर)

त्रैकालिकंसान्ध्यविधिं चरन्तः, सावित्रमन्त्रंनियतं जपन्तः ।
श्रीवृक्षमूलेप्रणिधानवन्तः, स्मार्याः सदा जीवनदत्तसन्तः ॥१॥

श्रुतिस्मृतीनित्यमनुस्मरन्तः, सन्नैष्ठिकाचारमुदाहरन्तः ।
देशीयवासःपरिधानवन्तः, स्मार्याः सदा जीवनदत्तसन्तः ॥२॥

विश्वप्रकाशंपरितोलयन्तः, निधीन्नवापि स्ववशानवन्तः ।
भागीरथीतीरनिवासवन्तः, स्मार्याः सदा जीवनदत्तसन्तः ॥३॥

विद्यावृतिच्छात्रगुणान् गृणन्तः, विप्रप्रसादंहृदि भावयन्तः ।
सदातिथेयोंकृपयाचरन्तः, स्मार्याः सदाजीवनदत्तासन्तः ॥४॥

सत्येशिवेस्नेहपथे चरन्तः, निःस्वाननेकान् परिपालयन्तः ।
विद्यालयोत्थानविचारवन्तः, स्मार्याः सदाजीवनदत्तसन्तः ॥५॥

जीवन–स्तोत्रम्

(आचार्य जयनारायण शर्मा, फीरोजाबाद)

अवगत्य विवेकशालिनीं तव मूर्तिं विबुधव्रजाहितः ।
भुवि तावदशाययद्धिताम् ननु शुक्रो निजनीतिगर्वितः ॥१॥

भानुर्भातिदिवैव केवलमहो ? नक्तं तथा चन्द्रमाः
तेजोराशिरथास्ति पूर्वइतरः शीलात्मना शालते ।
तेजःशीलसमन्वितं सुमनसां रात्रिंदिवं भासकम्-
मत्वा त्वां विबुधेश आकुलमनाः स्वर्गे समाकारयेत् ॥२॥

ब्रह्मत्यागतपःसुशास्त्रपरता सौजन्यशालीनताः
छात्राणामवनं चरित्ररचनं विद्याप्रसारादयः ।
येऽपिस्युर्गुणनिर्भराः सुललिताः ख्यातिं चलोके गतः
तेषां त्वामवबुद्धय जीवनमहो ? शक्रः समाहूतवान् ॥३॥

यज्ञानामरणिर्विशिष्टतरणिर्दुःखोदधौमज्जताम्,
दीनानांभरणी तथा सुसरणिः श्रद्धावतां सौख्यदा ।
दृष्टातावददृष्टचूर्णकरणी दृष्टैरदृष्टैर्नरैर्-
नूनं जीवनदत्तदृष्टिरनिशं जाता नु संजीवनी ॥४॥

भिन्नानां शुभयोजनेऽतिपटुता सम्भाषणे वाग्मिता
निष्ठायाः प्रगतिर्यथा सुचरिते शास्त्रे प्रतिष्ठा तथा ।
हित्वा स्वार्थसरः परार्थपरता येषां 'जयः' सेवकः
तेषां त्वं प्रमुखी भवन् नरवरे जातो नरो वै वरः ॥५॥

जीवन-स्तोत्रम्

(श्रीरामदत्त आचार्य, फीरोजाबाद)

यदीयपादाम्बुजरेणवः सदा चक्रुर्न किं दीनजनानदीनान् ।
तं ब्राह्मणाग्र्यं भुवि धर्मरूपम् श्रीजीवनं जीवनदं नमामि ॥१॥
प्रातः समुत्थाय विधाय शौचं वगाह्य गङ्गाञ्च पवित्रतोयाम् ।
मध्याह्नपर्यन्तमसौ जजाप तं जीवनं जीवनदं नमामि ॥२॥
भूयोऽपि मध्याह्नविधिं विधाय स्वयं च पाकं कृतवान् सदैव ।
अध्यापयामास च शिष्यवर्गम् तं जीवनं जीवनदं नमामि ॥३॥
सदैव सत्कारपरं समेषां द्वेषाच्च रागाच्च निवृत्तबुद्धिम् ।
परोपकारैकपरायणं तं श्रीजीवनं जीवनदं नमामि ॥४॥
यस्यैव पादाम्बुजसेवया च गता अनेके सुमहापदेषु ।
अयं बराकोऽपि च मोदतेऽत्र तं जीवनं जीवनदं नमामि ॥५॥
मातृष्वसारं भगिनीं च मां च पितृव्यज्येष्ठं च हरप्रसादम् ।
योऽपालयत् तं प्रवरं द्विजानां श्रीजीवनं जीवनदं नमामि ॥६॥
पित्राविहीनं सदनेनहीनं कुटुम्बहीनं समपालयद् यः ।
विद्याप्रदं स्नेहयुतं च नित्यं तं जीवनं जीवनदं नमामि ॥७॥
यज्ञा अनेके च बभूवुरत्र स्वल्पा महान्तश्च समेऽपि दिव्याः ।
गत्वा च सर्वत्र ददर्श सर्वान् तं जीवनं जीवनदं नमामि ॥८॥
य इन्द्रप्रस्थे शतकोटियागे लेभे मनोज्ञं यजमानभावम् ।
अपूजयद् वेदविशारदांश्च तं जीवनं जीवनदं नमामि ॥९॥
सर्वां विहायाशु निजां दिनक्रियां गङ्गां च मुक्त्वा निजबोधरूपाम् ।
जगाममुम्बानगरीं महात्मा तं जीवनं जीवनदं नमामि ॥१०॥
श्रीस्वामिवर्यस्य महोदयस्य समस्तशास्त्रस्मृतिबन्धुरस्य ।
जगाम यः कर्णपुरे च यागे तं जीवनं जीवनदं नमामि ॥११॥
काश्यां च यागे शतकोटिनाम्नि श्रीकृष्णबोधाश्रमदत्तचित्तः ।
चकार शोभां निजनामरूपां तं जीवनं जीवनदं नमामि ॥१२॥
धनैर्विहीनं नयनैर्विहीनं वस्त्रैर्विहीनं व्यथितं च नित्यम् ।
सर्वात्मना यः सुखिनं चकार तं जीवनं जीवनदं नमामि ॥१३॥
रात्रौ च शिष्याः सततं समेताः प्रणेमुरत्यन्त-विबुद्धभक्त्या ।
शुश्राव मन्त्रान् परमः प्रसन्नः तं जीवनं जीवनदं नमामि ॥१४॥
समागतान् दुःखमयान् जनान् यः सद्यः प्रसन्नानकरोत्कृपाभिः ।
लिलेख पत्रं च विनैव शङ्कां तं जीवनं जीवनदं नमामि ॥१५॥

योऽशिक्षयद्वेदविधिं सदैव ज्ञानं च नित्यं प्रददौ द्विजेभ्यः ।
शाला अनेका विहिताश्च येन तं जीवनं जीवनदं नमामि ॥१६॥
येनान्वहं ब्राह्मणबाहुजाश्च वैश्याश्च शूद्रा अपि चान्त्यजाश्च ।
समा हि दृष्टाः सदयेन चक्षुषा तं जीवनं जीवनदं नमामि ॥१७॥
यो मां समाकर्ण्य रुजा प्रपीडितं कारुण्यभावेन गतोमदन्तिकम् ।
पप्रच्छ सर्वं मम दुःखकारणम् तं जीवनं जीवनदं नमामि ॥१८॥
सर्वांश्च शिष्यानपि वैदिकानहो संपूज्य दुर्गां शुभदामजापयत् ।
रोगानशेषानिति मन्त्रमालाम् तं जीवनं जीवनदं नमामि ॥१९॥
आहूय सर्वान् भिषजोऽग्रगण्यान् अकारयद्रोगविवर्जितं वपुः ।
ददर्श गत्वा च ममान्तिकं यस् तं जीवनं जीवनदं नमामि ॥२०॥
कथं हि तस्याखिलदीनबन्धोर्गुणान् प्रवक्तुं क्षमता मम स्यात् ।
तथापि धार्ष्ट्यं विदधानि मूढस् तं जीवनं जीवनदं नमामि ॥२१॥
यस्यानुकम्पालेशेन लब्धं ज्ञानं मया सुखम् ।
दत्तान्तं जीवनादिं च तं नमामि गुरोर्गुरुम् ॥२२॥
भोजनाच्छादने नित्यं यो दिदेश फलं विना ।
दत्तान्तं जीवनादिं च तं नमामि गुरोर्गुरुम् ॥२३॥
सर्वानन्दसमृद्ध्यर्थं यो मे वृत्तिमकल्पयत् ।
दत्तान्तं जीवनादिं च तं नमामि गुरोर्गुरुम् ॥२४॥
कुशासने चोपविश्य मौनभावे च संस्थितः ।
जजाप देवीं गायत्रीं साक्षादिव पितामहः ॥२५॥
तत्रैव प्रैरयत् सर्वान् ब्रह्मचर्ये दृढव्रतः ।
यथा राजा सुतान् सर्वान् साक्षाद्भीष्मपितामहः ॥२६॥
वेदानां च रहस्यं हि सं सम्यगवबुद्धवान् ।
गायत्रीं च जपन्नेव ब्रह्मलोकमथागमत् ॥२७॥
वैदिकीनां क्रियाणां हि कर्ता कारयिता च यः ।
द्विजातिभ्यश्च सर्वेभ्यः ददौ शिक्षामहर्निशम् ॥२८॥
मध्याह्नकार्यं च विधाय नित्यम् गीतां हि सर्वां च पपाठ रम्याम् ।
सायं च श्रुत्वा शुभभारतीकथां चकार सन्ध्यामपि भानुसंयुताम् ॥२९॥
त्यक्त्वा च देहं निजभौतिकं यो जगाम चासौ परमेष्ठिनः पदम् ।
किमत्र हेयं कनकं च कान्ता लक्ष्यं हि चैतत्समपूरयत् यः ॥३०॥

वियोगाञ्जलिः

(श्री सीताराम शास्त्री, फिरोजाबाद)

शुभसङ्गपरायणो मुनिर्जपसन्ध्याव्रतदीक्षितः सदा ।
जननीजनकाधिकः सदा त्वमभूर्नरवरे भुवस्तले ।।१।।
जनताविपदां निवारकः सहितो जीवनदायकः प्रभो !
विदुषां ननु पोषको व्रती तव नामास्ति शुभङ्करमार्थकम् ।।२।।
कविता रुचिकारिका तव रचिता भट्टिमहोदयेन या ।
प्रवरोमुनिपाणिनेस्तथा नियमानां सुतरां प्रशिक्षकः ।।३।।
कियतां न सुलालनं कृतं कति दीना भवता न रक्षिताः ।
अपि यत्र विराजते भवान् नहि तत्रास्ति विपल्लवो मनाक् ।।४।।
गिरिजापतिपूजको भुवि जगदम्बाचरिते विचारकः ।
अतएव सुचण्डिकामखे यजमानत्वमुपागतोभवान् ।।५।।
गिरिजापतियज्ञमन्दिरम् जगदम्बा यजनाय निर्मितम् ।
रमते न मनस्त्वया विना सति विद्यासदने सुशोभिते ।।६।।
बहुपर्णयुता कुटी त्वया पठनायारचितासुखावहा ।
अधुनामम दृष्टिगोचरे शिथिला जीर्णतमा च लक्ष्यते ।।७।।
बहवः परिरक्षितास्त्वया विदुषां तत्र शुभास्थितिः कृता ।
नहि कोऽपि जनोऽधुना क्षमः परिपातुं रुचिराः कुटीरिमाः ।।८।।
न विलोक्य कुटीरसंस्थितं निखिलं ब्रह्ममयं वपुर्नवम् ।
नमनाय समागता जना विलपन्ति स्मरणे कृतेसति ।।९।।

संस्मरणम्

(आयुर्वेदाचार्य श्रीश्यामलालशर्मा, बोझाका, अलीगढ़)

निष्ठावान् श्रुतिबोधिते पथि दयावांश्चापि विप्रान्वये
एकोपायत एककालमुभयोरुद्धारमिच्छन् सुधीः ।
संस्थाप्य श्रुतिपूर्वनामकमिमं वेदाङ्गविद्यालयम्
योगक्षेममकल्पयत्कुलपतिः प्रत्यर्पिता जीवनः ।।१।।
यावज्जीवनमेव नैष्ठिकतया यो ब्रह्मचर्यं चरन्
गायत्र्या बहुशः पुरश्चरणकृत्संकल्पसिद्धिन्वगात् ।
गंगागाधजलेनिमग्नवटुकान् त्रिस्रोतसे स्वं जपं–
प्रत्यर्प्यानयदूर्ध्वमश्रमत एवाहो दयासागरः ।।२।।

श्रीमतां संस्मृतिर्वस्तुतः स्यात्तदा
दर्शितं मार्गमेते गच्छन्ति चेत् ।
वेदनिष्ठाः सदाचारशीला निजं
धर्ममेवाश्रयन्तस्तथाऽमायिनः ॥३॥
ज्ञानविज्ञानयुक्ताः पथि व्युत्पत्था-
दानयन्तः सतां मंगलध्यायिनः ।
कर्मठा निर्भया नीतिमन्तो द्विजाः
संकटे संस्थिते स्वस्थितिस्थायिनः ॥४॥

~~~~~~

अस्माकं-विद्यालयः

(श्री रामस्वरूप अग्निहोत्री, जयपुर)

गङ्गायाः पावनेतीरे ख्याते नरवरे स्थले ।
संस्थापितः साङ्गवेदमहाविद्यालयः शिवः ॥१॥
महामान्यमहाराजजीवनदत्ताशर्मभिः ।
तपोमूर्तिभिराचार्यैरादित्यब्रह्मचारिभिः ॥२॥
रक्षायै सर्ववेदानां साङ्गानां नष्टवर्त्मनाम् ।
पुराणधर्मशास्त्राणां काव्यानां चित्तहारिणाम् ॥३॥
नव्यव्याकरणच्छन्दोज्योतिषां नयसम्पदाम् ।
गवेषणायै नव्यानां विषयाणां महीयसाम् ॥४॥
भारतस्य विभिन्नेभ्यः प्रान्तेभ्यः समुपागताः ।
अधीयते सदायत्र प्रज्ञावन्तो बहुश्रुताः ॥५॥
वेदान् व्याकरणं न्यायं योगं वेदान्तदर्शनम् ।
अलङ्कारान् रसान् रीतीरायुर्विद्यायशस्करीः ॥६॥
ब्रह्मचर्यं पालयन्तः सेवमानाः सरिद्वराम् ।
गङ्गां भागीरथीं पुण्यां सुजलां सर्वकामदाम् ॥७॥
ख्यातः संस्कृतसंसारे धर्मविद्याविवर्धनः ।
साङ्गवेदमहाविद्यालयः सर्वगुणाकरः ॥८॥
स्वकीयाः सन्ततीरत्र प्रेषयन्तु विपश्चितः ।
ब्राह्मणाः क्षत्रिया वैश्या ग्राम्या नागरिकास्तथा ॥९॥
संकल्पः सफलो भूयाद् येन प्रख्यातकर्मणाम् ।
अनन्तश्रीमहाराजजीवनदत्तशर्म्मणाम् ॥१०॥
~~~~~~

गुरुवन्दनम्

(श्रीरामस्वरूप शास्त्री, नरौरा)

अन्तर्बहिः पुरुषकालयुगावभासम् सृष्टिस्थितिप्रलयकारणभूततत्त्वम् ।
या भावयन्ति विभजन्ति यथावकाशम् ता जीवनस्य रुचयो हृदि भावनीयाः ॥१॥

संचेतुकाममनलं सुकृतं गरीयः कर्मक्षमं क्षितितलं स्वरिवावतीर्गाम् ।
विभ्राजते सुरसरित् शुभदक्षिणाङ्के विश्वश्रुता गुणनिधिर्नगरी नरौरा ॥२॥

भूलोकवासमुचितं परिचिन्तयन्ती वाग्देवता गतवती नगरीं नरौराम् ।
तत्पार्श्ववर्तिनि शुभे विबुधाश्रमेऽस्मिन् सा शारदा कृतवती निजसन्निवासम् ॥३॥

तत्रास्ति सर्वनिगमागमपारगामी दत्तान्तजीवन इति श्रुतनामधेयः ।
लोकोत्तरप्रतिभया निजया विपक्षान् कुर्वन् यथा सुरपतिर्ह्यचलान् विपक्षान् ॥४॥

यद्भारतीरसभरस्य समक्षभावे द्राक्षाविषण्णवदना समजायतालम् ।
कार्कश्यमेवमभजत् सितशर्कराद्राक् भीता सुधा क्षितिनिवाससुखंव्यहासीत् ॥५॥

यद्भारती रसमुदीक्ष्य सलज्जभावात् भृङ्गाः पिकाः समभजन खलु कालिमानम् ।
ते चातकाःभृशमुपेक्षित जीवनाश्च वर्षातिरिक्तसलिलेषु विरक्तिभावम् ॥६॥

लोकोपकारकरणाय विशालचेताः योऽसौ स्वकीयशरणे विनयोपपन्नैः ।
शिष्यप्रशिष्यसहितैर्विविधागमज्ञैः भूमावहो ! वितनुते द्विजराजलोकम् ॥७॥

कीर्तिं विधाय विधिना गुरुजीवनस्य प्रक्षाल्य पाणियुगलं सलिलं न्यपाति ।
यत्रोदिताश्च किल तत्र सुधाकराद्याः तच्छीकरैः समभवन्नखिलाश्चतारा: ॥८॥

नरौरानामको ग्रामो जाह्नव्या दक्षिणे तटे ।
तस्यैव पश्चिमे भागे वर्तते चाश्रमो महान् ॥९॥

गायत्रीं वेदमूलां यो जपन्नित्यं समाहितः ।
धृतव्रतः ब्रह्मचर्ये विद्यादाने सदारतः ॥१०॥

द्वारकादत्त शिष्येण शालग्रामेण वै सह ।
पाठकेनस्वशिष्येण शिक्षामार्गं समाश्रितः ॥११॥

अशीतिवर्षपर्यन्तं गायत्रीं जपतोऽनिशम् ।
गुरोर्जीवनदत्तस्य वासोनरवरे ह्यभूत् ॥१२॥

श्रद्धया सर्वशिष्याश्च पूजयन्तिस्म जीविते ।
योऽधुना च महर्लोके पूज्यते मुनिभिः स्थितिः ॥१३॥

चतुर्विंशतिकोटीनां गायत्रीणाञ्च जापकः ।
ध्रुवं याति महर्लोके धर्मोऽयं वै सनातनः ॥१४॥

तमेव मार्गमाश्रित्य गुरुणा जीवनेन च ।
उषित्वा जाह्नवीतीरे गायत्रीसमुपासिता ।।१५।।

असकृद्देवता यज्ञे तर्पिताः स्वेन कर्मणा ।
उत्सृष्टाः जीवने येन सर्वे भोगाश्च भौतिकाः ।।१६।।

तस्य धर्मसमृद्धस्य जीवनस्य गुरोर्मम ।
शास्त्रीयज्ञानप्राप्त्यर्थं कालो यातो महात्मनः ।।१७।।

सन्तुष्टःफलमूलेन विद्यावितरणे रतः ।
यः परां भजते प्रीतिं गायत्रीजपतत्परः ।।१८।।

सर्वान्कामान्परित्यज्य धर्मस्नेहपरायणः ।
अचिन्तयित्वा कष्टानि संस्थितश्चाश्रमे शुभे ।।१९।।

सोऽयं कनकवर्णाङ्गो नित्यं सुस्मितभाषणः ।
सहते सर्वकष्टानि तितिक्षुस्तपसि स्थितः ।।२०।।

इमं तु शीलसम्पन्नं पूर्णविद्याधरं गुरुम् ।
दर्शनाय समायान्ति भक्ताः सफलपारणयः ।।२१।।

कामक्रोधैः परित्यक्तो लोभेनरहितः सदा ।
धारयत्यात्मनो देहं कृच्छ्राय तपसे गुरुः ।।२२।।

नैष पश्यति संभोगान् पक्षपातांश्च लौकिकान् ।
ब्रह्मनिष्ठमनाभूत्वा धर्ममेवानुपश्यति ।।२३।।

चारित्र्यव्यपदेशाढ्यो देवदर्शनलालसः ।
भूषितो वल्कलैर्वस्त्रैः शिष्यवात्सल्यसंयुतः ।।२४।।

शिष्यैः परिवृतं तत्र देवैरिव वृहस्पतिम् ।
गुरुजीवनदत्तञ्च सदा पश्यन्ति मानवाः ।।२५।।

अस्माकं दर्शनेऽप्यासीत् गुरुः सुस्मितलोचनः ।
आसीनः प्राङ्मुखः श्रीमानासने परमे शुभे ।।२६।।

शुक्लमाल्याम्बरधरः शुक्लभस्मानुलेपनः ।
गुरुजीवनदत्तोऽसौ शोभते नैष्ठिको व्रती ।।२७।।

एवं भूतो महातेजा गुरुः कमललोचनः ।
आश्रमाध्यक्षकः श्रीमान् राजते चाश्रमेस्थितः ।।२८।।

अत्रत्यां जनतां शोकैः रुदतीमतिविह्वलाम् ।
भूमिं नारवरीं त्यक्त्वा साम्प्रतं दिवि मोदते ।।२९।।

अधुना देवता धन्या सिद्धगन्धर्वकिन्नराः ।
ये पश्यन्ति महाराजं सद्गुरुं स्वर्गगामिनम् ।।३०।।

रत्नोपरचिते दिव्ये बिमाने संस्थितो गुरुः ।
स्तूयमानः सुरगणैः महर्लोके विराजते ।।३१।।

अभिषिक्तो महाराजः सर्वदेवैर्नमस्कृतः ।
ब्रह्मर्षीणां गणैः सर्वैः देवर्षीणां तथैव च ।।३२।।

महर्लोके स्थितिं कृत्वा साम्प्रतं दिव्यतां गतः ।
ततोऽपि वीक्षते शिष्यान् धार्मिकान्दिव्यचक्षुषा ।।३३।।

पुण्यं गरीयो भुवि कर्तुकामः धरातले गीष्पतिरभ्युपेतः ।
अनेकविद्वज्जनमानदाता पायाद्गुरुर्जीवनदत्तशर्मा ।।३४।।

यस्यानुकम्पनवशादखिलेष्टसिद्धिः यस्याङ्घ्रिसंस्मरणतो विजयप्रलम्भः ।
दत्तान्तजीवन इति प्रथिताभिधानः पायात्सदा स गुरुर्जीवनदत्तशर्मा ।।३५।।

येनोद्धृता वसुमती परिखासु मग्ना भग्ना च मूर्तिरिह शंकरदेवतायाः ।
संमोचितं द्विजकुलं जडतान्धकारात् पायात्सदैव गुरुर्जीवनदत्तशर्मा ।।३६।।

बाल्ये गृहीतनिगमो गुरुभीमसेनात् तारुण्यमाप्य परिपाठितवान् शिशूंश्च ।
वेदान्तबोधविभवः स्थविरेण लब्धः पायात्सदैव गुरुर्जीवनदत्तशर्मा ।।३७।।

वेदानधीत्य सहितान् खलु षड्भिरङ्गैः वेदान्तशास्त्रमपि सम्यगधीतवांश्च ।
लब्धश्च येन परिपूर्णतयावबोधः पायात्सदा स गुरुर्जीवनदत्तशर्मा ।।३८।।

विद्यालयीयं समपास्य भारम् चतुर्धुरीणे नँदलालशर्मणि ।
संलग्न आसीत् जपयोगमार्गे पायाद् गुरुर्जीवनदत्तशर्मा ।।३९।।

संसारभोगान् परिहाय सर्वान् आत्मीय वृत्तिं निगमे निधाय ।
संपादितो येन च वेदमार्गः पायाद् गुरुर्जीवनदत्तशर्मा ।।४०।।

विद्यालयस्थापनलब्धकीर्तिः विद्यातपोज्ञानपवित्रदेहः ।
परोपकारे सुगृहीतचेताः पायाद् गुरुर्जीवनदत्तशर्मा ।।४१।।

जीवनपरिचयपद्यप्रसूनानि

(आचार्य रामचरण दीक्षित, फिरोजाबाद)

आसीदशेषजनगीतपवित्रकीर्तिः रामप्रसाद इति नामधरो द्विजेन्द्रः ।
राज्ञो बरौलिनगरे वसतो गुरुर्यो मल्लेषु लब्धमहिमा प्रवरश्च वैद्यः ॥१॥

भाष्यं पतञ्जलिकृतं विविधान्निबन्धान् प्राचीनपद्धतिपरम्परया ह्यधीत्य ।
वेदोपवेदनिपुणः कुशलः प्रवक्ता गौरच्छविः सुपरिपुष्टशरीर आसीत् ॥२॥

सम्मानहानिमथ जातु निरीक्ष्य तस्मात् श्रीकर्णसिंहनगरात् द्रुतमेव यातः ।
राज्यस्यसीम्नि तव नैव कदापि राजन् वास्यामि सत्यमिदमेव वचश्चकार ॥३॥

तस्मादलीगढनिवासरतात् द्विजाग्र्यात् श्रीजीवनः शिशुरयं समजायतैकः ।
यो बाल्य एव शुभलक्षणलक्षिताङ्गः सर्वस्य चेतसि मुदं जनयन् विरेजे ॥४॥

श्रीमद्दयानन्दमहर्षिवर्यैः सम्प्रेरितः पञ्चमवर्षवर्त्ती ।
भाष्यं तथा पाणिनिसूत्रपाठं प्राचीनरीत्यैव दधार सद्यः ॥५॥

वेदं च साङ्गं निखिलाश्च विद्या अधीत्य सश्रद्धमयं गुरुभ्यः ।
स्वल्पे वयस्येव महानुभावस्तपःपरोऽभूदतिचित्रमेतत् ॥६॥

विप्रोचिते कर्मणि तत्परः सन् त्रिकालसन्ध्यां विदधत् सदैव ।
नारीसुखं तुच्छमयं विचार्य विवाहबुद्धिं शिथिलीचकार ॥७॥

आपातरम्यान् विषयान्विहाय स ब्रह्मचर्यं स्वहिताय मेने ।
देशेष्वनेकेषु पवित्रतीर्थेष्वयं भ्रमन् विल्ववनं जगाम ॥८॥

तत्र स्थितोऽध्यापनकर्म कुर्वन् शिशूननेकान् विदुषश्चकार ।
गङ्गातटे चापि सदावकाशे समागतः स्नानविधिं चकार ॥९॥

भागीरथी या सुरभारतीव पवित्ररूपा विलसत्यजस्रम् ।
यदीयतीरे मुनयः प्रसिद्धाः सिद्धाः सुराश्चापि वसन्ति नित्यम् ॥१०॥

नीरं यदीयं त्रिविधांस्तु तापान् विनाशयत्येव सुसेवितं सत् ।
लोकप्रसिद्धं गुणराशिरूपं विकारमभ्येति न कर्हिचित्तत् ॥११॥

यद्वायुरत्यन्तसुगन्धयुक्तः सुशीतलो मन्दगतिः प्रवाति ।
संसेव्यते तीरगतैर्मनुष्यैर्यैः पुण्यराशिर्बहुसंचितोऽस्ति ॥१२॥

तरङ्गिता शीतलवारियुक्ता चक्रादिभिः पक्षिगणैर्युता या ।
मत्स्यादिभिर्वारिचरैभ्रमद्भिः विभूषिता पापविनाशदक्षा ॥१३॥

निरीक्ष्य शोभामतुलां तदीयाम् मनस्ययं मोदमुपाजगाम ।
तत्रैव वासस्य विचारबुद्धया तीरे स्वकीयां वसतिं चकार ॥१४॥

तत्रासीत्तरुखण्डमध्यविलसत्कुञ्जैः समुद्भासितम्
पुष्पव्रातसमन्वितव्रततिभिर्नित्यं तथा चावृतम् ।
वन्यैर्जन्तुभिराश्रितं सुविलसत्प्राकारसंवेष्टितम्
श्रीमच्छङ्करमन्दिरं प्रणमतां सर्वेष्टसिद्धिप्रदम् ॥१५॥

गङ्गातीरसमीपसंस्थितमिदं दिव्याजिरं मन्दिरम्
संवीक्ष्यैव मनो बभूव नितरां तत्र स्थितावुत्सुकम् ।
सर्वंवस्तुविहाय नीरवमिदं स्थानं तपोवृत्तये
योग्यं चेति विचार्य तत्र वसतिं निश्चित्य चिन्तां जहौ ॥१६॥

कौपीनं जलपात्रमेकमधुना तस्याभवत्संग्रहः
भस्मालंकृतभालभूषिततनुर्नित्यं जपे तत्परः ।
गायत्रीं श्रुतिमातरं नियमतः संराधयन्नाश्रमे
तेजः पुञ्जविराजितः स शुशुभे दीव्यन्यथा भास्करः ॥१७॥

कान्ति तस्य निरीक्ष्य दिव्यमहसा पूर्णां सुशान्तिप्रदाम्
यान्तस्तेन पथाजनाः परिचयं प्राप्तुं समीपं गताः ।
वाचः पेशलतां तथा सुरुचिरां विद्यां तदीयां तदा
विज्ञायैव शिशून् स्वकान् नियमतः शिक्षार्थमानिन्यिरे ॥१८॥

नैवायाचत कुत्रचित् किमपिच द्रव्यं न भोज्यादिकम्
सर्वं वस्तु समन्ततः स्वयमहो नित्यं समभ्यागतम् ।
सिन्धुं यान्ति नदीनदाः परिमलं भृङ्गा यथा सत्वरम्
ब्रह्मज्ञानसमन्वितं जनमियं सम्पत्तिरागच्छति ॥१९॥

शिष्यास्तत्र समागमन् द्विजवरैः संप्रेषिताः श्रद्धया
प्रेम्णा तान् समुपागतान् शिशुजनान् नित्यं समध्यापयत् ।
भक्तैश्चापि विनिर्मिते तृणमये रम्ये कुटीरे तदा
वासं तत्र चकार शिष्यसहितो वेदप्रचारे रतः ॥२०॥

द्रुतचलन्मरुतापरिपोषितस्तृणमयप्रचुरोटजनाशकः ।
हुतभुगाविरभूदतिसत्वरम् निवसतां जनयन् भयमुत्कटम् ॥२१॥

अनिलपुञ्जगतोः शिशवस्तदा करुणया विभुना परिरक्षिताः ।
तदनुवैभवशालिभिरद्भुतम् सुविमलं भवनं विहितं मुदा ॥२२॥

साङ्गवेदप्रचाराय बद्धादरः स्थापयामास विद्यालयं सुन्दरम् ।
देशदेशेभ्य आनीय विद्वज्जनम् पाठयामास बालान् पितेव स्वयम् ॥२३॥

भूरिशश्छात्रवृन्दाः समभ्यागताः भिन्नदेशेभ्य एते प्रमोदान्विताः ।
वस्त्रभोज्यप्रदानादिना प्रत्यहं पोषयामास विद्वज्जनाभ्यर्चितः ॥२४॥

विविधशास्त्रविचक्षणपण्डितप्रवरमण्डितशिक्षणमन्दिरे ।
मुमुदिरे बहुशः समुपागताः श्रुतिमनोहरगानवशीकृताः ॥२५॥

तदनुकीर्तिरभूदतिविस्तृता जनमनःपरिमोदविधायिनो ।
सुरगिरोऽभ्यसने नितरां रता द्विजजनाः शतशः समुपागताः ॥२६॥

वाराणसीव जगति प्रथितो विशालो विद्यालयः प्रतिदिनं परिवर्धमानः ।
गङ्गेव तत्र विमलः श्रुतिमन्त्रराशिः संश्रूयते स्म निखिलाघविमर्ददक्षः ॥२७॥

विधाय रम्यां निखिलां व्यवस्थां विद्यालयस्यातिसमृद्धिपूर्णाम् ।
स्वयं कुटीरे तृणनिर्मितेऽयं योगीव वासं सततं चकार ॥२८॥

ततो नृपाः श्रेष्ठिवराश्च नित्यं तद्दर्शनार्थं परितः समेताः ।
निरीक्ष्य शोभामतुलं च तेजः कृतार्थतां प्रापुरतीवदिव्याम् ॥२९॥

स दीनबन्धुः सततं महात्मा सहायतां सर्वविधां चकार ।
समागतानां शरणे जनानाम् शिशूननाथान् परिरक्षतिस्म ॥३०॥

वैधव्ययुक्ता महिलाश्च पालिता बालाश्च तासां भृशदुर्गतानाम् ।
रोगैर्महद्भिः परिपीडितानाम् सदा जनानां विहिता च रक्षा ॥३१॥

परोपकारार्थमिदं शरीरं विचारमेनं सफलीचकार ।
नामाप्यसौ जीवनदत्त एतद् दधार चान्वर्थकमेव नित्यम् ॥३२॥

यथा कथंचित् परितोषणं स्यात् कस्यापि जीवस्य विचार एषः ।
सदैव चेतस्य भवन्मनोज्ञो नान्यास्ति पूजा जगदीश्वरस्य ॥३३॥

ब्राह्ममुहूर्त उपविश्य कुशासनेऽसौ ध्यायन् विभुं परमहंसविमृग्यपादम् ।
विष्णोः स्तुतिं सुमनसां मनसाप्यचिन्त्याम् सम्पादयन् प्रतिदिनं परिलक्ष्यतेस्म ॥३४॥

गङ्गातटं समुपगम्य ततः पवित्रम् शिष्यव्रजैरनुगतो मृदुहास्ययुक्तः ।
स्नात्वाघमर्षणजपं प्रविधाय नित्यम् सन्ध्यामुपास्य निजपर्णकुटीमुपैति ॥३५॥

तत्रोपविश्य जपतत्परमानसः सन् मध्याह्नकालमवधिं च समाप्य तावत् ।
सन्ध्यामुपास्य दिनमध्यगतां पुनश्च भुक्त्वा विरम्य पठनादिषु युज्यतेस्म ॥३६॥

दिव्याः कथाः समुपविश्य शृणोति सायम् या भारते निगदिताः प्रवरैर्मुनीनाम् ।
गङ्गामुपेत्य समुपास्य ततश्च सन्ध्याम् दीर्घं जपं स्थिरमतिर्विदधाति नित्यम् ॥३७॥

नैकः क्षणोऽपि विफलो व्यतियाति तस्य रम्यं वचो जनमनो विमलं विधत्ते ।
नास्त्यस्य कापि सकलासु कलासु हीना यत्सन्निधौ निवसतां नहि पापलेशः ॥३८॥

धाराप्रवाहसहितां सुरभारतीं यः संसेवते मधुरया धुरया प्रवृत्ताम् ।
दिव्यं स्मितं मनसि यस्य दधाति मोदम् तज्जीवनं जगति कस्य न वन्दनीयम् ॥३९॥

शालोन्नतं वपुरतीवमनोज्ञकान्ति भस्माभिरामतनुरेष शिवः प्रभाति ।
मूर्ध्न्यस्ति कापि विमला ननु जाह्नवीव काशप्रकाशसदृशी शुभकेशराशिः ॥४०॥

शिष्याः पठन्त्यविरतं श्रुतिमन्त्रराशीन् शास्त्रार्थपद्धतिमपि ह्यनुशीलयन्ति ।
व्याख्याविधानकुशलाश्च भवन्ति यस्य सम्पर्कतः सुरगिरोऽभ्यसने च युक्ताः ॥४१॥

यत्कीर्तिरस्ति विशदा जगति प्रसिद्धा चान्द्री प्रभेव कुमुदं विकचीकरोति ।
गायन्ति यद्गुणगणान् मधुपा इवात्र सन्तः प्रसन्नवदनाः नितरां पवित्रान् ॥४२॥

दन्तप्रभाविजितमौक्तिकबीजमालः स्रोतस्त्रयेण समलङ्कृतभव्यभालः ।
रुद्राक्ष षितकरो मृगचर्मसेवी चेतःसु नः स्फुरति यस्य कला तु दैवी ॥४३॥

शुचौ गङ्गादेव्याः पुलिनसविधे कोऽपि रुचिरो-
निवासः शोभाया विलसति महानाश्रमगणः ।
मुनीनां संघातो व्रतजपसमाध्यादिषुरतः
कलावस्मिन् काले कृतयुगकलां सन्निदिशति ॥४४॥

प्रभाते वेदानां ध्वनिरयमघानि प्रणुदति
तथा धूमो यज्ञे तरुशिखरमालिङ्गति बलात् ।
जपन्तो गायत्रीं सुरसरितिभक्तिप्रमुदिता
महात्मानो नित्यं जगदतिपवित्रं विदधति ॥४५॥

प्रभावस्तस्यायं कुलपतिपदं धारयति यः
विभूतिर्लोकेऽस्मिन् विलसति सदा यस्य महिता ।
निजं दत्तं येन स्वमपि निखिलं जीवनमदः
महामान्यः सोऽयं सकलजनतावन्दितपदः ॥४६॥

अनेके विद्वांसो भुवि विविधविद्यासु निपुणाः
पठन्तो ह्यत्रैव श्रुतिमतिमहत्त्वेन सहिताम् ।
तथा साङ्गां सद्यः कलिकलुषसंहारनिपुणाम्
विराजन्ते सर्वे यमनियमसंपालनरताः ॥४७॥

इत्थं वृहद् व्रतधरो मुनिवृन्दवन्द्यो लोकानुकम्पनपरः तपसि प्रवृत्तः ।
मार्गे चलन्नपि सदोपदिदेश सोऽयं वार्धक्यभूषिततनुः शुशुभे शशीव ॥४८॥

उन्मूलयन् गहनमोहमहान्धकारं चेतः सुसंस्थितमतीवचिरोपनद्धम् ।
सम्मानयन् बुधजनान् सततं यशस्वी भास्वानिवातिरुचिरो नितरां दिदीपे ॥४९॥

बहुशो भुवि भारताजिरे सुरवाचः परितः प्रचारकान् ।
जनयन् ननु शिक्षणालयान् रुरुचे दिव्यमहः समन्वितः ॥५०॥

तथैव तत्प्रेरणया सुधीभिः सौभाग्यपुर्यां समलङ्कृतायाम् ।
हनूमतो मन्दिर भूमिभागे विद्यालयः स्थापित एक इद्धः ॥५१॥

एवं ह्यनेके सुरगीःप्रचारका विद्यालयाः सन्ति सहस्रशोऽन्ये ।
येषु प्रसिद्धा विबुधाः प्रबुद्धाः शिक्षाप्रदाने सततं प्रवृत्ताः ॥५२॥

सनातनं धर्ममिमे सदैव समाश्रयन्तः श्रुतिमार्गभक्ताः ।
वक्तृत्वशक्त्या भुवि नास्तिकानाम् मतं स्वयुक्त्या परिमर्दयन्ति ॥५३॥

विश्वप्रसिद्धः करपात्रधारी श्रीस्वामिवर्यः परमश्च हंसः ।
यो धर्मसङ्घं तदनुप्रवृत्तं श्रीरामराज्यं भुवि चातनोति ॥५४॥

एवंविधान्यस्य महात्मनोऽन्यान्यतीवदिव्यानि मनोहराणि ।
कार्याण्यनेकानि न कोऽपि तेषां निरूपणे शक्तिधरो नरः स्यात् ॥५५॥

मनोजजालनिर्गतः सरोजगर्जिसुन्दरः
जयत्यजस्रनैष्ठिको व्रती रविप्रभास्वरः ।
सरस्वती सदैव यस्य वाचि वैभवान्विता
विपक्षपक्षमर्दिनी तथापि मार्दवाञ्चिता ॥५६॥

विचित्रकल्पनाटवीप्रमत्तसिंहविक्रमो
धराधरेन्द्रसुच्छविर्जनावनायसश्रमः ।
प्रभावपुञ्जपोषितः पवित्रकीर्तिमण्डितो
जयत्वयं निरन्तरं समस्तशास्त्रपण्डितः ॥५७॥

यदीयकान्तिसम्मुखे विलज्जितोऽस्ति चन्द्रमा:
गभीरतानिरीक्षणेन सागरोऽपि गर्हितः ।
कदापि नैव तुङ्गता महाद्रिमण्डलेऽपि सा
बुधार्चिते महामुनौ सदैव या विलोक्यते ॥५८॥

समस्तभोगभावनाविहीनचित्तमन्दिरो
निरस्तमोहसन्ततिर्विराजतेऽति सुन्दरः ।
दयोदयप्रवर्तितप्रकृष्टवस्तुसंचयो
जनानतीवदुर्गतान् सदैव पालयँश्च यः ॥५९॥

दयान्वितो निरीक्ष्यते समागतैर्जनैर्मुदा
नकोऽपि कोपकारणेऽपि तादृशः क्षमामयः ।
उदारता निरीक्षता न तादृशी क्वचिज्जने
रिपौ समीपमागतेऽपि यादृशी महोदये ॥६०॥

नवीनयज्ञपद्धतिप्रचारचारुचर्चितः
श्रुतिस्मृतीतिहासशास्त्रविज्ञमानवार्चितः ।
निरम्बुमेघमण्डलप्रभावभासिताम्बरो
विराजते द्विजाग्रणीर्भुवि स्थितः पुरन्दरः ॥६१॥

उपस्थितेऽपि वैभवे न तत्र भोगलिप्सुता
पयोजपत्रसम्मिता तदीय संस्थितिः स्मृता ।
गतिर्गजेन्द्रशोभिनी मतिर्वितर्कभेदिनी
विराजतामहर्निशं प्रबुद्धवर्गमोदिनी ॥६२॥

समुन्नतो मदान्विते दयान्वितो मृदौ जने
महर्षिवृन्दवन्दनासु नम्रतामुपागतः ।
विनिद्रपङ्कजाभदिव्यपादयुग्मशोभितः
शिरोमणिर्विराजते प्रबुद्धलोकवन्दितः ॥६३॥

कुशासने पवित्रयुग्मभूषिताङ्गुलिप्रभः
सुमृष्टताम्रपात्रसंस्थवारिपूरिताञ्जलिः ।
दिनोदये विलोक्यते सुनीरतीरसंस्थितो
न शीतकालविक्रमेऽपि वर्तते व्यतिक्रमः ॥६४॥

प्रचण्डकामकोपलोभशत्रुनाशसक्षणः
गभीरधीरधीरबन्धुसान्त्वनाविलक्षणः ।
यमादियोगपद्धतिप्रचारदत्तमानसो
जनस्य मोहसन्ततेर्विनाशने सलालसः ॥६५॥

न कीर्तिकामुको भवान् न कामिनीषु सस्पृहः
करोत्ययं न भावनां सुकाञ्चनेऽपि काञ्चन ।
न कर्ममार्गविच्युतो जनैः कदापि वीक्षितः
प्रतिक्षणं कृतक्षणैः समुत्सुकैः प्रतीक्षितः ॥६६॥

भवाटवीपरिभ्रमन्नरावलीसमाश्रितः
सलज्जतामुपागतः प्रदानशीलशेखरः ।
ददाति नित्यमीश एव मां जना मुधा विदुः
इतीवनेत्रयोर्द्वयी निमीलितेव तिष्ठति ॥६७॥

शरन्निरभ्रमम्बरं तथा स्वकीयमम्बरम्
समानयन् सुमानयन् समागतान् बुधान् सदा ।
निवासवस्त्रभोजनप्रदानसेवया सकृद्
विराजते महामना मनस्विमण्डलाग्रणीः ॥६८॥

विनोपनेत्रधारणं सदैव तेन च स्थितम्
जरातुरेऽपिजीवने न जीवनेन किं नृणाम् ।
न कर्णशक्तिरीक्षिता कदापि तस्य दुर्बला
जितेन्द्रियोऽजितेन्द्रिये न मानवे रुचिं दधौ ॥६९॥

निरक्षरेऽथसाक्षरे चरित्रशीलशोभिते
जने पवित्रमानसे मनोमुदान्वितं दधौ ।
न वेदपाठपण्डितेऽपि सद्गुणैरमण्डिते
चिरन्तनेऽपि संस्तुतेऽपि सम्मतिं ययौ क्वचित् ॥७०॥

शुचित्वमर्थसंस्थितं न वारिणा मृदा शुचिर्
जितेन्द्रियः कृतश्रमो नरो न रोगभाजनम् ।
न दिव्यवस्तुभोजनं विधेयमेककेन वे-
ति तानि तस्य सुन्दराणि नो वचांसि संस्मृतौ ॥७१॥

प्रकाशते न काशिका तदीयदर्शनं विना
न भट्टिकाव्यचातुरी तुरीव कीर्तिकारिणी ।
न वेदपाठिमण्डलीविभूषिते वनस्थले
श्रुतेर्ध्वनिर्मनोहरोऽपि राजते न तं विना ॥७२॥

मनोजमानमर्दनं शिखण्डिपिच्छमण्डनम्
सितासितं प्रभुद्वयं समानमेवतत्प्रियम् ।
शिवे कपालकुत्सिते विभूषिते च केशवे
न भेदबुद्धिरीप्सिता कदापि तस्य वर्णिनः ॥७३॥

कदापि भस्मधारणं न विस्मृतं महर्षिणा
न रुद्रमालिका कदा जपाय न प्रवर्तिता ।
मृगाजिनोपरिस्थितो विभूषितः कुशादिभिः
मदीयचित्तमन्दिरे विराजतामनुक्षणम् ॥७४॥

कुशासने सुशासनो जपादिकर्मतत्परः
शमादिषट्कसंयुतो न संयतोऽपि मुक्तिगः ।
प्रसन्नधीरतीवकान्तिपुञ्जशोभिताननो
निवारयत्यहर्निशं जनस्य दुःखसन्ततिम् ॥७५॥

हिमाद्रिशृङ्गशोभिते सुरैरपिप्रपूजिते
विचित्रपुष्पसौरभे जगद्गुरौ मनोहरे ।
सचाद्यभारताजिरे यशःशरीरमाश्रितो
विराजते विराजिते कलिन्दकन्यकादिभिः ॥७६॥

नवनिधिप्रमुखा बहवो बुधाः समभवन्निह संयतबुद्धयः ।
द्विजजनोचितकर्मरताः सदा नरवरे नरवर्यविभूषिते ॥७७॥

आजन्म येन गुरुवर्यकृतोपदेशाद् यज्ञो व्यधायि विधिवर्धितसाधुभावः ।
संसेविता सुरगवी शुभजाह्नवी च धेनुश्च वेदपठनाहृतमानसेन ॥७८॥

आरोपिताश्च तरवः शतशो मनोज्ञाः पुष्पैः फलैश्चमधुरैः परिपूरिता ये ।
तानद्य पश्यति जनो विरहे निमग्नान् पुत्रानिवातिशयशोकविमूढचित्तान् ॥७६॥

मन्त्रध्वनिध्वनिततद्गृहमध्यभागादश्रूयतातिशयदिव्यपवित्रवाणी ।
धूमश्च सौरभभरप्रथिमाभिरामो नित्याग्निहोत्रविधिबोधक एव जातः ॥८०॥

अध्यापने निपुणता निजशिष्यवर्गे पुत्रेष्विवातिमधुरा रुचिरा च दृष्टिः ।
रोगातुरेषु करुणा भृशपीडितेषु दीनेषु दानपरता रुचिरुत्तमेषु ॥८१॥

स्वर्गंगतोऽपि सुकृतैः समुपार्जितैः स्वैरद्यापि जीवति मनोभवनेऽस्मदीये ।
तस्य स्मृतिः स्थिरतरा चिरमस्तुलोके शास्त्रोक्तकर्मनिवहे विनियोजयन्ती ॥८२॥

वेदान्तविद्याधिगतप्रमोदा न्यायादिशास्त्रे प्रथितावबोधाः ।
शाब्दे परेब्रह्मणि सप्रकाशा जयन्ति नित्यं विजयप्रकाशाः ॥८३॥

प्राचार्यतां साधु विभूषयन्ति शिवं प्रदोषे परिपूजयन्ति ।
समाधियुग्मं परिशोलयन्ति मनो बुधानामति हर्षयन्ति ॥८४॥

वन्द्याः प्रसिद्धा गुरवोऽस्मदीया गृहस्थधर्मेऽभिरुचिर्यदीया ।
निष्कामकर्माणि समाचरन्ति भ्रान्ति जनानां विनिवारयन्ति ॥८५॥

व्युत्पत्तिवादादिदुरूहतायाम् न खेदमभ्येति कदापि बुद्धिः ।
समस्तशास्त्रस्मृतिभिर्मनोज्ञे सरस्वती नृत्यति यन्मुखाब्जे ॥८६॥

त्रिवेदिनः केचिदथद्विवेदिनो यदीयशिष्याः परितो लसन्ति ।
तर्कादिशास्त्रे परमप्रवीणा मतं परेषां परिमर्दयन्ति ॥८७॥

सत्यव्रतेनाथधृतव्रतेन श्रीबालचन्द्रेण मनोहरेण ।
विभूषितं पार्श्वयुगं यदीयं स चित्तभूमौ चिरमाविरस्तु ॥८८॥

द्विपत्रितः पल्लवितः सुपुष्पः फलैर्युतो जीवनवृक्ष एष ।
मधुव्रतव्रातवृतः सदैव दिगन्तभागान् सुरभीकरोति ॥८९॥

स ब्रह्मलोकं गतवान् महात्मा प्रातः समाधाय मनोह्यनन्ते ।
विहाय सर्वान् रुदतो मनुष्यानाजीवनं तं सततं स्मरामः ॥९०॥

चरित्रमेतत् परमं पवित्रम् महर्षिवर्यस्य मनोहरस्य ।
मयासमासेन समीरितं तन् मनस्यनन्तं सुखमातनोतु ॥९१॥

श्रीजीवनस्य गुणराशिरनन्त एव मन्दस्य नास्तिविभवः खलु मादृशस्य ।
दोषव्रजः सततमेव विराजमानः चन्द्रे कलङ्क इव भातु मदीयकाव्ये ॥९२॥

विरलगुणोऽपिमदीयः पद्यप्रसूनबन्धोऽयम् ।
सुखयतु सज्जनहृदयं गुणलेशेप्यवाप्तपरिपोषम् ॥९३॥

श्रीसाङ्गवेदमहाविद्यालयप्रशस्तिः

(श्रीबांकेलाल त्रिवेदी, साङ्गवेदमहाविद्यालय, नरवर)

सन्मान्यानां नान्यसाधारणतपसां दिगन्तव्यापियशसां येषां श्रीमच्चरणरेणुकणस्पर्शो मादृशस्य प्रमादिनोऽपि प्रचुरपुण्यप्राप्यप्रज्ञावज्जनसन्निधिमादधानो मूकस्येव वाक् पङ्गोरिव गतिः, निःशरणस्येव निरापदं सद्म, निसर्गकरुणैर्गुरुभिरंकुरितस्य संवित्तरोः पल्लवनायेव नववारिदोदयः प्रतिभाति। तेषां सततस्मरणीयचरणानामनुकरणीयसदाचरणानां विद्वज्जनवन्दनीयानां सुमनोभिरभिनन्दनीयानां महामहिमानुभावानां मृदुलतरसुस्वभावानां सरलशुचिसमुदारान्तःकरणानां नियमिताखिलकरणानां सावित्रीमात्रशरणानां सकललोकैकशरणानां सुरसरस्वतीरसास्वादनतत्पराणां सद्धर्माचारप्रचारबद्धपरिकराणां धृतिक्षमादमास्तेयशौचेन्द्रियनिग्रहधीविद्यासत्याक्रोधैर्दशभिः सामान्यधर्मैः स्वाध्यायःयज्ञदानादिभिर्विशेषधर्मैश्च मूर्तिमद्भिरेकीभूयेव विभाविताकृतीनां सन्मतीनां धवलपरिधानेन भस्मच्छुरितललाटेन रुद्राक्षसंशोभितकण्ठकरेण वामस्कन्धविराजितोपवीतत्रयेण वपुषेव शशिमुक्तापयःशुभ्रेण यशसापि समुपासितानामनन्तश्रीसमलंकृतानां नरवरस्थश्रीसाङ्गवेदमहाविद्यालयस्य कुलपतिःमहाभागानां नैष्ठिकव्रतवतां श्रीमतां श्रीमहाराजचरणानामिदममरभारतीमन्दिरमेवरमणीयं प्रथमं सस्मरणं यत् खलु वेदवेदाङ्गसाहित्यदर्शनादिपरिशीलनशेमुषीजुषां विदुषां नित्यविलासेन यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाध्यष्टाङ्गयोगानुष्ठानप्रतिष्ठितानां वीतरागाणां परिव्रजद्वराणां सततनिवासेन चानुदिनमेधमानोदयं करालेऽपिकलौ कलितव्रतमिवभारतीयार्यमर्यादासंरक्षणे सक्षमं सद्वसुधाभागधेयमधिकमादधाति। नूनं साम्प्रतमपि एतद्देशप्रसूतस्य सकाशादग्रजन्मनः स्वं स्वंचरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः इतिवस्तुसत्यं प्रत्यक्षमक्षिलक्षीकृत्य श्रेयोर्थिभिरनेकशः सौभाग्यशालिभिर्विप्रक्षत्रविटशूद्रैः समाश्रीयतेऽयमाश्रमः। कः कोऽत्र नाभ्युपेतमुपेतः। कं वा नाश्लिष्यन्नीप्सिताः सम्पदः। केन वा मयाविना नावापि नैरुज्यम्। केन चात्र नाधिगतः परितोषः। कस्माद्वात्र स्थितान्नबिभेतिभवभयम्। कस्यवानात्र सौभाग्यभास्करोदयः। कस्मिंश्चात्र प्रतिवसति न विराजन्ते ब्राह्मणोचिताः सदाचाराः। तदिदम् निखिलश्रीमहाराजचरणानामेवतपसां फलं यद् आचन्द्रतारकमेतदीयसंस्मारकरूपविद्याभवनमिदं सुरभारती प्रचारतत्परतया प्रतिष्ठां स्वनिष्ठयैवप्रतिष्ठास्यति इति शम्।

श्रीमहाराजचरणानां तपःवर्णनम्

(श्रीसत्यव्रत शास्त्री, गढमुक्तेश्वर)

श्रीजाह्नवीसलिलसेवनपूतदेहानां कटितटधारितस्वदेशीयसितवस्त्रनिर्मितकौपीनकटिवस्त्राणां वामांसन्यस्तधवलस्थूलसूत्रनिष्पादितयज्ञोपवीतचतुष्काणामष्टोत्तरशतकुशसमूहमुष्टिकाशोभितवामकरतलानां कुशमुद्रिकाधारणसमुल्लसितकरद्वयानामिकाङ्गुलीनां गोमुखयन्त्रनिहितरुद्राक्षमालामनतावर्तनसञ्जातकिणाङ्गुलिसमुद्भासितदक्षिणकरकमलानां नित्यानुष्ठितसावित्रीमहामन्त्रोपांशुप्रयोगनिरस्तवाङ्मनसमलानां सम्भाषणकालोपशोभितदेदीप्यमानश्वेतदशनकिरणमिषोद्वान्तहृदयस्थसत्त्वगुणराशीनां सरलस्वान्तानां प्रातःस्मरणीयपूज्यपादपयोजानां नरवरस्थश्रीसाङ्गवेदमहाविद्यालयसंस्थापकानां वर्णाश्रमपरिपाटीसंरक्षणसक्षणानां सततविधृतनैष्ठिकब्रह्मचर्यमहाव्रतानां श्रीमहाराजजीपदोपलक्षितधर्माविच्छिन्नानां श्री १०८ जीवनदत्तशर्ममहोदयानां चरणकुशेशयरजःस्मारम् स्मारम् श्रीमहाराजपादच्छायसमाश्रयणोपलब्धवैद्यराजोपाधिविभूषितश्रीजगन्नाथप्रसादशर्मशास्त्रिनिर्मित्सिते तेषां जीवनचरिते कानिचिद् वाक्यानि सम्प्रेष्य मयाऽपि पवित्रीक्रियते स्वलेखनी।

महाराजपादैर्नानादिग्दिगन्तागताज्ञविप्रवटूनुपनीय शौचाचारशिक्षणपूर्वकं सन्ध्योपासनादिबलिवैश्वदेवान्तमावश्यकं नित्यकर्मोपदिश्य यथायोग्यमायुर्वेदवेदव्याकरणतर्कशास्त्राध्ययनाय महाविद्यालयं निर्माय ब्रह्मसत्रव्यवस्थाऽक्रियत।

अविशेषतः सर्वेषामन्तेवसतां भरणपोषणपूर्वकविद्यादानानन्तरं वृत्तिविवाहादिविधयोऽपि तैरेवाकारिषत।

अत एव "सपितापितरस्तासां केवलं जन्महेतवः" इति महाकविकालिदासोक्तिमनुसृत्याष्टवर्षदेशीयमर्भकं तेषां चरणेषु समर्प्य तैस्तैरभिभावकैर्निश्चिन्तैः सद्भिः कृतार्थैरभूयत।

अपूर्णशास्त्राध्ययनानां प्राचीनस्नातकानामपि काले-काले स्मरन्तो यज्ञानुष्ठानादिकर्मसंयोजनया तानपि गृहस्थान् पर्यपालयन्।

अपरिचितस्यापि शरणागतस्य सतो दीनकथां श्रावं श्रावं जपाकुसुमोपरागेण स्फटिकमणय इव तदीयदुःखदवानलेन संक्रान्तास्तन्निराकरणोपायेन तमुददीधरन्।

सकृत्समुपगतोऽपि जनो वार्तालापविधानेन संतुष्यन् चिरपरिचित इव सर्वाधिककृपाभाजनं स्वममन्यत।

इति तेषां सर्वजनवत्सला स्वाभाविको प्रवृत्तिरासीत्।

जपान्ते स्वैरस्वच्छन्दवार्ताद्वारैर्वैहलौकिकाः पारलौकिकाश्च महर्घा अप्युपदेशाः सरलेनैव पथा शुश्रूषूणां हस्तगताः समपद्यन्त अतएव उपचरितव्याः सन्तो यद्यपि कथयन्ति नैकमुपदेशम्। यास्तेषां स्वैरकथास्ता एव भवन्ति शास्त्राणि। इति सूक्तेः प्रत्यक्षोदाहरणभूताः श्रीमहाराजपादा आसन्।

तेषाममिततपःप्रभावाकृष्टा अनेके दुर्लभदर्शनाः साधवो विद्वांसो विविधकलाकोविदाश्च तत्राश्रमे स्वयमेवोपातिष्ठन् येषां दर्शनेन समीपग्रामनगरस्थजनाश्छात्रगणाश्च स्वभाग्यं प्रशंसन्तिस्म।

एकदा तत्रैव महाविद्यालये सर्वोच्चस्नातका विविधशास्त्रपारदृश्वानो न्यायव्याकरणाचार्याः श्री पं० ज्वालाप्रसादशास्त्रिणश्छात्रदशायामन्यैश्छात्रैः सह राजघट्टोपकण्ठमार्गे गच्छन्तो मार्गरोधकेन

महाविषधरेण विषधरेण दष्टाः समाचारं तं गृहीत्वा छात्रोऽन्यतमोऽहमदनगरवास्तव्यः श्यामलालशर्मा धावनत्वरितः श्रीमहाराजपादान्तिकमुपागमत् ।

पितेव पुत्रस्य दुःखं श्रुत्वा विह्वला इवाभवन् । परन्तु तदैवाकस्मात्तेजःपुञ्जपिञ्जरिताशाचक्र आविरभूदेकोयोगिराट् ।

अब्रवीच्च भो महाराज ! मास्मचिन्तागमः शान्तिमावह । क्षणेनैवाहं विषमपनेष्यामि, नागञ्च भस्मसात् करिष्यामीत्याश्वास्य समागतच्छात्रनिर्दिष्टेनपथा श्रीज्वालाप्रसादशास्त्रिणं साक्षात्कर्तुं सहैव विद्यालयवासिजनैः प्राचलद्योगिराजः । नरौराग्रामयायिनि राजमार्गे विद्यमानप्रपायां वृक्षच्छायानिषण्णं छात्रैः प्रदत्तानि निम्बपत्राणि चर्वन्तं समासादितवान् योगिराजः सर्पदष्टं सर्पमिव चेष्टमानं श्रीज्वालाप्रसादशास्त्रिणम्, तदनु स्वशुष्कवस्त्रं दृढं निष्पीडयता योगिराजेन तेन मम चक्षुषी पश्य इति सोद्घोषं वारत्रयमुच्चार्य निजनेत्ररश्मिसञ्चरणद्वारेण शास्त्रिणो विषविजृम्भणमपाकृतम ।

अत्रान्तरे समुपस्थितच्छात्रेष्वन्यतमः श्री पं० बह्मोगीदत्तशास्त्री संमूर्च्छन् पीतवर्णः सन् भमौ पपात । ततो योगिराजस्तमपि तथैव सम्बोध्य स्वक्रियया सुस्वास्थ्यमानयत् ।

ततः सुस्वास्थ्यलाभपर्यन्तं द्विरात्रमुषित्वाऽन्तर्हित इव क्वापि स्वाभीष्टदेशं जगामापुनर्दर्शनाय योगिराट् । तच्चमत्कृतिचर्चां कुर्वन् सर्वोऽपिजनः श्रीमहाराजपादतपोमाहात्म्यमेव प्राशंसत् । येन हेतुना तादृशः समागमोऽनुभूतः ।

एकदा श्रीजगद्गुरुशङ्कराचार्याः श्रीशुद्धबोधतीर्थमहोदयाः नैष्ठिकब्रह्मचारिणः श्रीमहाराजमहोदयान् योग्यान् विचार्य शङ्कराचार्यपदप्रदित्सया स्वयं नरवराश्रममुपागच्छन् । प्रस्तुतवन्तश्च श्रीशङ्कराचार्यपदं स्वीकर्त्तुम् ।

श्रीमहाराजमहोदयास्तत्पदं जपतपः प्रत्यूहरूपं बन्धनमिवाकलय्य प्रार्थनया प्रस्तावं तं निराकुर्वन् । अत्रान्तरे तत्पदजिघृक्षया समुपस्थिताः श्रीभारतीकृष्णतीर्थमहोदयाः सुयोग्या इति श्रीमहाराजमहोदयैः समर्थिताः । श्रीमहाराजमहोदयानां समर्थनेन पूर्वोक्तशङ्कराचार्यैस्ते स्वोत्तराधिकारिशिष्यत्वेन स्वीकृताः ।

श्रीमहाराजमहोदयास्तु त्रिकालगङ्गावगाहनगायत्रीजपविधानमहाविद्यालयसञ्चालनातिरिक्तं पौरुहूतं पदमपि नाकाङ्क्षन्तेस्म ।

तस्मिन्नेव शिष्टसमागमकाले जगद्विदितवैदुष्याः षड्दर्शनाचार्याः प्राचीनप्रसिद्धपण्डितेष्वन्यतमाः श्री १०८ श्रीविश्वेश्वराश्रमस्वामिमहोदया गङ्गातटनिवासेच्छया तमाश्रममलङ्कृतवन्तः ।

येषां शिष्येषु दिगन्तलब्धप्रतिष्ठाः विद्वज्जनवन्द्याः श्रीहरिहरानन्दसरस्वतीकरपात्रमहोदयाः प्रधानतया नरवराश्रमस्यैव विभूतिभूताः स्नातकाः सन्ति ।

श्रीषड्दर्शनाचार्यमहोदयेभ्योऽध्ययनात्पूर्वं तैर्नव्यव्याकरणसम्पूर्णमध्यमपरीक्षा तत्रैव महाविद्यालये सपरिश्रममधीत्यसमुत्तीर्णा ।

महाविद्यालयप्रारम्भकालादेव श्रीमहाराजमहोदयैर्नरौराग्रामग्रामण्योऽतिप्रभावशालिनो भूमिधराः श्रीचौधरीनन्दलालशर्ममहोदयाः नरवराश्रममहाविद्यालयस्य कार्यनिरीक्षकत्वेन सर्वोच्चशासकत्वेनाध्यक्षपदे निर्वाचिताः ।

ते च महोदया ब्रह्मचारिवटुभ्योऽन्येभ्यश्चसमागतसंन्यासियतिजनेभ्यो निर्मितभिक्षामामान्नभिक्षां दुग्धदधितक्राणि च सश्रद्धं ददतिस्म ।

तदा तेषां प्रभुत्वमनुशासनञ्च समीपस्थग्रामजनेष्वननिवर्तनीये अभूताम् ।

तेषां ग्रामवाटिकायां श्रीहरिहरचैतन्यब्रह्मचारिमहोदयोऽन्येऽपि ब्रह्मचारिणश्छात्राः पृथक् पृथक् कालेषु न्यवसन् ।

पूर्वोक्तषड्दर्शनाचार्यांस्तान् श्रीमाननीयो महावैयाकरणो दण्डी श्री १०८ अच्युतमुनिमहोदयो भृगुक्षेत्रं निनाय ।

तेऽपि तत्र कञ्चित्कालमुषित्वा कतिचिद्विदुषः पाठयित्वा स्वोत्कण्ठया नरवराश्रममेव श्रीमहाराजमहोदयप्रेमाकर्षिताः समीयान् ।

तत्र चाजीवनं वेदान्तन्यायशास्त्रेऽध्यजीगपन् तेभ्यः श्रीमहाराजमहोदया अपि वेदान्तशास्त्रमध्यैयत ।

एकदा पूर्वोक्ता नौकाविहारिणः श्रीअच्युतमुनिपादाः मस्करिणो नावैव नरवराश्रममुपायुः ।

तत्रत्यं नरवरमहाविद्यालयं गोयनकामहाविद्यालयरूपेण परिवर्तयितुं तेनैव नाम्ना सञ्चालयितुञ्च श्रीमहाराजमहोदयं प्रति प्रस्तुतवन्तः ।

अङ्गीकृतपरिपालनशीलैः श्रीमहाराजचरणैरुदीरितम् यदेतन्महाविद्यालयप्रारम्भकालेऽस्माकं समाज्ञया भिक्षावृत्त्याच यैः श्रीसूर्यमलबाबूलालादिश्रेष्ठिभिरितरैश्च दानशीलैरयमाप्यायितस्तैः क्रियमाणासेवा त्यक्तुमशक्येति व्यक्ति विशेषनाम्ना संस्थेयं भवितुन्न शक्नोति ।

इति श्रीमहाराजचरणानां त्यागमनोवृत्तिसूचकमुत्तरं श्रुत्वा दण्डिनस्ते महोदयाः स्वतरण्या भृगुक्षेत्रं समगच्छन् ।

नरवरमहाविद्यालयेऽनेके प्रधानाचार्यःपण्डितेषु मान्याः समागताः परन्तु कस्माच्चित्कारणात् परिवर्तनशीलैस्तैस्तैरभूयत ।

इत्थम् १९३० ईसवीयसंवत्सरपर्यन्तं परिवर्तनयुते तस्मिन्पदे तस्मिन्नेववत्सरे समुपस्थितैर्न्यायव्याकरणाचार्यैर्गुरुवरैः श्री पं० विजयप्रकाशशर्ममिश्राचार्यप्रवरैः समागम्यत ।

समागतैस्तैः सपरिश्रममध्यापिता अन्तेवसन्तो विद्यापारङ्गताः समभूवन् ।

लेखकोऽसौ पूज्य श्री पं० रामेश्वरदत्तत्रिपाठिचरणैः पूर्वाचार्यैः मध्यमा तृतीयखण्डान्तं यावत् सिद्धान्तकौमुदीमुक्तावल्यादिग्रन्थान्पाठितोऽपिपूज्यपादैर्वर्तमानप्रधानाचार्यैः सरहस्यसपरिश्रमशास्त्रतत्त्वप्रवचनैर्व्याकरणन्यायशास्त्रयोरग्रिमपरीक्षासु च समुन्मीलितनेत्रः समजनि ।

पूज्यश्रीप्रधानाचार्याणां वैदुष्यमहिम्ना महाविद्यालयोऽसावध्यापकसंख्यायां छात्रसंख्यायांचात्युन्नतिं प्राप्तवान् ।

महाविद्यालयस्य प्रवर्धमानव्ययभारयोगक्षेमचिन्तामग्नानां श्रीमहाराजचरणानां जीवनकाल एव पूज्याचार्यचरणैस्तादृशभारवहने स्वकन्धरासंयोजनं कृतम् ।

श्रीमहाराजचरणसम्पादितस्थिरसम्पत्त्या तेषां तपःप्रभावेण विद्यमानपूज्यप्रधानाचार्यमहोदयानांकायिकवाचिकमानसिकत्रिविधपरिश्रमेण पूर्वोक्तविद्यालयाध्यक्षाणां संरक्षणेन च नरवरस्थः श्रीसांगवेदमहाविद्यालयः प्रान्तीयशिक्षाशासनाधिकारिभिः प्रथमश्रेण्यां समुद्घोषितः सर्वाधिकं वार्षिकमनुदानं लभमानो वर्धतेतराम् ।

इत्थमाजीवनं सर्वभूतदयां दर्शयन्तः अश्वगवादिप्राणियाने यात्रात्यागव्रतं पालयन्तः नैष्ठिकब्रह्मचर्यपालनमहाव्रतं धारयन्तः सनातनदिनचर्यया गायत्रीजपमनुतिष्ठन्तः अनध्यासभावेन स्वसंस्थापितमहाविद्यालयसञ्चालनं कुर्वन्तः पूजनीयाः श्रीमहाराजचरणा अन्तकाले श्रीमद्भगवद्गीतास्वाध्यायसमुद्घोषं शृण्वन्तो "ब्रह्मनिर्वाणमृच्छति" इत्यन्तपदश्रवणानन्तरं पार्श्वं परिवर्त्य भौतिकं देहं त्यक्त्वा ब्रह्मलोकमारुरुहुः ।

महाविद्यालयप्रशस्तिः प्राचीनशिक्षापद्धतिश्च

(आचार्य श्रीहरदत्त शास्त्री, खुरजा)

कल्याणनाम्नः शुभया श्रियाश्रितान् पितामहान्नौमि सदार्द्रचित्तान् ।
यत्पुण्यलेशादलभे विशेषान् गुरूँश्च बन्दे विजयप्रकाशान् ॥१॥
नाथाम्यनाथो रघुनाथपादान् श्रीरामदेवीं जननीं तथैव ।
यदीयकुक्षेरहमाविरासं तदीयपादौ परिशीलयामि ॥२॥
श्रीरामं स्वगुरुं नत्वा गणपञ्च सरस्वतीम् ।
प्रस्तौमि जीवनं यत्तत् जगज्जीवातुकारणम् ॥३॥
यज्जीवनं वेदविदां हिताय यज्जीवनं संस्कृतमङ्गलाय ।
यज्जीवनं दीनजनोपकृत्यै प्रणौमि तं जीवनदत्तमेकम् ॥४॥

करालकालकवलितां वेदक्रियां विक्रियामितान् वेदाँश्च पुनर्भुवि प्रवर्तयितुं शिक्षयितुञ्च जनान् वेदविहिताचारान् ब्रह्मलोकादपि उन्नतलोकलिप्सयेव धृतावताराः ब्रह्मचर्यव्रतं श्रिता ब्रह्माण एव श्रीमहाराजपादाः ब्रह्मचर्येणतपसा देवा मृत्युमुपाघ्नत इति श्रुतिं सत्यापयितुमिवाजायन्त । वेदविद्या प्रचारसाधनं महाविद्यालयं च बुलन्दशहरप्रान्ते राजघट्टतः क्रोशद्वये पूर्वस्यांदिशि कलकत्तीतः पश्चिमायां दिशि अर्धक्रोशमिते ब्रह्मद्रवाया धरातलवासिजनोद्धारपरायाः स्वं सेवितुं समवेतानां जनानां मनःकल्पितानल्पमनोरथपूरणपरायाः श्रीभगीरथतपःप्रभावात् प्रसन्नतरायाः अतएव तद्वंशजोद्धारे विलम्बभयादिव कृतत्वरायाः भुवं प्रति सत्वराया उत्तरतः पूर्वदिशां प्रति निपतन्त्याः प्रोच्छलत्तारतरङ्गभङ्गाया गङ्गायाः परिसरे मन्ये ब्रह्मणा कल्पितं ब्रह्मपुरमिव भूसुरपूरं नरवरनाम्निस्थाने प्रत्यस्थापयन् । तत्रलोक्या आभ्यन्तरमपि स्वप्रभावादनाभ्यन्तरम्, स्वकमण्डलुच्युतामपि शर्वशिरोधृतां ब्रह्मलोकात्पतितामपि पतितपावनीं पर्वतान्निःसृतामपि सरितां प्रयातामपि अयातां यामुमाशङ्करौ शिवाश्रयामप्यशिवाश्रयां ब्रह्मलोकविरहव्याकुलामप्याकुलां मत्स्यादिभिः जलोत्पातनिपातजातघोषव्याजात् हरहरशब्दमनुकुर्वतीमिलामिमां प्रक्षालयन्तीं लोकयितुमिवैनां स्वाधिष्ठानाय रचितमुच्च चत्वरमिवाश्रमपदमभितः सर्पाकारैः शतशो वर्षाजलसर्पणकृतगह्वरखातैरालिङ्गितं भाति ।

आश्रमश्चायं सर्वथा विद्याकामेभ्यो निर्वाधसामग्रीसहितो दृश्यते । मन्ये सर्वं विचार्यैव श्रीमहाराजपादैरत्रविद्यालयः संस्थापितः । मया तेषां मुखादेवश्रुतमासीत् । यत्संस्कृत-विद्यालयं त्रिषु स्थलेषु न संस्थापयेत् । हट्टे घट्टे राजपथे चेति । एषु विविधविपुलजनसम्पर्कजन्यमनोव्यासङ्गकरेषु एकमप्यत्र नास्ति । अत एकान्तत्वादुपयोगितरमाभाति सहृदयेभ्यः ।

छात्राणां क्रीडनाय, सात्विकमनोरञ्जनाय जलस्थलोभयविधव्यायामाय च दर्शकानां दर्शनादेव किल्विषहरायाः पुण्यसलिलाया भागीरथ्यास्तीरम् ।

यत्रत्यं क्रीडनं, मनोरञ्जनं, जलतरणादिव्यायामश्च न केवलं शारीरिकस्वास्थ्यलाभायैव

अपितु अन्तःसत्त्वशोधकपुण्यार्जनविधया बुद्धिविवृद्धयेऽपि। एवं तथाविधसाधुसमागमायापि येषां दर्शनमपि पुण्याय, प्रदिष्टं शास्त्रेषु—ते पुनन्ति उरुकालेनदर्शनादेवसाधवः इति तीर्थीभूताहि तेस्वयमित्याद्यनेकशोवाक्यदर्शनात्। एतस्मादेव समये समयेऽल्पार्जितपुण्यालभ्यानांलब्धप्रतिष्ठानां महात्मनां दर्शनमुपदेशामृतञ्चाभूताम् सुलभे।

किं बहुना—विद्याविषये काश्यामपिलब्धकीर्तीनां जगद्विख्यातयशस्कानां परमपूज्यानामष्टोत्तरसहस्रश्रीयुतानांवि द्वन्मूर्धन्यानां श्रीविश्वेश्वराश्रमाणां तु वसतिस्तत्रैव ब्रह्मलयावधिकाऽजायत। यैर्भारतेधर्मसंघं संस्थाप्यानेकत्र धर्मसंघविद्यालयानुद्घाट्यधार्मिकेषु तथा राजनीतिवित्सु रामराज्यपरिषदं निर्माय तया च हिन्दू कोडबिलविरोधान्दोलनं गोहिंसाविरोधप्रदर्शनञ्च विधाय सर्वत्रस्वयशांसि व्यतानिषत। तेऽपिपरमादरणीयाः श्रीकरपात्रिमहाभागास्तेषामेव शिक्षया, उदबुद्धपूर्वजन्माभ्यस्तसरस्वतीकतां प्राचिख्यपन्त। एतेऽपि नरवर एवाध्यगीषत। अपरोऽप्येको महात्मा विष्णुदत्ताभिधः करपात्रिमहाभागानां सहाध्यायीतो विद्यालयादेव यः परमविरक्तः सन्नुत्तराखण्डमयात् नाद्यापि प्रत्यावर्तत तत्रैव मौनमाभजमान आस्त। अन्येऽपि शिष्याः श्रीविश्वेश्वराश्रमाणां सन्न्यासदीक्षायामभूवन् येषु श्रीरामकृष्णाश्रमाः प्रधानतराः शिष्याः सिद्धेषु महात्मसु सुगूढतमा आसन्। येषां शिष्येषु श्रीविष्णवाश्रमाः प्रवचनव्याख्यानादिविषयेषु न कस्माच्चिदपि महात्मनो विदुषो वा न्यूनतां विषहन्ते।

अपरे श्रीसोमाश्रमाः प्रभासभिक्षव इतिख्याताः सन्न्यासात्पूर्वमेतेऽधीतसाङ्गोपाङ्गवेदाः स्मार्तकर्मकाण्डनिष्णाताः, तन्त्रागमविषयेतु न केनापि विदुषा तैः सार्धं समता विभराम्बभूवे।

मयापि तन्त्रविषये तत्प्रसादभाजाभावि। येषां चरणाब्जपरागलुब्धाः सहस्रशोधनिका अभ्रमरायन्त। आश्रमादाश्रमं गच्छेदितिस्मृतिमन्वसरन्—"यो जन्मनालङ्कृतवान् प्रभासं गृहाश्रमञ्चाप्युचितक्रियाभिः" "श्रिया समभ्यर्च्य सुतेन साकं प्रियां स गङ्गातटमाससाद॥" तथैव नरवरं समेत्य तपः स्वाध्यायपरायणाः अल्पीयसैव कालेन विश्वेशं प्रसाद्य सर्वं सन्न्यस्तवन्तः। येषां संस्मरणमद्यापि कृतसान्निध्यान् प्रहर्ष्य रोमोदगमैरञ्चयति। स्थानसन्निवेशः विद्याकामस्तु गिरिशमितिभागवतादेशानुसारं प्राचीनतरं तत्रैकमस्ति परात्परस्य ब्रह्मणः शिवस्य मन्दिरं यस्योपासनया ततस्त्याश्छात्राबहुत्र महाविद्यालयेषु प्रधानाचार्यपदमधिचकासति।

यन्मन्दिरमभितोऽनेकशो निम्बादिवृक्षैराच्छन्नं विशालं प्राङ्गणम्। यत्राद्यापि प्रत्यहं छात्राः समुपस्थाय लोकशङ्करं शङ्करं समुपासते। अभिप्राङ्गणं छात्राणां निवासाय अध्ययनाध्यापनाय च रचिताः प्रासादाः प्राकारीयन्ते। ततोऽपि बहिर्भागे पृष्ठभागमभिरक्षन्तः पश्चिमायां दिशि अध्यापकानां गृहाः। अग्रतोऽपि पूर्वस्यां दिशि आगन्तुकानां कृते सन्तिकेचिदावासकुटीराः। अस्यामेव दिशायां गङ्गामितस्यमार्गस्य दक्षिणे भागे विद्यते कुलपतिमहाभागानां कुटीरः। यदाभ्यन्तरे, एकपार्श्वे विरचिते स्थण्डिलेकृतशयनाः प्रातः सार्धत्रयवादनवेलायामुत्थाय प्रातःस्मरणपूर्वकं शौचस्नानादितो विनिवृत्य जपन्तिस्म गायत्रीं कुलपतयः।

विद्यालयस्योत्तरपार्श्वे पुष्पवाटिका शोभ्यते। दक्षिणभागेऽपि केषाञ्चिदध्यापकानामावासाः एकपार्श्वे वेदाध्यायिनां दण्डमेखलाधारिणां ब्रह्मचारिणां बद्धपङ्क्तिकुटीरास्तदग्रे श्रीविश्वेश्वराश्रमाणां निवासस्थानं ब्रह्मभवनमिति ततोऽपरत्र विशाला स्वकोणस्थप्रकोष्ठैः कृत्वा भूरिशाला चैकायज्ञशालेति। समेऽप्येते प्रासादाः साम्प्रतं तत्र दर्शनाय कार्यान्तरेण वा समागतानालोक्यागन्तुकान् तद्विरहजन्य

शोकावरुद्धकण्ठा इव मौनं भजन्तोऽपि स्मारयन्ति महाराजपादान् ।

इह प्रातःकाले संन्ध्यामुपास्य यज्ञं विदधतो लघुवटून् विलोकयतां न केषां प्रसीदन्ति चेतांसि इति धर्मप्रसूतिरेष विद्यालयः ।

विद्यालयस्य कुलपतयो लब्धसकलशास्त्रमर्मज्ञसान्निध्या धर्मशास्त्रतत्त्वज्ञास्तन्निर्दिष्टाचारशीलाः अधीतानुकूलवृत्ताः समचित्ता नितान्तं प्रशान्तान्तःकरणा विधेयान् विनेतुं ननु वैधेयान् सद्गुणान् तेष्वानेतुमपनेतुञ्चासद्गुणान् समये समये स्वयमुपदिशन्तिस्म ।

एकदा लोकलोचनरश्मीनेव निजरश्मिब्याजेनादाय पश्चिमाब्धौ निमज्जति भास्करे तद्विरहजशोकस्तोमतमश्छन्नासु दिशासु निष्पन्दीभूतेष्विव वृक्षेषु समाधिमाकलयत्सु मुनिष्विव मौनमासादयत्सु सायन्तनीं संध्यां विधायाश्रममध्यस्थमन्दिरगतंशङ्करमार्तिक्या अनन्तरं सम्प्रार्थ्य कुटीराग्रचत्वरेपाषाणपट्टिकायामास्तीर्णमासनमध्यास्य जपपराणां श्रीमहाराजवराणां पादेषु समेत्य प्रणमत्सु केषुचित् छात्रेषु, प्रणम्योपविशत्सु गच्छत्सु च केषुचित् परम्परया प्रणामाय समागच्छत्सु चापरेष्वाश्रमवासिषु समुद्भवन्वटूनां वेदसमुद्घोषः मन्ये जायमानविचारगोष्ठीमङ्गलपरम्परामपूरयत् । समनीनशच्च शृण्वतामन्तश्चरं कश्मलम् । समीपस्थेभ्यो नगरेभ्यः स्नानार्थमागतेष्वपि महाराजयशसैव कर्णग्राहं गृहीत्वैतत्स्थानमानीतेषु विनीतेषु कश्चिदेवमवोचद्भक्तः—

भगवन् !

क्व साम्प्रतं भवादृशां तपःसारभूतामपरिचितेष्वपिनिःस्वार्थकरुणापराणां दानेषु दयावतामनाथनाथानां शरण्यानां ब्रह्मण्यानामागतस्वागतपराणां स्वपक्षविपक्षरहितसर्वहितकराणां तत्तन्मनोधृतमनोरथपूरकाणां भारतीयसंस्कृतिसभ्यतासंस्थापकानां यथाधीताचरणपराणां जगद्धितानां महात्मनां दर्शनानि ।

अधुनाभारते वञ्चका लुण्टाकास्तस्कराश्च मस्करिवेशं कलङ्कयन्ति । ब्राह्मणाश्च छद्मवेशधराः सर्वेयाचकवृत्तिपराः धरायेषांधारणादपि अधरीभवति । सर्वत्र पितापुत्रयोः गुरुशिष्ययोः पतिपत्न्योः श्वश्रूवध्वोः स्वामिभृत्ययोः किं बहुना सहोदरभ्रातृषु कुलपरम्परागतमित्रेष्वपि च परस्परं विद्वेषो नगरे नगरे ग्रामे ग्रामे गेहे गेहे च प्रसृतो दृश्यते । न्यायतोऽन्यायतो वार्थार्जनपराः कर्तव्यशून्या जनादरीदृश्यन्ते ।

न्यायालयेष्वपि न न्याय उत्कोचमन्तरालभ्यते । नेतारोऽपिस्वपदलिप्सया बहुमतार्जनाय सद्योऽवद्यानप्युपायानातिष्ठन्ति ।

तदस्य देशस्यहितायोपदिशन्तुभगवन्तो यतो नावसीदेरन् देशवासिन इति प्रस्तुतं विचारयन्निव क्षणं मौनमाधाय तदनन्तरमित्थमवोचन् कुलपतयः—नास्यदोषस्य कालो, देशो, वातावरणं वा कारणं कालदेशयोर्निष्क्रियत्वात्, वातावरणस्य च तदानीतनजनसमुदायक्रियाप्रभवत्वात् । जनसमुदायस्य व्यक्तिभ्योऽपृथग्भावात् । व्यक्तिश्च यत् यादृशं च शिक्षते मनुते विचारयति तदेव कुरुते तस्य पुरुषस्यक्रियायाः प्रभावश्च वायौ सङ्क्रामति वायोर्मण्डलमेव वातावरणमितिनिगद्यते यस्मिन् काले देशे जना बाहुल्येन नियताचारा अलुब्धा याथातथ्यवेदिनो यथार्थभाषिणश्च भवन्ति ।

तदानीन्तनं वातावरणं जनजीवनहितकरं समीचीनञ्चोच्यते अतोऽस्यदोषस्य आधुनिकशिक्षाप्रणाल्येवमूलमिति अस्याः सुधारे यत्नो विधेयो देशवासिभिः ।

प्रियाः !

परै र्विजितोऽपि परस्यकरैर्व्यथितोऽपि न तावन्मृतो भवति देशो यावत् स्वसभ्यतां संस्कारांश्च बिभर्ति। किन्तु स्वसभ्यतासंस्कृतिभ्यां हीनस्तु स्वतन्त्रोऽपि नष्ट एवेतिनिर्विवादम्।

तयोः संरक्षणमितिहासरक्षणाद् भवति। इतिहासरक्षणञ्च स्वदेशीयभाषाया रक्षणात्-शिक्षणाच्च जायते।

अतोऽत्र राजनीतिविद्भिस्तादृशमेव विधानंविधेयमिति। यावत्त्वस्माकं देशवासिनां दौर्भाग्यात्-परभाषापुष्टैः नास्य देशस्यभाषा सर्वव्यवहारसाधनसमर्थेत्युक्त्वा प्रतार्यन्ते देशवासिनस्तावत् भाषा विवादमपहाय शिक्षाप्रणाल्येव संशोधनीयेति।

प्रचलितायाः शिक्षापद्धतेर्दोषाः प्रतिपदमनुभूयन्त एव इत्युपेक्ष्य पुराकल्पे प्रसिद्धां पद्धतिं तद्-गुणाँश्च प्रदर्शयितुमीहे—भाष्यकृताहि महाभाष्ये लिखितम् पुराकल्प एतदासीत् यत्संस्कारोत्तरं ब्राह्मणा व्याकरणं स्माधीयते इत्यादि—ततः प्रतीयते यत् यज्ञोपवीतसंस्कारः शिक्षाया अङ्गमासीत् ये विद्याग्रहणेऽसमर्थाः अन्धा वाक्विकला रोगविशेषयुक्तावा तेषामयं द्विजातीनामपि न भवतिस्म। संस्कारवन्त एवाध्येतुं प्रभवोऽभवन्। संस्कारोत्तरं छात्रा गुरुसन्निधान एव निवसन्तिस्म। सायं प्रातः संध्योपासनविधिना सूर्यं समिधाधानेनाग्निं, ब्रह्मचर्यपालनेन शास्त्रप्रणेतॄन् ऋषीन् संध्याङ्गतर्पणेन स्ववंशपितॄन्।

भिक्षाचर्यया गुरुशुश्रूषया च गुरून् सन्तर्प्य विद्यामलभन्त इति। भिक्षाचर्याया लाभाः सन्त्यनेके।

यदा भिक्षाचर्यया शिक्षामशिक्षन्त छात्रास्तदा नाभिभावकानां नापिराजकीयस्य द्रव्यस्य एतावान् व्ययोऽजायत।

यथाऽद्यत्वे कतिपयकोटिमुद्राणां शिक्षाविभागे व्ययो जायते। जायते च व्यर्थतामेव देशमधो निपातयन्।

अस्यां पद्धतौ निर्धनानां सधनानाञ्च बालाः विद्यायां समानलाभा अभूवन्।

निर्धनानां बालाः खेदं नावहन्त। यथाऽद्यत्वे धनिकानां बाला वारत्रयमनुभूयापि-अनुत्तीर्णतामुच्चशिक्षां लभन्ते। कुशाग्रबुद्धिरपि निर्धनस्य बालो न तामाप्नोति धनाभावात् महान्तं खेदञ्च समश्नुते। अयं भेदः पूर्वकाले नासीत्।

पुरा-अधीयानाः परस्परमेकगुरौ निवासात् समानचर्यया समानव्रतात्, समानव्यवहारात् च धनिकाधनिकयोरुत्तमाधमयोर्भेदमपहाय सौहार्दयुतभ्रातृभावमनुभवन्तिस्म श्रीकृष्णसुदाम्नोरिव।

तदानीमधीयानानां जनतया सह सम्बन्धोऽपि जायतेस्म। तेऽन्वभूवन्-अध्ययनकालेऽस्माकमेभि-रेवान्नवस्त्रादिना सहायता व्यधायि। अतोऽधुना शासकपदमुपलभ्यापि अस्माभिरेषां सेवया प्रत्युपकृतिर्विधेयेति विचारयन्तिस्म। इदानीन्तनानामिव जनतारक्तशोषणात्मिकां शासनपद्धतिन्नाददतेस्म। न वा, उत्कोचलिप्सवोऽजायन्त अपितु स्वपरभावमपहाय सर्वान् स्वपितॄनिव उपासतेस्म। न च सम्भाव्यते कदापि यत् येषांगृहात् यः प्रत्यहं भिक्षामादत्ते स तेषां भार्याः बालिका वा कुदृष्ट्या विलोकयेत्। यथाऽद्यत्वेऽधीयानेषु सर्वत्रोपलभ्यते।

तदानीं गृहस्थाः प्रतिगृहं भोजनसमये समेताय छात्राय श्रद्धया सादरं सुन्दरञ्चभोजनमयच्छन्। स्वस्वमनस्येवमचिन्तयन् यदेवमेवास्माकमपि बालाः कुत्रचिद् केषाञ्चिद् गृहे याचमाना भविष्यन्ति। एतस्मादेव कारणात् पुरा राजानोऽपितदानीन्तनान् छात्रान् दयया श्रद्धया च प्रह्वीभूताः प्रणमन्ति

स्म । तेषां गुरूणामादरभावस्यतु कथैव का ।

प्रतिग्रहादिदोषोऽपि न लगतिस्मतेभ्यः । यतो लिखितं मनुना कदन्नं वा सदन्नं वा भिक्षा नैव प्रतिग्रहः इत्यादि—

पुराशिक्षायामाचारस्य प्रधान्यम् आसीत्

इदमप्यवगच्छन्तु यत्तदानीं शिक्षाया लक्ष्यं नाक्षरमात्रशिक्षणपर्यवसाय्यासात् ।

अपितु शिक्षकैः स्वजीवने शास्त्रनिचयमवलोक्य यदेव हितकरमनुभूतं तत् स्वशिष्याणामाचारेऽवतार्यआचार्यसंज्ञाऽलम्भि । आचारः परमोधर्म इत्यादि श्रुतिमनुसृत्य आचारप्रधानैव शिक्षाऽऽसीत् । प्रातरुत्थानादारभ्यशयनान्तो यावान् वार्तालापादिको व्यवहारः मूत्रपुरीषयोरपि त्यागः शास्त्रोक्तविधिनैव छात्रैः विधीयतेस्म । आधुनिकास्तु मूत्रयन्तः कुक्कुरानप्यतिशेरते आपणेऽटन्त एव भुञ्जाना दरीदृश्यन्ते ।

योगाङ्गानुष्ठानशिक्षणमपि शिक्षया सहैव प्राचलत् । पुरा छात्राः हितमितसत्यवादिनो यमनियमासनप्राणायामप्रत्याहारध्यानधारणासमाधिरूपाष्टयोगाङ्गाभ्यासपराः सन्तो विद्याशिक्षणकाल एव योगविचक्षणा जायन्तेस्म । हास्यादिकालेऽपि नातथ्यवादिनोऽभूवन् ।

अत एव तेषां मुखात् रभसादपि निःसृता वाक् नासत्यत्वमयात् यथाभवभूतिनोक्तम्—ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति । योगसूत्रेऽपि सत्यप्रतिष्ठायां वाक्सिद्धिरिति पतञ्जलिनावाचि ।

अद्यत्वे त्वस्माकं छात्राणां द्वादशवार्षिकः कालः शिक्षायां नियतो व्यर्थतां याति । योगाङ्गानामनुपासनात् यदिसत्यस्याप्येकस्य क्रियेताभ्यासस्तर्हि वाक् वज्रप्रयोगकुशलाः कथमन्यस्यतिरस्कारभाजः स्युः । अपितु स्वचमत्कारेण जनान् चमत्कुर्युः ।

अण्वस्त्रनिर्माणायाधुनिकावैज्ञानिकाः प्रयतन्ते वहुधनं च व्ययीकुर्वन्ति । वाक्वज्रनिर्माणे तु नैकस्यापि पणस्य व्ययोभवति । केवलमुभयलोकसुखावहं सत्यस्य पालनमेवापेक्ष्यते । एवमहिंसाधर्मो गीयत एवाहिंसावादिभिराधुनिकैः बौद्धादिभिः परमद्यावधि नैकस्यापि परमा प्रतिष्ठा अहिंसायामभूत् । यतोहि योगसूत्रे अहिंसाप्रतिष्ठायां तत्सन्निधौ सर्वभूतवैरत्याग इत्युक्तमस्ति । न चेदानीमवलोक्यते क्वापि कश्चिद् यस्य सन्निधौ तथा दृश्येत ।

पुरा आसन् ऋषीणामाश्रमा यत्र हिंसाविहारिणः सिंहा मृदुतृणादिनोमृगाश्च एकत्रैवावसन् । कविकुलगुरुकालिदासेन शाकुन्तलाभिज्ञाने कश्यपाश्रमे सिंहशावकदन्तान् वलात् गणयन् भरतो नाम बालः प्रादर्शि एतादृशानि वहुशो निदर्शनानि पुराणग्रन्थेषु वर्णितानि सन्ति ।

प्राचीनशिक्षापद्धत्यामासन् बहवः गुणाः येषामुल्लेखः कस्मिंश्चिदन्यावसरे भविष्यति ।

अतोलोकहिताय सर्वहिताय, आत्महिताय च शिक्षाप्रणाली गुरुजनसेवाद्याचारप्रधाना स्यात् । यावदेषा भारतीभाषा न सर्वत्र प्रासरिष्यत् तावत्भारतं भारतं नाभविष्यत् भारते श्रवणकुमार सदृशाः पितृभक्ताः, एकलव्यतुल्याः गुरुभक्ता अभूवन् । व्याकरणशास्त्रप्रणेता पाणिनिरपि गुरुशुश्रूषयैव पारङ्गतः सन् व्याकरणशास्त्रं प्रणीतवान् । इत्याद्यनेकशोदृष्टान्ता मदक्षिसमक्षंलक्ष्यतयावतरन्ति । श्रद्धालवः !

महर्षिदयानन्दप्रभृतीनां लोकहितायप्रवृत्तानां समेषामेतादृगेव विचारः आसीत् ।

अत एवानेकत्र गुरुकुलानि संस्थापितानि नेदानीं तानि योगाचारनिरताध्यापकानामभावात् स्वलक्ष्यं पूरयन्ति।

अधुनाकर्तव्यतायै यशसे च भवतां निर्दिश्यते अधस्तात् परिपालनाय स एष एवोपदेशः आदेशश्च यन्मयापि एतानेवविचारानादायायं विद्यालयः संस्थापितः यस्याभिरक्षणंभवादृशामेव धर्मधुर्याणामधीनमिति आशीर्वचसासहप्रस्तौमि—

मयापिसंस्थापित आश्रमोऽसौ भवादृशामेवविभूतये स्तात्।
पुष्ट्यै भवन्त्वस्य कृतप्रयत्नाः नतृप्तयेकस्ययशः स्वकीयम् ॥१॥
नकेनयत्नो यशसे व्यधायि नकेन चिह्नान्यवशेषितानि।
अस्यैव पोषे तु ममाभितोषो यतो ममैतत्प्रियतामुपैति ॥२॥

इत्येवोक्त्वा व्यरमत्।

अन्ते श्रीसंस्थापकचरणकमलयोः सादरं श्रद्धाञ्जलिमेवार्पयामि–

यस्य वह्नौ जगद्भास्करे भास्करे विष्णुपद्या जले विष्णुमूर्तावपि ॥
लोककल्याणकृच्छक्तिसम्पूजने साम्बमूर्तौ तथा चिद्घनेशङ्करे ॥१॥
रामदूतेऽञ्जनानन्दनेमारुतौ एकदन्ते बृहच्छुण्डलम्बोदरे ॥
शूर्पकर्णे गणेशेह्युमानन्दने भक्तिरासीद्दृढा सूत्रसूक्तेविधौ ॥२॥
वेदसम्प्रोक्तसन्ध्यादिके कर्मणि श्रद्दधातिस्म स श्राद्धसन्तर्पणे ॥
नास्ति मन्त्रः परो वेदमातुर्ऋते ह्युक्तिरेषा निजाचारतः सत्कृता ॥३॥
यस्य वश्येव कण्ठं गता भारती शास्त्रसर्वस्वसारंपुरस्कुर्वतो ॥
चञ्चला यत्र मा निश्चलात्वं गता तं शरण्यं श्रये जीवनोज्जीवनम् ॥४॥

इतः प्रयाते परमप्रभावे जगन्नुते जीवनदत्तनाम्नि।
नशर्मनामापि विलोक्यतेऽस्मिन्ननेकशः शर्मभिरावृतेऽपि ॥
समुद्यरूपंकरविग्रहाणां गते रवौ किं जगतिप्रकाशः।
तथा गते श्रीमहनीयपादे नशोभतेश्रीविजयप्रकाशः ॥
जीवेगते पूर्णमिदं शरीरंप्रेमास्पदंनाभिमतंयथैव।
तथैवसोपस्करमेतदद्य स्थानंसमंरिक्तमिवानुभूतम् ॥

न ब्राह्मणानां न च पार्थिवानां नचास्तिमध्येऽपिविशां त्विदानीम्।
असंस्तुतानामपि दुःखहारी योऽनेनपुंसातुलनामुपेयात् ॥
यदीयमाहात्म्यकथाप्रसङ्गं विहाय नान्यल्लभतेऽवलम्बम्।
मनोमदीयं पुरुषाय तस्मै नमोऽञ्जलिं सादरमर्पयामि ॥

नरवराश्रमम्

(श्रीहरिस्वरूप शर्मा, फिरोजाबाद)

सप्तत्रिंशदुत्तरैकोनविंशतिशततमे ईशवीयवर्षे चिरकालरुग्णस्य स्वानुजस्य स्वास्थ्यलाभार्थमितस्ततः प्रयतमानस्य मम हृदये नरवरे शोभमानमाश्रमं गन्तुमीहा प्रादुरभूत्। बुलन्दशहर नामकप्रान्ते बहुमुखविद्याप्रचारस्य केन्द्रभूते, गीर्वाण-विद्याविनोदिभिः तस्याः प्रचाराय प्रसाराय च सततं प्रयतमानैः श्रेष्ठिभिरधिष्ठिते खुर्जानाम्निनगरे श्रीगोयनकामहोदयैः निर्मापिते श्रीराधाकृष्णमहाविद्यालये अधीयानस्य मम भगवत्याः भागीरथ्यास्तटे स्थितस्य महाराजश्रीविभूषितस्य श्रीजीवनदत्त ब्रह्मचारिणः प्रशस्तिः यद्यपि बहुशः श्रुतिपथमगात् किन्तु इदानीम् बलवती तद्दर्शनोत्कण्ठामाम् एतावत् परवशमकरोत् यत् तद्दिने रात्रौ निद्रामहं न लब्धवान्।

अन्येद्युः उदिते भगवति गभस्तिमालिनि सानुजोऽहम् तम् द्रष्टुम् प्रस्थानमकरवम्, अल्पीयसा एव समयेन तत्र गत्वा प्रथमम् अहम् सदासन्निहितकुसुमफलैः पादपैरुपगूढम् तरुशिखरनिर्मितकुलायेषु नानादेशसमागतशुकशकुनिकुलैः अनवरतघुष्यमाणजयशब्दम्, विविधफलशालिवृक्षाधिष्ठितपक्षिसमुदायेन पात्यमानामृतस्वादुसरसफलसमुदायम्, पर्णशालाप्राङ्गणमभितः प्ररूढहरितदूर्वादलम्। वेदाध्ययनमुखरवटुजनम् इतस्ततः विचार्यमाणविविधसमस्याजातम् सकलेन्द्रियनियमननियमव्यापृतान्तेवासिजनम्, सायंकाले बहुधा व्युत्पन्नछात्रैः मण्डलानि आवध्यालोच्यमानसकलशास्त्रार्थम् अनवरत श्रुतपूतपदावलिपुनरावृत्तिपरायणशुकसारिकाकुलम् सनियमम् सायं प्रातः हुतहोमहुताशनेन देदीप्यमानम् अहरहः सन्ध्योपासनव्यापृतसकलछात्रसमुदायम् ततः वाच्यमानविविधपुस्तकम् कुत्रचित् सम्मार्जितोऽजाभ्यन्तरभूतलम प्रक्षाल्यमानमलिनवसनम् उपचीयमानतपोविभ्रम् संचीयमानसमिधम्, अदृष्टपूर्वम् कलिकालस्य अपरिचितं कामदेवस्य, सदासन्निहिततरुलतागहनान्धकारम् अतिरमणीयम् जीवनदानपरायणेन जीवनदत्तमहोदयेन स्थापितमेकमत्यायतं विद्यामन्दिरमपश्यम्।

तदालोकनमात्रेणैवापगतश्रमश्च विहाय सर्वान् कामान् श्रीब्रह्मचारिणः दिव्यमंगलविग्रहं साक्षात्कर्तुमगच्छम्। तत्र च विद्यामन्दिरस्य बहिर्द्वारे उच्चभूमिस्थिताम् पादपस्यैकस्य घनीभूतशीतलच्छायायां विनिर्मितां परमशान्तेः साम्राज्यमनुभवन्तीम् अग्निगर्भाशमीमिव स्वस्वामिनः तेजोराशिं दधानाम् अन्तःस्थापितपुराणेतिहासोपनिषद्विविधदर्शनशास्त्राम् शयनाय पवित्रकाष्ठपीठिकासनाथैकदेशामन्तर्निहितभगवदर्चनानेकविधसामग्रीभिरुपेतामेकां दिव्यां पर्णकुटीम् व्यलोकयम्।

तत्र च साक्षात् सदाचार तपोमूर्तिम् गीर्वाणवाणीवाक्यानि एव समुच्चारयन्तम् स्वज्ञानालोकेनाज्ञानतिमिरं दूरीकुर्वन्तम् कादचित् आश्रमस्थानाम् अन्तेवसतां शिक्षकाणाञ्च दैनिकसमस्यानाम् अभूतपूर्वसमाधानदानोद्यतम् उन्नतललाटे त्रिपुण्ड्रम् दधानम् साक्षात् त्र्यम्बकमिव उपलक्ष्यमाणम् सर्वशास्त्रनिष्णातम् स्वब्रह्मचर्यप्रभावेणस्वस्मै सुदूरसमागतान्तेवसद्भ्यः शिक्षकेभ्यश्चप्रभूतबलमर्पयन्तम् समुद्भासितयज्ञोपवीतम्, श्वेतोत्तरीयम् अलंकुर्वन्तम् आश्रमस्वामिनम् श्रीब्रह्मचारिणम् विलोक्य स्वकीयलोचनसाफल्यमकरवम्।

दृष्ट्वा च तम् महाभागम् दूरादवनतेनमौलिना महीम् अगच्छम्। श्रीचरणानां शुभाशिषाऽनुगृ-

हीतः केनचित् सेवकेन आनीते आसने उपविश्य अहम् यदा स्वागमनकारणं विनिवेदयितुमभिहितः तदा स्वात्मानं धन्यं मन्यमानोऽवदम् यत् आर्तत्राणपरायणस्य भवतः साक्षात्कारः एव प्रेरितवान् श्रीमच्चरणारविन्दवन्दनानन्दानुभवं कर्त्तुम् नान्यत् किञ्चित्, भवतां यशसा तृप्तौ मम कर्णौ तु स्वसार्थकताम् दधानौ स्वसमीपवर्तिनी चक्षुषी अपि स्वसाफल्यमाप्तुम् प्रेरितवन्तौ ते त्विदानीम् श्रीमद्दर्शनं प्राप्य कृतकृत्ये अभूताम्। एतदुदन्तजातम् सर्वम् श्रुत्वा अतिप्रसन्नो जातः महानुभावः।

तत्र चिरम् स्थित्वा चित्रमिदम् आलोकितम् मया यदनुपजातपरिचयोऽप्यहम् तेन महानुभावेन प्रदर्शितव्यवहारेण सौजन्येन च चिरपरिचितः इव आत्मानम् अन्वभवम्। शनैः शनैः श्रीमतां तत्र भवताम् अनुग्रहेण सर्वेऽप्यन्ते वासिनः शिक्षकाश्च परिचयं कारिताः सौहार्द्र भावं प्रकटयन्तः सहवासिनः एवं सहपाठिनः इव संजाताः। अल्पीयसा एव कालेन तैः सह निवसन् विहारशय्यासनभोजनेषु अन्यास्वपि दैनिकचर्यासु अशान्तिविरहितम् सुखमपारम्प्राप्नवम्। तेषाम् निष्कारणैकपक्षपातिना स्नेहेन बन्धुबान्धवाः अपि तत्र वसतः मम विस्मृतिपथमगच्छन्।

एवंविधम् जीवनं यापयन् अहमेकदामनसि अचिन्तयम् यत् सर्वेऽपि मानवाः क्षत्रियकुलोत्पन्नस्य मर्यादापुरुषोत्तमस्य श्रीरामभद्रस्यादरपूर्वकम् उच्चब्राह्मणवंशोत्पन्नस्य वेदविद्याविशारदस्य रावणस्यचानादरपूर्वकम् नाम ग्रहणं कुर्वन्ति। किमत्र कारणम्? "आचारहीनं नपुनन्ति वेदाः" इति धर्मनीते वचनमेव कारणमत्रविषये नान्यत् किञ्चित्। अतः एव मानवजीवने आचारस्यमहन्महत्त्वं समेषां सद्गुणानाम् मूर्ध्नि वर्तते। एवं भूतस्याचारस्याचरणे गौरवशिखरमासीनाः अतीतस्यैव केवलं प्रकाशं प्रसारयन्तश्च यद्यपि सन्त्यनेके साधवो ब्रह्मचारिणः उदाहर्तुम् परन्तु विंशतितमशताब्द्यामस्याम् सदाचारशीलेषु ब्रह्मचारिषु यदि कस्यचित् महापुरुषस्य प्रथमगणनायाम् नामाङ्कनं कर्तुम् शक्यते तदा महाराजश्रीविभूषितस्य जीवनदत्तस्य जीवितमेव मार्गमनुसरतां जनानाम् जीवनोद्धाराय अलंभविष्यतीति नास्त्यत्र सन्देहावकाशः।

तत्रैव वसता मया एतदवगतम् यत एष हि महानुभावः सर्वप्रथमं भारतवर्षे विख्याते भगवत्याः दुर्गायाः अधिष्ठानकारणादतिमहत्त्वपूर्णे बेलोननामके स्थाने एकस्यां पाठशालामध्यापनकार्यमकरोत् ततः षट्पुत्तरैकोनविंशतिशततमे विक्रमाब्दे स्थानमेतत् उचितमवगत्य सप्तविंशति वर्ष देशीयः एव तपस्विजनोचितं मार्गमनुसर्तुम्एकान्तवासमभिलषन् मन्दं मन्दं प्रवहन्त्या गङ्गायाः वीचिविक्षोभशीतले विविधफलपुष्पविभूषिते तरुषण्डमण्डिते प्रकृतेः साम्राज्यमादधति नरवर नाम्नि भूभागे पर्णकुटीमेकां निर्माय वस्तुमारब्धवान्।

शनैः शनैः तत्रैवोपचीयमानख्यातिः ब्रह्मतेजसः कीर्तिकौमुदीकलामितस्ततो विक्षिपन् भारत व्यापिन्याः स्वसंस्कृतिपोषिकायाः देववाण्याः प्रचाराय साङ्गवेदमहाविद्यालयाख्यमेकं विद्यामन्दिरं निर्मापितवान्। तस्मिन् विद्यामन्दिरे वेदविहितमार्गानुसारं समस्तशास्त्रपारङ्गतैः सर्वगुणसम्पन्नैः गुरुभिरध्यापितच्छात्रः स्वयमपि तेभ्यः सदाचारदीक्षादातुं प्रायतत उपादिशच्च। विद्यार्थिनांकृते तस्यैतादृशः प्रेमप्रचारः आसीत् यत् ते स्वपित्रोर्वियोगमपि सहमानाः अविद्यान्धकारं दूरीकर्तुम् इतस्ततः दूरतश्च समागच्छन्तिस्म। अयमेव महानुभावः स्वतपः प्रभावेण जनक इव तेषां भोजनाच्छादनादिकस्यैतादृशं सुप्रबन्धमकरोत् यत् ते तम् महाभागं ब्रह्मचारिणं स्वपितरं विद्यालयञ्च स्वगृहम् एवामन्यन्त। सदाचारशीलस्य आजन्म ब्रह्मचारिणस्तस्य तपस उत्कटगन्धेन योग्याध्यापकानाम् सर्वोत्तमाध्यापनविधिना, ब्रह्मचर्यव्रतधारिणामन्तेवसताभनवरतम् अध्ययने परिश्रमेण अत्युत्तमपरीक्षा-

परिणामेन च पूर्वोक्तमहाविद्यालयस्योन्नतिपरिमलः भारतस्योत्तरप्रदेशे एतावान् व्याप्त आसीत् यत् शिक्षामन्त्रिणः शिक्षानिरीक्षकाणाञ्च हृदयाकर्षणं जातम्। परिणामतश्चास्य विद्यालयस्य प्रथमश्रेण्याम् गणना जाता। वार्षिकी अनुदानवृद्धिश्चाभवत्। एवम् अयम् विद्यालयः तस्य महानुभावस्य संरक्षणे एवोन्नतिशीलो नासीत् दिवंगतेऽपि तस्मिन् तस्य तपसा तेनैव पथा प्रगतिपरायणो वर्तते।

सर्वत उपरि अयम्महानुभावः स्वसहवासे समागतां जनानां कृते कल्पवृक्ष इवासीत् ये यत् यदिच्छन्तिस्म तेभ्य स्तदेव दातुमुत्सुकः समभवत्। पाणिग्रहणाभिलाषिणाम् पाणिग्रहणंकारितवान् मोक्षमभिलषतः सन्यासं ग्रहीतुम् प्रैरयत्। ब्रह्मचर्यव्रतं पालयितुमुत्सुकानां कृते तदर्थम्साहाय्यञ्चाकरोत्।

एवं भूताखिलजनहितपरायणः विजितेन्द्रियग्रामः स्वतपसादेदीप्यमानः स्वर्गेऽपि स्वसदाचारपूर्णकृतिभि र्गृहीतप्रधानपदस्ततः एवास्माकम् समेषां कल्याणं कुरुताम् इति पूज्यचरणेषु मेऽभ्यर्थना।

ब्रह्मचारि प्रशस्तिः

(श्रीभगवद्दत्त शर्मा, भिरावटी, बदायूँ)

तत्र तत्र श्रीमतां भवतां मानवकदम्बवन्दनीयानामनवरतगायत्रीपुरश्चरणपरायणानां विप्रवंशावतंसानां सनाढ्यकुलभूषणानां महर्षिमूर्धन्यानां श्रीसाङ्गवेदमहाविद्यालयकुलपति महोदयानां नैष्ठिकब्रह्मचारिणां जीवनचरित्रोल्लेखनविषये प्रेर्यमाणः सर्वतः प्राक् संसारसागरसन्तरणसेतूयमानं वन्दारुजनमन्दारकल्पं तच्चरणारविन्दमेव वन्दे।

तदनुतेषां जीवनगतं तच्चरित्रमजानन्नपिचतुर्दिक्षुतद्यशः पताकायशोवितानमेव यथा कथञ्चन लेखनीविषयं कुर्वाणः स्वकीय कर्तव्यपरायणतां मन्ये।

यद् यद् विभूति मत्सत्त्वं श्रीमदूर्जितमेव वा।
तत्तदेवावगच्छ त्वं मम तेजोंऽश सम्भवम्॥

इति श्रीमद्भगवद्गीतायां प्रतिपादयता श्रीमताभगवता श्रीवेदव्यासेन महर्षिणा यल्लिपीकृतम् तद्वचनानुसारमेव—

यदा यदाहि धर्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्॥

धर्मध्वंसकानाम् अनेकानाचारपरायणानामनाचारै र्यदा धराकलुषीभूतासती भारवती संजा-

वते तदैवानेकविभूतिस्वरूपं भगवत्प्रादुर्भावः संजायते ।

इदानीमपि एकोनविंशतिशताब्द्यां वैदिक धर्मस्य परमो ह्रासः समजनि तदैवार्यधर्मविवृद्धये श्रीमतां श्रीजीवनदत्तमहोदयानां अलीगढप्रान्तेबरौली ग्रामे जन्माभूत् ।

एते महोदयाः शैशवादेव नैष्ठिकब्रह्मचारिणः सनातनवैदिकधर्मपरायणाः वेदशास्त्राभ्यासनिरतास्तत्प्रचारपरायणाः विप्रकुलमूलसम्वर्धनरताः वर्णाश्रमाचाराचरणशीलाः निरन्तरसावित्रीव्रतानुपूतान्तःकरणाः भारतीयसंस्कृतिसमुन्नयनदक्षाः सद्विद्याप्रचारपरायणाः साङ्गवेदविद्यालयप्रतिष्ठापनेन ऋषिकल्पाः निजोपदेशैः संसारानलसन्तप्तानां गृहदारपुत्रादिप्रेमवन्धनसन्दानितानां मानवानां हृत्सरोजे परमभक्तिज्ञानवैराग्यसुधाधारां वर्षयन्त एव स्वकीय जीवनचर्यां यापयन्तोमोक्षधर्मपरायणा चैत्र कृष्ण १० गुरौ २०१२ वैक्रमेऽब्दे मुक्तस्वरूपा अभूवन् ।

एतेषां यशोविभूतिमुल्लेखितुं लेखनी सर्वथा अपूर्णा असमर्था च तथापि स्वकीयवचोविन्यासानुसारं यत्किमपि मयोदलेखि तदेव श्रीचरणयोः समर्पणेन स्वात्मानं कृतार्थम्मन्ये ।

वदति वेदपथं मनुजान्प्रति चरति धर्मपथे खलु सर्वदा ।
जपति मन्त्रमलं प्रभुलब्धये ललति जीवनदत्तमहोदयः ॥१॥

कीर्तिं दिक्षु विधाय सज्जनमनः संमोदसंवर्द्धनम्-
कृत्याकृत्यविधानहाननिपुण पापापनोदक्षमम् ।
आदर्शं परलोकपान्थसरणौ तापत्रयोन्मूलनम्-
श्रीमज्जीवनदत्तमात्मसुहृदं वन्दे मुदा सर्वदा ॥२॥

ध्यात्वा श्रीशपदाम्बुजं जनिमतामानन्द मुत्पाद्य च-
ध्वान्तंदूरितवान्नितान्तममलं संस्थाप्य विद्यालयम् ।
उद्धृत्याखिलवेदमग्नजनिषुन्यस्यप्रबोधं बुधः-
श्रीमज्जीवनदत्त उन्नतमना लीनः परब्रह्मणि ॥३॥

पुण्यश्लोकाः महाराजाः

श्रीस्वामी रामाश्रमः, लुधियाना (पंजाब)

महाराजश्रीजीवनदत्तमहाभागाः स्वनामधेयमन्वर्थीचक्रुस्तेषां जीवनं ब्राह्मणार्थे चासीदिति सर्वेषामुत्तरभारतीयानां सतां विदुषां गीर्वाणवाग्देवतासमुपासकानामतिरोहितं यत्तैर्मन्वर्थानुसारिणी प्रवरा वागपरा भागीरथी प्रवाहिता।

सूर्यवत् स्वाचारपावनवारिणाऽतीर्थानपि तीर्थीचक्रुः मादृशान् बहुशो जनान्। किं बहुना अद्यत्वे पुण्यश्लोका अभूवन्, यतोहि सर्वैः पुण्यवद्भिः तेऽद्यापि श्लोक्यन्ते।

तेभ्य उत्तमश्लोकत्वमपि नातिरिच्यते यद्धि, उद्गतंनिर्गतं तमोऽविद्यापटलं येषां ते करपात्र-सदृशा अपि यान् श्लोकन्ते, तत्र मादृशाः किं लिखेयुः। तन्महिमानं गायं गायं स्ववाणी पाविता।

जीवनोल्लेख्यचमत्काराः

श्री आशाराम उपाध्याय, काशीपुर, नैनीताल

श्रीप्रातःस्मरणीयानां महामहिमशालिनां, विद्वज्जनमूर्धन्यानां, श्रीसाङ्गवेदमहाविद्यालय-संस्थापकानां विद्वद्वरेण्यधर्माचार्यपदविभूषितानां ब्रह्मनिष्ठकर्मठपुरुषाणां विहितानेकगायत्रीपुरश्चरणा-नामनवरतगाङ्गाम्बुपरिषेवणशीलानां महाराजाधिराजगुरुवर्य्याणां विषये किमपि विज्ञपनीयं तच्च-रणारविन्दसेवनपटुना विप्रवटुना।

चतुर्विंशत्युत्तरैकोनविंशति शततमेईशवीये वत्सरे यदाहं संस्कृतं साहित्यमध्येतुं प्रागाम् तदा परमकृपालुतया सकृन्मामवलोक्यातीवकरुणाभरेण हृदयेनागादीत् यद्विकलाङ्गोऽयं विप्रवटुरवश्यमेव संस्कृतमध्येष्यते विद्यालये प्रवेशार्हः प्रवेष्टव्य इति प्रवेशयितारमवादीत्। मदीयो ज्यायान् बन्धुस्तत्रैव मातृपितृहीनं मां विहाय गृहं प्रत्यावर्तत। यथातथा सौख्यतर्ति विदधानोऽनन्यमनस्को भूत्वाध्ययने प्रावर्तं। भूयसा परिश्रमेण साहित्यव्याकरणादिकमध्यगीषि। धर्मधौरेया इमे महानुभावाः प्रकृत्या स्वभावेन चातीवदयालव आसन्। सावित्रीपुरश्चरणतपोभ्यां प्रख्यातमूर्तयः समभूवन्। इतस्ततो यदाकदागम्यजनाः स्वाभिलषितं ययाचिरे। एकदा वर्षर्तौ विद्यालयाध्यापनकालेपयोदाः धारासम्पात-मवर्षिषुः। खाद्यसामग्रीजातमानेतुं गता शकटिनैवप्रत्यावृत्ता। तदा समेऽपिअध्येतारोऽध्यापयिता-रश्चोद्विग्नामहाराजाधिराजमभ्येत्यावोचन् मध्याह्नकाले कथंकारं विजनेवनस्थे विद्यालये खाद्यसाम-ग्रयभावाद् भोजनं सम्पत्स्यते ? तेषां वचांसि श्रावं श्रावं दयालवो महात्मानः प्रावोचन् जगन्नियन्ता परेशो गंगामाता च सर्वं कार्यं साधयिष्यतः नात्र काचन विचारणा। धारासम्पातंवर्षति गगने द्वादश-वादनावसरे तुरंगमे एकस्मिन् शष्कुलीमोदकांश्च समारोप्य सलकुटीकः कम्बलवानेकः षोडशवर्षवयस्कः समागम्यावोचत् एकेनमहापुरुषेणेयं भोजनसामग्रीप्रहिता, स्वीकृत्य मामनुगृहणातु भवान्। इति वक्ता-रमपश्यद्भिर्महोदयैरभाणि कुत्र गत आनेता। अभितो गवेषणां कुर्वद्भिर्महानुभावैः निरचायि यद्भग-वानानन्दकन्दलोभूतभावनोजगतीपरिपालक एव आसीत्। इत्यादि वचनानिसमाकर्ण्य सर्वेऽपि यथे-प्सितमभुञ्जत।

परमपूज्य पं० जीवनदत्तजी महाराज की पुनीत स्मृति में विनीत श्रद्धांजलि

(श्री गणेशलाल शर्मा 'प्राणेश', फीरोजाबाद)

दिग्-दिगन्त में फैल रहा यह यश-सौरभ किसका है,
स्मृति-ग्रन्थ जीवनधर का है यह सौरभ उसका है।
अतः सुगन्धित वात मनों में भाव उमियां भरती है,
स्वर लहरी से गुंजित झंकृत हृद्तंत्री को करती।

जीवनदत्त अनाथों को तुम जीवन देने वाले,
बटु को संत महन्त और आचार्य बनाने वाले।
विधवाओं को ज्ञान-दान दे उनका मान बढ़ाया,
सात्विक जीवन सत्य कर्म का उनको पाठ पढ़ाया।

हे आचार्यप्रवर तुम सेवा करते थे निष्कामी,
दीनों दुखियों के विनीत हो बनते थे तुम हामी।
तपःपूत जीवन जीवन की क्या महिमा बतलावें,
हे दधीचि ! हम विनत प्रणत् हो अपना शीश झुकावें।

तुमने नंगे भूखे रहकर ज्ञान-दान फैलाया,
संस्कृति, संस्कृत, सरस्वती का अनुपम रस बरसाया।
अध्वर यूप बने हैं यश के मुनो यती सन्यासी,
हे शिव ! नरवर बना दिया था तुमने सुन्दर काशी।

जीवन ने जीवन त्यागा उस यश की यह झंडी है,
ऋषे ! आपकी पद-रज पाकर पूत बने दण्डी हैं।
करपात्री सुपात्र बना ये बोध दिया आश्रम को,
विज्ञ अनेक बनाये तुमने हर कर अन्धःतम को।

तुम स्थितप्रज्ञ समत्व भाव से देते थे नवजीवन,
हे जीवन धन ! हम तो करते केवल अर्चन वन्दन।
'क्षुरस्य धारा निशिता दुरत्यया'-पथ पर चलने वाले,
ज्ञान कर्म औ भक्ति-शक्ति से दुर्गुण दलने वाले।

मुने ! आपकी सेवा से कृतकृत्य हुए हम सारे,
भावांजलि भर विनत आपके पावन चरण पखारे।
तुम थे रवि अध्यात्म जगत् के लगते हमको प्यारे,
एक आपके तप-प्रभाव से चमक रहे हम तारे।

तुम गुरुदेव ! बरेण्य ! देश के गौरव थे गोस्वामी !
प्रेयः तज कर श्रेयः पंथ के थे निश्चल अनुगामी।
राजभवन-सी सब सुख निधियाँ तुमने तृण सम त्यागीं,
तुम थे मधुकर चम्पक वन के वीतराग अनुरागी।

ऐश्वर्यों के मोह-कुंज में कभी न फँसने वाले,
तुम थे धर्मधुरीण धर्म की ध्वजा उठाने वाले।
मनन मनस्वी तरुण तपस्वी आर्य वीर सेनानी,
ज्वलित जवानी बलिदानों की बन गई अमर कहानी।

यशेच्छा औ धनेप्सा भी तुम्हें मोह नहिं पाये,
कविर्मनीषी, शुभ व्रतचारी इसीलिए कहलाये।
गंगा गीता गायत्री के थे तुम परम पुजारी,
मज्जन करते गंगा में नित पावन कल्मषहारी।

नैष्ठिक ब्रह्मचर्य के पालक संयम शुचि व्रत धारी,
भीष्म-लखन-हनुमान आप पर जाते थे बलिहारी।
जीवनमुक्त हो गये जीवन ! जीवन दे जनता को,
उपमा किसकी देवें कोई मिला नहीं समता को।

परहित निज सर्वस्व त्याग का सब को पाठ पढ़ाया,
अहो कामनाजयी ! तुम्हें कोपीन श्वेत मन भाया।
हिन्दी-हिन्दू-हिन्द पुत्र जब इस पथ पर विचरेगा,
मानवता-सुख-शांति द्वार तब सत्वर सहज खुलेगा।

सेवा के जिस राजमार्ग को तुमने नित्य संवारा,
हे प्राणेश ! चलें हम उस पर पा आशीष तुम्हारा।
तुम हो गुणातीत जीवन धन, हम कैसे गुण गावें,
हो विभोर तव भक्ति-भाव में श्रद्धा-सुमन चढ़ावें।

विश्वेश्वर–वन्दन

आचार्य श्री शिवदत्त शर्मा, नरवर

कोऊ कहै बोधचन्द्र चन्द्र में समायी जाय, कोऊ कहै देव देवधाम को पठानों है।
कोऊ कहै विद्यापपो मिले हैं पपी में जाय, देव गुरु अस्त देव वाणी में वखानों है।
कोऊ तप सत्य मह जन को बतावें गये, स्वामीगण कहें ब्रह्म, ब्रह्म में समानों है।
'सारस्वत' सार मुनि मध्य सोच अद्य कहें, विद्या ही को सार आज विद्या में बिलानों है ॥१॥

कोऊ कहे गंगातीर आश्रम अनाथ भयो, विद्या ही के पुंज को ठिकानों जो उठानों है।
कोऊ कहे जीवन को जीवन विलानो आज, ब्रह्मीभूत स्वामी को वियोग दर्शानों है।
युद्ध कर बुद्धिन ते हार कवि लोग गये, तत्त्व भूत हेतु उन्हें हाथ नहीं आनों है।
'सारस्वत' सार कहे सबके समझ सोच, दर्शन के साथ सार दर्शन बिलानों है ॥२॥

कुलपति वन्दना

गंगोत्री से सागर के संगम लौं गंगाकूल, तीरथ अनेक देखने में हमें आते हैं।
जहां जहां सुपथ प्रचारक प्रसिद्ध हुए, तहाँ तहाँ आश्रमों के नाम सुने जाते हैं।
गर्ग संहिता में वृद्ध केशी सिद्ध पीठ लिखा, कर्णवास रामघाट मध्य इसे पाते हैं।
'नरवर' पुकारा उसे आजके विपश्चितों ने, कश्चिद् उसीकी थोड़ी भूमिका सुनाते हैं ॥१॥

उन्नीस सौ साठ के ही विक्रम से पूर्व यहां, प्रतिपल प्रेतन के झुंड मड़राते थे।
आस पास वासी न निकासी करें इत ओर, गिद्ध जैसे ढीठ नहीं पर मार पाते थे।
कहां लौं कहूं इस बीहड़ की गाथन कूँ, लोखड़ या भोखड़ के शब्द सुने जाते थे।
ताही समय बैलोन ते गंगा के अन्हायवे को, ब्रह्मचारी वेशधारी जीवनजो आते थे ॥२॥

सिद्ध पीठ जान इस भूमि में लगाया मन, लोक से हटाके प्रीति गंग में बढ़ायी है।
करत करत जाप त्रिपदा को मूर्तिमान, वैदिक मर्याद जाके अङ्ग में समायी है।
उठी जो लहर एक भारती उधारन की, फलरूप पाठशाला देखने में आयी है।
पाणिनि, कणाद और गौतम की कश्चिद् ने, जीवन के आश्रम में विजय देख पायी है ॥३॥

झंझट को झटक पटक पाश्चात्य सभ्यता को बाँध के लंगोटी देश गौरव बढ़ाया है।
पन्था से भूले असहाय विप्रबालों को वैदिक सभ्यता में पटु सर्वथा बनाया है।
कश्चित् प्रशान्त भाल भूति से विभूषित जाको, बिल्व वृक्ष नीचे शिला आसन जमाया है।
धन्य है सहस्र कोटि जननी जन्म भू को, जीवन सा लाल जाने गोद में खिलाया है ॥४॥

प्रभु शुद्ध बुद्ध अनन्त परमानन्द करुणागार हो,
रहते रहित हो विश्व से सुने विश्वपालन हार हो।
हे नन्दबालक दुष्टघालक भक्तपालक हो तुम्हीं,
निज धर्म रक्षा के लिए अवतार लेते हो तुम्हीं॥

कानन निकुञ्जों से मधुर मुरली बजाने का तुम्हें,
अभ्यास है भक्तों के हित सर्वत्र आने का तुम्हें।
अतएव नत मस्तक तुम्हें मैं बार बार पुकारता,
ऋषिराज पूजा के लिए कुछ पद्म पुष्प सम्हारता॥

झूंठी प्रशंसा से रिझाना पामरों का कर्म है,
कह सत्य डंडा ठोक कर मानव का सच्चा धर्म है।
द्विज वृन्द सभ्य समक्ष जो पद्यों का मेरा गान है,
इस तुच्छ बालक ने किया महाराज का सम्मान है॥

ब्राह्मणशिरोमणि कुलतिलक जो सामने हैं दीखते,
द्विज मात्र आश्रम में इन्हीं के सत्य शिक्षा सीखते।
भूसुर सभी आचार पथ से शून्य जब रहने लगे,
पाश्चात्य शिक्षा में दिनों-दिन आपही बहने लगे॥

द्विज गण अविद्या युक्त हो पहुंचा रसातल देश को,
वेदाङ्ग पढ़ना बन्द कर धारा निशाचर वेश को।
निज देश की ऐसी दशा विश्वेश ने देखी जभी,
आचार रक्षा के लिए शंकर स्वयं आये तभी॥

हैं यही जो सौम्य से चौको पै सबको दीखते,
इनके यहाँ से हम सभी आचार शिक्षा सीखते।
यजु, साम, ऋक् व अथर्व का वटु धोष करते प्रेम से,
जप होम सन्ध्या तर्पणादि कृत्य होते नेम से॥

वर्णाश्रम उद्धार हित, महाराज का उपदेश है,
वैदिक प्रथा निज देश में गूंजे यही उद्देश्य है।
आश्रम में आये अतिथियों का, मान अरु सत्कार से,
आतिथ्य कर देते भुला पथ कष्ट अपने प्यार से॥

याचक मनोरथ के लिए, तरु कल्प सम श्रीमान् हैं,
बहु दीन दुखियों के यही बिगड़े बनाते काम हैं।
यद्यपि लँगोटी है कटि अरु अङ्गप्रोक्षण गात में,
पर वस्त्र का बहु दान देते बात ही की बात में॥

पढ़ने में है शिशु दक्ष जो पण हीन मांगे छुट्टियाँ,
तब आप प्रोत्साहित करें समुचित उन्हें दे वृत्तियाँ।
ये वीतराग शिरोमणि मतलब न कुछ संसार में,
हैं आज भिक्षुक बन रहे निज भारती उपकार में॥

उत्थान में जिनके श्री भारत विजय है सारथी,
अत एव ही निश्चय हुआ जागेगी भारत भारती।
गुरु शिष्य मण्डल लौकिकों का लोक हित हैं सोचते,
आनन्द मर्यादित सदा देते जो उनको रोचते॥

हाँ ध्यान आया अब मुझे गुरु पूर्णिमा है आज की,
वक्तव्य में मेरे कभी ना बात रहती व्याज की।
प्रति वर्ष में दिन आज के शिष्यों का होता कर्म है,
बहु द्रव्य दे गुरु वृन्द को सन्तुष्ट करना धर्म है॥

किन्तु यहाँ पर द्रव्य की बातें चलाना व्यर्थ है,
तप और विद्या ही जहाँ जीवन का सच्चा अर्थ है।
अत एव भाव प्रसून कोरक की चढ़ाऊँ माल मैं,
शब्देन्दु किरणों से गुँथी भूति विभूषित भाल में॥

श्रीपाद पद्म पराग में मम मन भ्रमर निवछार है,
इस दीन कश्चित् का विभो यह आपको उपहार है।

जीवन–छवि

श्री दीक्षित भिरावटी, वदायूँ

सनाढ्यवंश भूषण तेहि पालन को विष्णु पूषण,
दूषण हरण गुण जिनके अपार थे।
विप्रकुलपालक खलसालक धर्मचालक थे,
दीन-द्विज-कंजवन विकाश को तमारि थे॥
विरतिभक्तिज्ञाननिष्ठ तपयोगते वरिष्ठ,
दानिन में महादानि परम उदार थे।
धीर कर्मवीर गम्भीर श्रीजीवनदत्त,
छवि तेज युक्त शब्द मन सुधासार॥

जीवन-ज्योति

(आद्याक्षरी चित्रकाव्य)

श्री कविवर प्रणव शास्त्री, फीरोजाबाद

आदर्शों के भानु ज्ञान की किरण पसारे,
दर्शन की अनुभूति अलौकिक मनमें धारे।
बाह्याडम्बर शून्य पूत अन्तस् के हामी,
लक्षण लक्ष्य ललाम तर्क के सुन्दर स्वामी ॥१॥
ब्रह्म सूत्र सौन्दर्य शिखा के शिखर समुज्ज्वल,
चारु चरित्रों के चन्दन से चर्चित प्रतिपल।
रीति नीति ऋषि मुनियों की प्रभु-प्रीति पगाये,
पंचम स्वर में गान कीर्तिकोकिल ने गाये ॥२॥
डिगे न श्रुति पथ निर्णय से जो ध्यानी ज्ञानी,
तत्त्व ज्ञाता उद्‌गाता मन्त्रों के मानी।
प्रबल प्रचारक देवगिरा-गायत्री-गायक,
वर्णी वन्द्य विचारगङ्ग-तट 'नरवर' नायक ॥३॥
रहते थे निष्काम कमलजल उपमा धारे,
श्रीपति श्रेष्ठी चञ्चरीक चरणों में प्यारे।
जीवन जीवनदत्त दिया जनता को प्यारा,
वरदानी ने वरदानों का प्रेम-पिटारा ॥४॥
नव निर्मिति को धर्म धैर्य सम्बल थे पाये,
दयासिन्धु ने उन्नति पथ जन को दिखलाये।
"तस्य वाचक: प्रणवः" के थे दीप जलाये,
महाप्राण, गुण, सन्धि, वृद्धि की संज्ञा लाये ॥५॥
हानि लाभ सुख दुःख दशा में समतल योगी,
रात्रिन्दिव अति दीन हीन के शुचि सहयोगी।
जप, तप, ध्यान, समाधि, सिद्धि, संयम के साँचे,
जीवन शुभ्र मराल सत्व गुण रँग में राँचे ॥६॥
कीर्ति कुमारी-जनक, देव द्विज मुनी मनोहर,
जनता में संस्मरण आपकी धवल धरोहर।
यतिवर, जीवन नित्य धरा में ज्योति जगावे,
होवे प्रणव-परायण जन-मन मङ्गल गावे ॥७॥

~~~~~~~~
~~~~~~~~

अभिवन्दन

श्री विश्वनाथ शर्मा 'विश्वेश', फीरोजाबाद

पितु ऋण का परिहार कहीं कर देता पथ से विचलित ।
तो क्यों जीवन चरित सुनाकर होती कीर्ति प्रफुल्लित ।।
बाँध अगर लेती माया भी तुममें निज गुण बन्धन ।
तो फिर शरद् जुन्हाई सा तन रहता क्यों शुभ दर्शन ।।

यदि विरक्ति का कहीं न करता वरण तुम्हारा यौवन ।
कौन रुद्र कर पाता तो फिर रति पति का अभिमर्दन ।।
बढ़ा न होता स्वर्ण भोर सा यदि तेरा तन स्यन्दन ।
तो कब नर हो पाता नरवर होता कहाँ तपोवन ।।

रोपा होता अगर न तुमने निर्जन में हरिचन्दन ।
तो बुलन्द काशी सा होता क्यों नरवर-यश हर क्षण ।।
चला न होता पथ यदि तुमने सुर वाणी का अनुपम ।
तो कैसे नवजीवन धारण कर पाते निगमागम ।।

किया न होता यदि जीवन धन तुमने स्वयं समर्पित ।
तो गङ्गा जमुना के आँगन रहती शेष न संस्कृत ।।
पाया होता कहीं न तेरे कर का शुचि संस्पर्शण ।
तो घर घर करपात्र न होते करते संध्या तर्पण ।।

हुई न होतीं अक्षय वट सी भुज लतिकायें व्यापक ।
तो फिर द्विज भी हुए न होते विद्या के आराधक ।।
इतनी क्षमता कहाँ कि ऋषिवर कर पायें गुण-ग्रन्थन ।
मेरे बस का तो है द्विजवर ! पुनः पुनः अभिवन्दन ।।

संस्मरण-आलोक

एक घड़ी भी जो रहे कुलपति के संग लोग।
धन्य घड़ी वे धन्य हैं दूर हुए भव रोग॥
उन्हीं क्षणों के संस्मरण हुए यहाँ एकत्र।
जिनका दिव्यालोक पा, पाठक बनें पवित्र॥

आशीर्वाद

जगद्गुरु शंकराचार्य स्वामी श्रीकृष्णबोधाश्रमजी महाराज
ज्योतिर्मठ, बदरिकाश्रम।

